THE
CHOWKHAMBÂ SANSKRIT SERIES
A
COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.
NO. 455.

अग्निष्टोमपद्धतिः ।

वामनाचार्यविरचिता कर्कानुसारिणी
आध्वर्यवपद्धतिः ।

नानाभाई इत्युपनामक रामकृष्णत्रिपाठिकृता
औद्गात्रपद्धतिः ।

तथा

रघुनाथद्विवेदिनिर्मिता शाङ्खायनसूत्रानुसारिणी
हौत्रपद्धतिः ।

Agnistoma Paddhati

Consisting of (i) ĀDHVARYAVA PADDHATI by Vāmanācharya, (ii) AUDGATRA PADDHATI by Rāmakṛṣṇa Tripāṭhī Nānābhāi and (iii) HAUTRA PADDHATI following the Sāmkhyāyana Sūtras by Raghunātha Dvivedī.


Edited with notes etc, by

PANDIT BHAGAVAT PRASĀDA S'ARMĀ,
Vedāchārya, Professor of Veda,
Government Sanskrit College, Benares.

FASCICULAS. II-२.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE,
Benares City.
1937

Registered According to Act XXV. of 1867. (All Rights Reserved.)



Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

आध्वर्यवपद्धतिः

(महावीराञ्जनम् ।)

एतदन्तं स्थाताध्वर्युश्चाआज्यसंस्कारा(१)दि युगपत्कुरुतः।

अध्वर्युः-निरूप्याज्यं गार्हपत्येऽधिश्रित्य स्रुवं सम्मृज्योद्वास्योत्पूयाऽऽज्याञ्जन्ती (ऋ० ५।४३।७) त्युच्यमाने देवस्त्वेत्यनक्ति महावीरꣳ स्रुवेण।

"ॐ देवस्त्वा सविता मध्वानक्तु" (३७।११)

रजतशतमानं खर उपगूहति पृथिव्याः सꣳस्पृश इति।

"ॐ पृथिव्याः सꣳस्पृशस्पाहि" (३७।११)।

औद्गात्रपद्धतिः।

अथ यदा देवस्त्वा सविता मध्वानक्त्विति महावीरमञ्जन्ति तदा हावाञ्जेति शार्ङ्गं त्रिर्गायेत्। शार्ङ्गरूढवदाङ्गिरसे वा त्रिरभ्यस्येदन्तरा पराचा (२।१।३) इति द्राह्यायणः।

शार्ङ्गस्य कक्षीवान् ऋषिः जगती छन्दः घर्मो देवता घर्माञ्जने विनियोगः।

हॉवाञ्जॉ। तां २३४ यि। वियꣳजते समꣳजते। एहियाऽएहियाऽ ३४ १ हाउ क्रातूम्। रां २३४ यि। हन्ति मधुवाभियꣳजते। एहियाऽएहियाऽ ३४॥ हॉउसायि धीः। ऊं २३४ त्। इवा से पतयन्तमुक्षणम्। एहियाऽ। एहियाऽ ३४। हॉ उ हा यि रा। एवा २३४ पावाः पशुमप्सु गृभ्णते। एहियाऽ। एहियाऽ ३।४। हाउ हॉ ५ इ। डाँ(२)॥

हौत्रपद्धतिः।

अञ्जन्ति यं प्रथयन्तो न विप्रा वपावन्तं नाग्निना तपन्तः पितुर्न पुत्र उपसि प्रष्ठ आ घर्मो अग्निमृतयन्नसादो३म्(३)"॥

इति विलेऽज्यमाने।

---

(१) आज्यसंस्कारश्च पूर्णाहुतिधर्मणेति कर्कवासुदेवसम्प्रदायकारादयः। अग्निहोत्रधर्मणेति केचित्। तन्नोपपद्यते—आज्यं संस्कृत्येत्युपदेशादाज्यं प्रकृत्य ये संस्कारा उक्ता 'निरूप्याज्यमित्यादय' (का०श्रौ० ४।१०।५) स्तेषामेव ग्रहीतुमुचितत्वात्। प्रधानभूतस्य यागस्यापूर्वत्वेन यावदुक्तत्वेन च तत्साधनद्रव्यस्य संस्काराप्राप्तेराज्यं संस्कृत्येति वचनम्। तथाचाहापस्तम्बः—"दर्विहोमसंस्कारेणाज्यं संस्करोति नैतस्य संस्कारो विद्यत इत्यपर" (१९।६।७-८) मिति।

(२) छ० आ० ६, २, २, ११ = गे० गा० १६।१।३३॥

(३) ऋ० ५।४३।७। एतामृचं महावीरपात्रमुखाञ्जनात्पूर्वमारभ्य महावीरपात्रमुखे घृतेनाज्यमाने पठेत्। यद्यपि शाङ्खायनश्रौतकल्पे "अञ्जन्ति यमिति विलेऽज्यमाने" (५।९।१२)ऋक्पाठोऽभिहितस्तथापीयमृगभ्यञ्जनात्पूर्वमेवारब्धव्या, अध्वर्युवशात्।

आध्वर्यवपद्धतिः ।

शुक्रं गायेति प्रेष्यति(१) । शुक्रं गाय । पत्नी शिरः प्रोर्णुते ।

सं सीदस्वेत्युच्यमाने गार्हपत्ये मुञ्जप्रलवान् द्विगुणानादीप्य प्रति दिशं खरे करोति तेषु महावीरमाज्यवन्तमधिरसोति ।

"ॐ अर्चिरसि शोचिरसि तपोऽसि" (३७।११) ।
अनाधृष्टेति वाचयति प्रादेशमध्यधि धारयन्तम् ॥
"ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्य आयुर्मे दाः ।
पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये प्रजां मे दाः ॥
सुखदा पश्चाद् देवस्य सुवितुराधिपत्ये चक्षुर्मे दाः ।
आश्रुतिरुत्तरता धातुराधिपत्ये रायस्पोषं मे दाः ।
विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्य—

औद्गात्रपद्धतिः ।

रजत उपधीयमाने (२)नियुत्वानिति शुक्रं सकृद्गायेत् ।

शुक्रसाम्नः शुक्र ऋषिः गायत्रीछन्दः धर्मोदेवता शुक्रपरिधाने विनियोगः।

हाँउ३ । शुक्रंम् । ३ । शुक्रंꣳ शुक्रंम् । २ । शुक्रं ꣳ शुक्रंम् । शुक्रंꣳ शुक्रंम् । २ । शुक्रंꣳशुक्रंम् । नियुत्वान्वायो३ वा॑ गो॑ १ हीं २ अयर्ठ० शुक्रो । आ३ यामो॑ १ यिता॒ २ यि । गन्तासि सुन्वा३ तो॑ गृ॑ १ हा २३ म् । हाँउ शुक्रंम् ।३। शुक्रंठ० शुक्रम् ।२। शुक्रंꣳ शुक्रम् । शुक्रंꣳ शुक्रंम् । शुक्रंꣳशुक्रंम् । । २ । शुक्रम् । शू २। क्रा २३४ ओहोवा । ए शुक्रं ।३।७। ए । शुक्रं । ए शुक्रंम्(३) ॥

हौत्रपद्धतिः ।

"सं सीदस्व महाँ असि शोचस्व देववीतमोविधूममग्ने अरुषं मियेध्य सृज प्रशस्तदर्शतोऽम्"(४) ।

इति खरे साद्यमाने ।

तथा च शातपथी श्रुतिः—"स यत्रैताꣳहोतान्वाह अञ्जन्ति यं प्रथयन्तो न विप्रा इति तदेतं प्रचरणीय महावीरमाज्येन समनक्ति" (१४।१।३।१३)ति ।

एवं "संसोदस्वे"ति सिकतोपकीर्णे प्रज्वाल्य स्थापितेषु मुञ्जप्रलवेष्वाज्यपूर्णे महावीरभाण्डे साद्यमाने ऋक्पाठोऽभिहितस्तथाप्यध्वर्युवशात्सादनात्पूर्वमेव आरब्धव्यः सं सीदस्वेति ।

तथा च शातपथी श्रुतिः—"स यत्रैताꣳहोतान्वाह सं सीदस्व महां२॥ असीति तदुभय आदोषाः मौञ्जाः प्रलवा भवन्ति तानुपास्य तेषु प्रवृणक्ती"(१४।१।३।१९) ति ।

(१) अयं प्रेषः शाखान्तरात् ।

(२) रजतजातरूपे उपदधाति तच्छुक्रचन्द्रे (द्रा०श्रौः २।२।२६) ।

(३) आ० आ० १।२।६ = आ० गा० ३।२।७। (४) ऋ० १।३६।९ ।

आध्वर्यवपद्धतिः ।

ओजो मे दाः" (३७।१२) इति ब्रूहि ।

यजमानः प्रादेशं महावीरोपरि धारयन् पठति-

"ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्य आयुर्मे दाः ।
पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये प्रजां मे दाः ॥
सुखदा पश्चाद् देवस्य सवितुराधिपत्ये चक्षुर्मे दाः ।
आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः ॥
विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्य ओजो मे दाः"(३७।१२) ।

विभज्य वाचनं । प्रतिदिशमेके, तदोपर्येकम् ।

विश्वाभ्यो मेति दक्षिणत उत्तानं पाणिं निदधाति यजमानः ।

"ॐ विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि" (३७।१२) ।

मनोरश्वेति प्रादेशमुत्तरतो निदधाति यजमान एव ।

"ॐ मनोरश्वासि" (३७।१२) ।

अध्वर्युः—धृष्टिभ्यां गार्हपत्यस्य भस्मना महावीरं सर्वतः परिकीर्याङ्गारैश्च विकङ्कतशकलैः परिश्रयति त्रयोदशभिः प्रागुदग्भिः स्वाहा मरुद्भिरिति ।

"ॐस्वाहा मरुद्भिः परिश्रीयस्व" (३७।१३) ।

द्वौ मन्त्रेण प्राञ्चौ ततस्तूष्णीं द्वावुदञ्चौ द्वौ प्राञ्चौ द्वावुदञ्चौ द्वौ प्राञ्चौ द्वावुदञ्चौ,अधिकं दक्षिणतः। एकं सुवर्णशतमानेनापिदधाति दिवः सꣳस्पृश इति ।

"ॐदिवः सꣳस्पृशस्पाहि" (३७।१३) ।

हौत्रपद्धतिः ।

"भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः पुरुद्रुहा हि क्षितयो जनानां प्रति प्रतीचीर्दहतादरातेा३म्(१) ।

तपो ष्वग्ने अन्तराँ अमित्राँ तपा शंसमररुषः परस्य तपो वसो चिकितानो अचित्तान्वि ते तिष्ठन्तामजरा अयासेा३म् ।

यो नः सनुत्यो अभिदासदग्ने यो अन्तरोमित्रमहो वनुष्यात्तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वेा३म्"(२) ।

इत्यङ्गारेषूपोह्यमानेषु ।

"कृणुष्व पाजः प्रसितिन्न पृथ्वीं याहि राजेवामवाँ इभेन तृष्वीमनु प्रसितिं द्रूणानेाऽस्तासि विध्य रक्षसस्तपिष्ठेा३म् ।

---

(१) ऋ० ३।१८।१-२ । अध्वर्युणा धृष्टिभ्यां गार्हपत्याङ्गारेषु महावीरं परिकीर्यमाणेषु "भवा नः" इत्याद्यास्तिस्रः पठेत् । (२) ऋ० ६।१।४ ।

आध्वर्यवपद्धतिः ।

चन्द्रं गायेति च प्रेष्यति ॥

चन्द्रं गाय । कृष्णाजिनावकृत्तेधवित्रैरुपवाजयति(१) त्रिभिर्दण्ड-वद्भिर्मधु मधिवति ।

औद्गात्रपद्धतिः ।

हिरण्यरुक्म उपधीयमाने अत्राह गोरमन्वतेति चन्द्रं सकृद्गायेत् । चन्द्र ऋषिः गायत्री छन्दः धर्मोदेवता—

हाँ उ ।३। चन्द्रं ।३। चन्द्रं चन्द्रम् ।२। चन्द्रं चन्द्रम् । चान्द्रं चान्द्रम ।२। चान्द्रं चान्द्रम् । अत्राहगोरमन्वा १ ता २ नामत्वष्टुरा३पायिचा १

हौत्रपद्धतिः ।

तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानस्तपूंष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्का३म् ।

प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धो येा नो दूरे अघशंसो येा अन्त्यग्ने माकिष्टे व्यथिरा दधर्षा३म् ।

उद्अग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ ओषतात्तिग्महेते येा नो अरातिं स-समिधान चक्रे नीचा तं धक्ष्यत सन्न शुष्को३म् ।

ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्नेऽव स्थिरा त-नुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रो३म्(२) ।

परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतोवृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयो३म्(३) ।

अधि द्वयोरदधा उक्थं वचो यतस्रुचा मिथुना या सपर्यतोऽसंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वतो३म्(४) ।

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तो३म्(५) ।

अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपमर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्तो३म्(६) ।

पतङ्गमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः समुद्रे अन्तः कवयो वि चक्षते मरीचीनां पदमिच्छन्ति वेधसो३म् ।

पत्तङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद्गर्भे अन्तस्तां द्योतमानां

(१) "अथ धवित्रेराधूनोति मधु मधिवति त्रि" (श०ब्रा० १४।१।३।३०) इति श्रुत-त्वात । 'धूञ् कम्पने' धुनोत्यनेनेति धवित्रं व्यजनम् । करण इत्यनुवर्तमाने "अस्ति लू धू खन सह चर इत्रः" (पा० ३।२।१८४) इतीत्रः प्रत्ययः करणेऽर्थे ।

(२) ऋ० ४।४।१-५ । (३) ऋ० १।११।१२ ।

(४) ऋ० १।८३।३ । (५) ऋ० ६।५८।१ । (६) ऋ० २।३३।१०

आध्वर्यवपद्धतिः।

"ॐ मधु मधु मधु (३७।१३) आधूनोमि"।

एकं प्रयच्छति प्रतिप्रस्थात्रे ऽपरमग्नीधे धून्वन्तस्त्रिस्त्रिः परिक्रामन्ति पितृवत्(१)नापसव्यम्, उदकोपस्पर्शः। देववच्च त्रिः, अन्ते इतरथावृत्तिः(२)

औद्गात्रपद्धतिः।

या२म्। इत्थाँ चन्द्रमा ३ सो॑ गृ॑ १ हा २३ यि। हो॑ उ ३। चन्द्रम्॑ ।३। चन्द्रं॑ चन्द्रं॑ । २। चन्द्रं॑ चन्द्रम्। चन्द्रं॑ चन्द्रा॑। २। चन्द्रं॑ चा२द्रा २३४ आ हो॑ वा। प्। चन्द्रम्। ३।(३)

हौत्रपद्धतिः।

स्वर्यं मनीषामृतस्य पदे कवयो निपान्तो३म्।

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तं स सध्रीचीः सविषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तो३म्(४)।

(५)स्रक्वे द्रप्सस्य धमतः समस्वरन्नृतस्य योना समरन्त नाभयस्त्रीन्त्स मूर्ष्णो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपोपरो३म्।

सम्यक् सम्यञ्चो महिषा अहेषत सिंधोरूर्मावधि वेना अवीविपन्मधोर्धाराभिर्जनयन्तो अर्कमित्प्रियामिन्द्रस्य तन्वमवीवृधो३म्।

पवित्रवन्तः परि वाचमासते पितैषां प्रत्नो अभिरक्षति व्रतमहः समुद्रं वरुणस्तिरोदधे धीरा इच्छेकुर्धरुणेष्वारभो३म्।

सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतोऽस्य स्पशो न निमिषन्ति भूर्णयः पदे पदे पाशिनः सन्ति सेतवो३म्।

पितुर्मातुरध्या ये समस्वरन्नृचा शोचन्तः सदहन्तो अव्रतानिन्द्र द्विष्टामप धमन्ति मायया त्वचमसिक्नीं भूमनो दिवस्परो३म्।

प्रत्नान्मानादध्या ये समस्वरञ्ल्लोकयन्त्रासो रभसस्य मन्तवोऽपानक्षासो बधिरा अहासत ऋतस्य पन्थां न तरन्ति दुष्कृतो३म्।

सहस्रधारे विततेपवित्र आ वाचं पुनन्ति कवयो मनीषिणो रुद्रास एषामिषिरासो अद्रुहः स्पशः स्वंञ्चः सुदृशो नृचक्षसो३म्।

ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृदयन्तरा दधे विद्वान्त्स

---

(१) "अथापसलवं त्रिर्धून्वन्ति" "पुनः प्रसलवं त्रिर्धून्वन्ता"(श० ब्रा० १४।१।३।३१-३२)ति च श्रुतेः। अपसलवं = अप्रदक्षिणं, प्रसलवं = प्रदक्षिणमिति। एतयोरर्थयोरेतौ शब्दौ अव्ययसंज्ञौ। नात्रापसव्यं, अप्रदक्षिणप्रदक्षिणपरिक्रमणमात्रश्रवणात् पितृवदित्यस्य तावन्मात्रार्थत्वप्रतीतेः।

(२) "विवृत्त्याऽऽवृत्य वेतरथाऽऽवृत्ति" (का० श्रौ०१।८।२४)रिति परिभाषोक्तेः।

(३) छ० आ० २, २, १, ३, = आ० गा० ३; २, ८।

(४) ऋ० १०।१७७।१-३। (५) ऋ० ९।७३।१-९।

आध्वर्यवपद्धतिः ।

रुचिते वोत्तरम् । अर्चिषि प्राप्ते सुवर्णशतमानं भूमौ निधायाज्येन महावीरं परिषिञ्चति स्रुवेण प्रतिप्रणवम् ।

हौत्रपद्धतिः ।

विश्वा भुवनाभि पश्यत्यवाजुष्टान्विध्यति कर्त अव्रतेो३म् ।

ऋतस्य तन्तुर्विततः पवित्र आजिह्वोया अग्रे वरुणस्य मायया धीरा-श्चित्तत्समिनक्षन्त आशतात्रा कर्तमव पदात्यप्रभो३म् ।

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतोऽतप्ततनूर्न तदामो अश्नुते श्रृतास इद्वहन्तस्तत्समाशतो३म् ।

तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन्नव-न्त्यस्य पवोतारमाशवो दिवस्पृष्ठमधि तिष्ठन्ति चेतसो३म्(१) ।

वि यत्पवित्रं धिषणा अतन्वत धर्मं शोचन्तं प्रणवेषु विभृतः स-मुद्रे अन्तरायवो विचक्षणं त्रिरह्नो नाम सूर्यस्य मन्वतो३म्(२) ।

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमान इममपां सङ्ग-मे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्तो३म् ।

समुद्रादूर्मिमुदियर्ति वेनो नभोजाः पृष्ठं हर्यतस्य दर्शृतस्य सानाव-धि विष्टपि भ्राट् समानं योनिमभ्यनूषत व्रो३म् ।

समानं पूर्वीरभि वावशानास्तिष्टन्वत्सस्य मातरः सनीळाः ऋतस्य सानावधि चक्रमाणा रिहन्ति मध्वो अमृतस्य वाणो३म् ।

जानन्तो रुपमकृपन्त विप्रा मृगस्य घोषं महिषस्य हि ग्मन्नृतेन यन्तो अधि सिन्धुमस्थुर्विदद्गन्धर्वो अमृतानि नामो३म् ।

अप्सरा जारमुपसिष्मियाणा योषा बिभर्ति परमे व्योमंश्चरत्प्रियस्य योनिषु प्रियः सन्त्सीदत्पत्ते हिरण्यये स वेनो३म् ।

ऊर्ध्वो गन्धर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि वसानो अत्कं सुरभिं दृशे कं स्वर्ण नाम जनत प्रियाणो३म् ।

द्रप्सः समुद्रमभि यज्जिगाति पश्यन् गृध्रस्य चक्षसा विधर्मन् भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणो३म्(३) ।

गणानां(४) त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं ज्येष्ठ-राजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनो३म् ।

देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुरुस्रा इव सूर्यो ज्योतिषामहो विश्वेषामिज्जनिता ब्रह्मणामसो३म् ।

---

(१) ऋ० ९।८३।१-२ । (२) शा०श्रौ० ५।९।२० ।

(३) ऋ० १०।१२३।१-८ । नाके सुपर्ण(६)मिति परिहाप्य ।

(४) ऋ० २।२३।१-१९ ।

आध्वर्यवपद्धतिः ।

अथ प्रतिप्रस्थाता गार्हपत्यस्य प्रत्यङ्ङुपविश्य रौहिणावधिश्रयति (१)तूष्णीं ग्रामपिष्टानाम् । आज्यधर्माः स्थानापत्तेरौषधधर्मा वा संस्कारशब्दात् । तूष्णीं पदार्थाः सर्वे ।

हौत्रपद्धतिः ।

आ विवाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि बृहस्पते भीममभित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदो३म् ।

सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवद्ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनो३म् ।

न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनोविश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पतो३म् ।

त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वतो३म् ।

उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकोबृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधो३म् ।

त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुं बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशो३म् ।

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि या नो दूरे तळितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसो३म् ।

त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहो३म् ।

अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासाहिरसि सत्य त्रृणया ब्रह्मणस्पत उग्रस्य चिद्दमिता वीळुहर्षिणो३म् ।

अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतो३म् ।

भरेषु हव्यो नमसोपसद्यो गन्ता वाजेषु सनिता धनं धनं विश्वा इदर्यो अभिदिप्स्वो मृधो बृहस्पतिर्वि ववर्हा रथाँ इवो३म् ।

तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवीर्यमाविस्तत्कृष्व यदसत्त उक्थ्यं बृहस्पते वि परिरापो अर्दयो३म् ।

---

(१) तूष्णीं मन्त्रत्रयम् । "श्रपयन्ति रौहिणा" (श० ब्रा०१४।१।२।२१) इति श्रुते रौहिणावधिश्रयतीत्युक्तं "अथातो रौहिणौ जुहोती" (श० ब्रा० १४।२।१।१) ति जुहोतिस्वादेव मन्त्राभावे सिद्धे समन्त्रककर्मान्तःपातेन समन्त्रकत्वाशङ्काव्युदासार्थं तूष्णीमिति युक्तमुक्तम् । ग्रामपिष्टानामित्युक्तत्वात्पिष्टानामेवात्रासादनग्रहणादिकर्तव्यं न व्रीहीणां यवानां वा ।

आज्यर्थंवपद्धतिः।

तद्यथा-स्फ्योपहितपाट्यामोषधकरणम्, पात्रान्तरे प्रोक्षणीरुन्नीय शूर्पाग्निहोत्रहवण्योरादानम्, वाग्यमनम्, प्रतपनम्, उदकस्पर्शः, गमनम्, विलालम्भः, ईक्षणं, अपद्रव्यनिरसनम्, अभावेऽभिमर्शनम्, उदकस्पर्शः, पिष्टालम्भनम्, चतुर्मुष्टिकद्वयस्य ग्रहणम्, शेषाभिमर्शनम् प्राङ्नीक्षणं, उत्थानम्, यमनम्, पश्चात्सादनम्, स्थापितप्रोक्षणी-

हौत्रपद्धतिः।

बृहस्पते अति यदर्यो अर्हा द्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रो३म्।

मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुरा देवानामोहत विव्रयो हृदि बृहस्पते न परः साम्नो विदो३म्।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नः साम्नः कविः स ऋणचिद्रणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरो ३ म्।

तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवो ३ म्।

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीरो ३ म् (१)।

का राधद्धोत्राश्विना वां को वां जोष उभयोः कथा विधात्यप्रचेतो३म्।

विद्वांसाविद्दुरः पृच्छेदविद्वानित्थापरो अचेताः नू चिन्नु मर्ते अक्रौ ३ म्।

ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य प्रार्चद्दयमानो युवाको ३ म्।

वि पृच्छामि पाक्यान देवान्वषट्कृतस्यादद्भुतस्य दक्षा पातं च सह्यसो युवं च रभ्यसो नो ३ म्।

प्र या घोषे भगवाणे न शोभे यया वाचा यजति पञ्चियो वां प्रैषयुर्न विद्वो ३ म्।

श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वामाक्षी शुभस्पतो दो ३ म।

युवं ह्यास्तं महो रन्युवं वा यन्निरततं सतन्तानो वसु सुगोपा स्यातं पातं नो वृकादघायो ३ म्।

मा कस्मै धातमभ्यमित्रिणेनो माकुत्रा नो गृहेभ्यो धेनवो गुः स्तनाभुजो अशिश्वो ३ म्।

(१) "बृहद्वदेम विदथे सुवीरा" इति पादेन वीरकामाय पत्न्यै यथाभिलषितं वीरं ध्यायात्।

आध्वर्यवपद्धतिः ।

ग्रहणम् , ब्रह्मणेक्षितो निःशेषेण हविः प्रोक्षणम् , पात्र्यामोप्याभिमन्त्रणम् , उपवेषादानम् , अङ्गाराणां प्राचः करणम् , अङ्गारहरणम् , क-

हौत्रपद्धतिः ।

दुहीयन्मित्रधितये युवाकु राये च नो मिमीतं वाजवत्या इषे च नो मिमीतं धेनुमत्यो ३ म्(१) ॥

आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवं दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधो ३ म् ॥

आ नूनं यातमश्विना रथेन सूर्यत्वचा भुजी हिरण्यपेशसा कवी गम्भीरचेतसो ६ म ॥

आ यातं नहुषस्पर्यन्तरिक्षात्सुवृक्तिभिः पिबाथो अश्विना मधु कण्वानां सवने सुतो ३ म्(२) ॥

(३)प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः पिबातः प्रातर्हि यज्ञमश्विना दधाते प्र शंसन्ति कवयः पूर्वभाजो३म् ।

प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टमुतान्यो अस्मद्यजते वि चावः पूर्वः पूर्वो यजमानो वनीयो३म् ।

हिरण्यत्वङ्मधुवर्णो घृतस्नुः पृक्षो वहन्ना रथो वर्तते वां मनोजवा अश्विना वातरंहा येनातियाथो दुरितानि विश्वो३म् ।

यो भूयिष्ठं नासत्याभ्यां विवेष चनिष्ठं पित्वो ररते विभागे स तोकमस्य पीपरच्छमीभिरनूध्वंभासः सदमित्तुतुर्यो३म् ।

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेमा नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानो३म्"(४) ।

प्रातर्यावाणेति पूर्वाण्हे सूक्तम् । आ भातीत्यपराह्णे नियोजयेत् ।

"आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुरर्वाञ्चा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छो३म् ।

न संस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्तिं दाशुषे शम्भविष्ठो३म् ।

उता यातं सङ्गवे प्रातरन्हो मध्यन्दिन उदिता सूर्यस्य दिवा नक्तमवसा शन्तमेन नेदानीं पीतिरश्विना ततानो३म् ।

इदं हि वां प्रदिवि स्थानमोक इमे गृहा अश्विनेदं दुरोणमा नो दिवो

---

(१) ऋ० १।१२०।१-९ (२) ऋ० ८।८।१-३ ।

(३) प्रातर्यावाणाप्रथमायजध्वमिति पञ्चर्चं सूक्तं पौर्वाह्णिकप्रवर्ग्यप्रचारेऽभिष्टुयात् ।

(४) ऋ० ५।७७।१-५ ।

आध्वर्यवपद्धतिः ।

पालेनावच्छादनम् , अशून्येऽङ्गारकरणम् , एवं द्वितीयस्य, उभयोरभ्यूहनम् , उपसर्जन्यधिश्रयणम् , हविरीक्षणम् , सपवित्रपात्र्यामावापः, उपसजनीग्रहणम् , पवित्रत्यागः, संयवनम्, विभज्यालम्भः, अधिश्रयणं, प्रथनं, अभिमर्शनम् , पात्र्यङ्गुलिप्रक्षालनम् , पर्यग्निकरणम् , श्रपणं, आलम्भनम्, अभिवासनम् , अभितप्याभ्योदकदानम् , त्यागो यष्टुः ।

ईडे द्यावापृथिवीत्युच्यमाने परिधीन्परिधाय रौहिणावुद्वास्य स्रुचोः

हौत्रपद्धतिः ।

बृहतः पर्वतादादभ्यो यातमिषमूर्जं वहन्तोऽम् ।

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेमा नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानो(१)ऽम्" ।

इत्यपराण्हे ।

तत ईळे द्यावापृथिवीत्याद्युभयत्र । सर्वमीळे द्यावीयमुत्सृज्य (मध्यमां) वाचम् ।

(२)"ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरूचं यामन्निष्टये याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतोऽम् ।

युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मन्तवे याभिर्धियेऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतोऽम् ।

युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना याभिर्धेनुमस्वं पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतोऽम् ।

याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति याभिस्त्रिमन्तुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतोऽम् ।

याभी रेभं निवृतं सितमद्भ्य उद्वन्दनमैरयतं स्वर्दृशे याभिः कण्वं प्र सिषासन्तमावतं ताभिरू षु ऊतिभिरश्विना गतोऽम् ।

याभिरन्तकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुर्याभिः कर्कन्धुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतोऽम् ।

याभिः शुचन्ति धनसां सुषंसदं तप्तं घर्ममोम्यावन्तमत्रये याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतोऽम् ।

याभिः शचीभिर्वृषणा परावृजं प्रान्धं श्रोणं चक्षस एतवे कृथो याभिर्वर्तिकां ग्रसितामुञ्चतं ताभिरू षु ऊतिभिरश्विना गतोऽम् ।

याभिः सिन्धुं मधुमन्तमसश्चतं वसिष्ठं याभिरजरावजिन्वतं याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतोऽम् ।

---

(१) ऋ० ५।७६।१–५ ।

(२) ऋ० १।११२।१—२५।

आध्वर्यवपद्धतिः।

पूर्वं विभस्मीकरणम्, स्रुचोः स्थापनम्, तयोरुपस्तारः, तत्रस्थाभिघारः, उद्वासनं, प्राणदानम्, कपालाञ्जनम्, तदुद्वासनम्। आसादयत्याहवनीयादक्षिणोत्तरौ। इति स्थातुः कर्म।

अध्वर्युः—"अप्नस्वतीमि"(ऋ० १।११२।४)त्युच्यमाने रुचितो घर्म

हौत्रपद्धतिः।

याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतं याभिर्वंशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिः सुदानू औशिजाय वाणिजे दीर्घश्रवसे मधु कोशो अक्षरत्कक्षीवन्तं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभी रसां क्षोदसोदूनः पिपिन्वथुरनश्वं याभी रथमावतं जिषे याभिश्चिशोक उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिः सूर्यं परियाथः परावति मान्धातारं क्षैत्रपत्येष्वावतं याभिर्विप्रं प्र भरद्वाजमावतं ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शंवरहत्य आवतं याभिः पूर्भिद्यो त्रसदस्युमावतं ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिर्वभ्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथो याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमिषथुर्याभिः शारीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसो याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररूणीरशिक्षतं याभिः सुदास ऊहथुः सुदेव्यं१ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिः शंतातो भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुमोम्यावतीं सुभरामृतस्तुभं ताभिरू षु ऊतिभिरश्विना गतो३म्।

याभिः कृशानुमसने दुवस्यथो जवे याभिर्यूनो अर्वतमावतं मधु प्रियं भरथो यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथो याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतेा३म्।

याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतं याभिर्ध्वसन्तिं पुरुषंतिमावतं ताभिरू षु ऊतिभिरश्विना गतेा३म्।

अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषामधूत्येऽवसे

आध्वर्यवपद्धतिः ।

इत्याहोपोत्तिष्ठन् । रुचितो घर्मः । घर्मस्य तन्वौ गाय ।

औद्गात्रपद्धतिः ।

प्रज्वलनकाले प्रसोमदेववीतय इति घर्मतन्वौ सकृद्गायेत् ।

(अनयोः प्रजापतिर्ऋषिः बृहती छन्दः घर्मो देवता परिधिपरिधाने विनियोगः ।)

हाँउ हाँउ हाँउ । प्रसोमदेवा ३ वायिता १ या २३ यि । हाँउ ३ । सिन्धुर्नपिप्ये ३ आर्णा १ सा २३ । हाँउ ३ । अंशोः पयसामदिरोना ३ जागृ १ वी २३ः । हाँउ । ३ । अच्छाकोशम्मा ३ धूइच्यू १ ता २३ म् । हो उ । २ । वा । घर्मः प्रवृक्तस्तन्वा समानृधे वृधे सुवा २।३।४।५ः ॥

औहो ३ धा ।३। ई ३ या ।३। आयिही २।३। प्रसोमदेवा २ यिता २३४ योयि । सिन्धुर्नपि । प्ये आ २ र्णा २३४ सा । अंठ० शोः पयसा-मदिरः ना जार गृ २३४ वीः । अच्छा कोशं । मधूरइच्यू २३४ ताम् । औ हो ३ वा । ३ । ईऽ ३ या ।३। आयिही २ आयिही २३ । आयि । हा । २३४ । अहो वा । घर्मः प्रवृक्तस्तत्वासमानेशमहेसुवा २३४५ः(१) ॥

प्रस्तोता घर्मतन्वौ गानानन्तरमवसरे सत्यन्यान्यपि घर्मलिङ्गानि सामानि सकृद्गायेत् । तद्यथा—

कायमान इति महावैश्वानरव्रतम् । सहोभ्राजेतीन्द्रस्य च सवस्थम् । विष्णोस्त्रीणि स्वरीयाँसि पञ्चानुगानं द्व्यनुगानञ्चाते ।

रुचितो घर्म इत्युक्ते प्रस्तोता उद्यंल्लोकानरोचय इति घर्मरोचनं सकृद्गायेत् ।

इन्द्र ऋषिः, अनुष्टुप्छन्दः घर्मो देवता ।

उद्यंल्लोकां न रोचयः । होइ । इमांलोकां न रोचयः । होई । प्रजा-भूतमरोचयः । होइ । विश्वं भूतमरोचयः । हो २ हा २३४ औहोवा । घर्मां ज्योती २३४५ः (२) ॥

हौत्रपद्धतिः ।

नि ह्वये वां वृधे च नो भवतं वाजसातौ३म्" ।

ततो रुचितो घर्म इत्युक्ते—

"अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुर्मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधौ३म्(३) ।

---

(१) छ० आ० ६, १, ३, ४=आ० गा० २, २, १५-१६ ।

(२) आ० गा० ६, २, १० । (३) ऋ० ९ । ८४ । ३ ।

आध्वर्यवपद्धतिः

परिक्रम्योपतिष्ठन्ते(१)ऽकृतं चेद्गर्भो देवानामिति।

"ॐ गर्भो देवानाम्पिता मतीनाम्पतिः प्रजानाम्।
सन्देवो देवेन सवित्रा गत सꣳ सूर्य्येण रोचते॥
समग्निरग्निना गत सन्दैवेन सवित्रा सꣳ सूर्येणारोचिष्ट।
स्वाहा समग्निस्तपसा गत सन्दैव्येन सवित्रा सꣳ सूर्य्येणारूरुचत॥
धर्ता दिवो विभाति तपसस्पृथिव्यान्धर्ता देवो देवानाममर्त्यस्तपोजाः।
वाचमस्मे नियच्छ देवायुवम्।
अपश्यङ्गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम्।
स सद्ध्रीचीः स विषूचीर्वसान आवरीवर्त्ति भुवनेष्वन्तः॥

औद्गात्रपद्धतिः।

अथोद्गातारोऽध्वर्युशाखाविहितेनानुवाकेन (शु०य०सं० ३७।१४-२०)

होत्रपद्धतिः।

द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिस्तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौ३म्।

द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिस्तन्नो मित्रो वरुणो मामहन्तामदिति सिन्धुः पृथिवी उत द्यौ३म्।

द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिस्तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौ३म्"। (एवमृच १०१)।

मदन्तीजलमुपस्पृश्योत्तिष्ठेत्।
ततो महावीरोपस्थानं(२)कुर्यात्।
"ॐ गर्भो देवानां पिता मतीनां पतिः प्रजानाम्।
सन्देवो देवेन सवित्रा गत सꣳ सूर्येण रोचते॥
समग्निरग्निना गत सन्दैवेन सवित्रा सꣳ सूर्येणारोचिष्ट।
स्वाहा समग्निस्तपसा गत सं दैव्येन सवित्रा सꣳ सूर्येणारूरुचत॥
धर्ता दिवो विभाति तपसस्पृथिव्यां धर्ता देवो देवानाममर्त्यस्तपोजाः।
वाचमस्मे नियच्छ देवायुवम्।

---

(१) "स यदैतदध्वर्युरुपोत्तिष्ठन्नाह रुचितो घर्म इति तदुपोत्थायावकाशेरुपतिष्ठन्त" इति प्रकृत्य "षडुपतिष्ठन्त" इति "गर्भो देवानामि" (श० ब्रा० १४।१।४।१-२) ति च श्रुतेः। षडुपतिष्ठन्त इत्यत्र प्रस्तोतृव्यतिरिक्ताः सयजमानाः पञ्चर्त्विजः षड्ग्रहणेन गृह्यन्ते। श्रुतौ प्रस्तोतुरदृष्टत्वात्। छन्दोगानां तत्स्थाप्युपस्थानं विहितमतः सोऽपि सप्तम उपस्थानं करोतीति देवः। आपस्तम्बः—"सर्वर्त्विजो यजमानश्चाधीयन्तो महावीरमवेक्षन्त" (१५।८।१६) इति।

(२) अत्र होतारमध्वर्यवो वाचयन्त्येतमनुवाकम्। तथा चाश्वलायनसूत्रम्—"स मुत्थाप्यैनामध्वर्यवो वाचयन्ती"(४।६)ति।

आध्वर्यवपद्धतिः ।

विश्वासाम्भुवाम्पते विश्वस्य मनसस्पते विश्वस्य व्वचसस्पते सर्वस्य व्वचसस्पते ।

देवश्रुत्वन्देव घर्म देवो देवान्पाह्यत्र प्रावीरनु वान्देववीतये ।

मधु माध्वीभ्यां मधु माधूचीभ्याम् ॥

हृदे त्वा मनसे त्वा दिवे त्वा सूर्य्याय त्वा ।

ऊर्ध्वोऽअद्ध्वरन्दिवि देवेषु धेहि ॥

पिता नोऽसि पिता नो बोधि नमस्ते अस्तु मा मा हिर्ठ॰सीः"।

(शु० य० सं० ३७ । १४–२०)

अपोर्णोति पत्नी शिरः ।

अध्वर्युः—त्वष्टृमन्त इत्येनां वाचयति(१) महावीरमीक्षमाणाम् ।

"ॐ त्वष्टृमन्तस्त्वा सपेम पुत्रान्पशून्मयि धेहि प्रजामस्मासु धेह्यरिष्टाहर्ठ॰ सह पत्या भूयासमि"ति ब्रूहि । पत्नी—

"ॐ त्वष्टृमन्तस्त्वा सपेम पुत्रान् पशून्मयि धेहि प्रजामस्मासु धेह्यरिष्टाहर्ठ॰ सह पत्या भूयासम्" । (३७ । २०)

औद्गात्रपद्धतिः ।

तिष्ठन्तो घर्ममवेक्षेरन् ।

हौत्रपद्धतिः ।

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।

स सध्रीचीः स विषूचीर्वसान आवरीवर्ति भुवनेष्वन्तः ।

विश्वासां भुवां पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते ।

देवश्रुत्त्वं देव घर्म देवो देवान्पाह्यत्र प्रावोरनु वां देववीतये ।

मधु माध्वीभ्यां मधु माधूचीभ्याम् ॥

हृदे त्वा मनसे त्वा दिवे त्वा ।

सूर्याय त्वा ऊर्ध्वो अध्वरं दिवि देवेषु धेहि ॥

पिता नोऽसि पिता नो बोधि नमस्ते अस्तु मा मा हिर्ठ० सीः"(२)॥

इत्यवकाशानुवाकः ।

पुनर्मदन्तीरुपस्पृश्योपविशति(३) ।

---

(१) "अथ पत्न्यै शिरोऽपवृत्य महावीरमीक्षमाणां वाचयति त्वष्टृमन्त" (श० ब्रा० १४ । १ । ४ । १६) इत्यादि श्रुतः । पत्न्य इति षष्ठ्यर्थे चतुर्थी ।

(२) शु० य० सं० ३७ । १४—२० ।

(३) अत्र 'उपविशति' इत्येकवचनात् ब्रह्मयजमानयोरुपस्थाननिवृत्तिरिति केचित् । "षड्रुपतिष्ठन्त" इति शतपथश्रुतेः (१४ । १ । ४ । १) षड्ग्रहणात्सयजमानाः धर्मोपयुक्ताः सर्वेत्विज उपतिष्ठन्त इति। एवं परार्थत्वाद्ब्रह्मयजमानयोरप्युपस्थानं भवतीति वृद्धसंप्रदायः।

आध्वर्यवपद्धतिः ।

अहः केतुनेति दक्षिणर्ठ० रौहिणं(१) जुहोति,

अध्वर्युः स्फ्योपग्रहेण निधनकाले—

"ॐ अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा" (३७।२१)। इदं घर्माय(२)।

मन्त्रक्रमेणोत्तरर्ठ० रात्रिरिति (३)सायम्।

"ॐ रात्रिः केतुना जुषताꣳसुज्योतिर्ज्योतिषा स्वाहा"(३७।२१)।

देवस्य त्वेति रज्जुसन्दानमादाय—

"ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्। आददेऽदित्यै रास्नासि" (३८।१)।

तूष्णीं पिन्वनं च।

स्थाता च तूष्णीं रज्जुसन्दानं पिन्वने च।

औद्गात्रपद्धतिः।

(४)पूर्वरौहिणपुरोडाशहोमकाले इन्द्रन्नर इति राजानं सकृद्गायेत्। इन्द्र ऋषिः त्रिष्टुप्छन्दः घर्मोदेवता।

हुम्।३। हो।३। हꣳ।३। ओहो।३। औहोयि।२। औहोयि। इन्द्रन्नरो। नेमधि। तोहवन्तायि।३। वयोबृहत्।३। विभ्राष्टये विधर्मणे। ३। यत्यारियाः। युनज। तायिधियस्तोः।३। सत्यमोजः।३। रजः सुवः।३। शुरानृषा। तो ३ श्रव। सश्च कामायि।३। भद्रꣳ सुधा।२। भद्रꣳ सुधे। षमूर्जम्। इषमूर्जम्।२। आगमतायि। वजेभ। जातुवन्नाः ३। बृहद्यशः।३। दिवि दधे ३ हस्।२। दिवि दधे ३। हाउ वा। वागीडासूवोबृहद्धा २३४५ः (५)॥

(१) "सर्वहुत एककपाल" (का० श्रौ० १। ९। १२) इति परिभाषोक्तेरस्यैककपालत्वात्सर्वहुतं रौहिणहवन्या स्रुचा जुहुयात्।

(२) "अहः केतुना यजुषो घर्मदेवत्ये" (का० स० सू०४ अ० ३०१ पत्रे) त्युक्त्वादिदं घर्मायेति त्यागः। 'इदमन्हे, इदं रात्र्यै' इति जीर्णसम्प्रदायः।

(३) अत्रापस्तम्बः—"यत्र क्व च विप्रक्रान्ते प्रवर्ग्ये आदित्योऽस्तमियात्कृतान्तादेव विरमेच्छ्वोभूते शेषं समापयेदि"(१५।२।१३)ति। तथा तत्रैव "यदि घर्मेण प्रचरत्स्वादित्योऽस्तमियादपरस्यां द्वारि दर्भेण हिरण्यं प्रबध्योद्वयं तमसस्परीत्युपस्थायोदुत्यं चित्रमिति द्वाभ्यां गार्हपत्ये हुत्वा प्रवृज्य श्वोभूते वयः सुपर्णा इत्यादित्यमुपतिष्ठन्ते" (१५।१७।१२) इति।

(४) मुद्रितनानाभाईकृतोद्गातृपद्धतावत्रापेक्षितं पूर्वरौहिणपुरोडाशहोमकालीयं साम उत्तररौहिणहोमकाल एव लिखितं तच्चिन्त्यम्।

(५) छ० आ० ४, १, ३, ६ = आ० गा० ४, २, १९।

आध्वर्यवपद्धतिः।

अध्वर्युः—इड एहीति गामाह्वयति नाम्ना च त्रिरुच्चैरपरेण गार्हपत्यं गच्छन्।

"ॐ इड एह्यदित एहि सरस्वत्येहि" (३८।२) (१)इत्युपांशु।

अथोच्चैः—गङ्ग एहीति त्रिः।

धेनुं गायेति प्रेष्यति। धेनुं गाथ।

अदित्यै रास्नेति गां पाशेन प्रतिमुच्य।

औद्गात्रपद्धतिः।

अध्वर्यवो गङ्ग एहीत्युक्त्वा यदा धेन्वजयोर्वत्सवर्करावुपमृजन्ति तदा स्वादिष्टयेति धेनुं सकृद्गायेत्।

प्रजापतिर्ऋषिः गायत्रीछन्दः घर्मो देवता।

हौ उ।२। हौ ऊँ। ओहौ।२। ओ होयि। इया हौ उ।२। इयाहौ ऊँ। औ होयि।२। (औ हो २। या २३४ औ हो वा। भुवत। इडा २३ हौ ऊ।२। हौऊँ ओहौ।२। ओहोयि। इ या हौ उ।२। इ या हौ उ। औ

हौत्रपद्धतिः।

(२)"उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनां श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचोऽम्।

उपह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनां श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्रवोचोऽम्।

उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनां श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्रवोचोऽम्"।

इति गव्याह्वयमानायाम्।

"हिंकृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागादूदुहामश्विभ्यां पयो अघ्न्येयं सा वर्द्धतां महते सौभगायोऽम्" (३)

इत्यायन्त्याम्।

"अभि त्वा देव सवितरीशानं वार्याणां सदावन्भागमीमहोऽम्"(४)।

इत्यभिधीयमानायाम्(५)।

---

(१) आपस्तम्बः—"त्रिरुपांशु घर्मदुघामाह्वयतोड एह्यदित एहि सरस्वत्येहीति। (१५।९।३) तथा "त्रिरुच्चैरसावेह्यसावेह्यसावेहीति (१५।९।४) ति।

(२) उपह्वय (ऋ० १। १६४। २६) इति गव्याह्वयमानायाम् (शां० श्रौ० ५। १०। १)। अध्वर्युणा गार्हपत्यमपरेण गच्छता "इड एह्यदित एहि सरस्वत्येहीति दोहनार्थं गव्याह्वयमानायां होतोपविष्ट एव "उप ह्वये"त्येतामभिष्टुयाद्भिः।

(३) ऋ० १। १६४। २७। (४) ऋ० १। २४। ३।

(५) अभिधीयमानायां = वक्ष्यमानायाम्।

आध्वर्यवपद्धतिः ।

"ॐअदित्यै रास्नासीन्द्राण्या उष्णीषः" (३८।३) ।

स्थूणायां बध्वा पूषासीति वत्समुत्सृजति ॥

"ॐपूषासि" (३८।३) ।

सन्दाय घर्माय दीष्वेति वत्समुन्नयति ।

"ॐघर्माय दीष्व" (३८।३) ।

अश्विभ्यां पिन्वस्वेति पिन्वने दोग्धि ।

"ॐअश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्येन्द्राय पिन्वस्व" (३८।४)।

स्वाहेन्द्रवदिति विप्रुषोऽभिमन्त्रयते ।

"ॐस्वाहेन्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत्" (३८। ४) ।

यस्ते स्तन इति स्तनमालभते(१) ।

औद्गात्रपद्धतिः ।

हो १ यि । २ । औ ३ हो ३ १ इ)(२) ।

स्वादिष्ठया । मादिष्ठया । (हाँ उ २ हा उ० । या २३४ औ हो वा ।) जनत् । इडा (२३। हाँउ २ हाउ०। औ हो १ यि ।३।) पवस्वसो । मा धारया । (हाँ उ २ हा उ० । या २३४ औहो वा ।) वृधत् । इडा

हौत्रपद्धतिः ।

"समी वत्सं न मातृभिः सृजता गयसाधनं देवाव्यं मदमभि द्विशवसोऽम्(३) ।

सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते देवावोमदो मतिभिः परिष्कृतोऽम्"(४)

इत्युपसृज्यमानायाम्(५) ।

"यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कोऽम्"(६) ।

इति स्तनं वत्सेऽभि पद्यमाने(७) ।

---

(१) 'अथास्यै स्तनमभिपद्यते यस्ते स्तन' (श० ब्रा० १४।२।१।१५) इति श्रुतेः ।

काण्वानां तु 'स्तनानालभत' इति पठ्यते । अतोऽत्रैकवचनं जात्यपेक्षया तेन सर्वेषामेवालम्भः ।

आपस्तम्बः—यदि घर्मधुग्दोहकाले नागच्छेदन्यां दुग्ध्वा प्रवृज्य तां सुत्यायां ब्राह्मणाय दद्याद्यमनभ्यागमिष्यन्त्स्याद्यदि धर्मदुहि (गि) पयो न स्याद्दतेश्चतुर्थं पादं स्तनं कृत्वा पिन्वयेद्यदि दधि दुहीत बार्हस्पत्यं शंसेदि(१५।१८।१-३)त्यादि ।

(२) वक्रचिह्नान्तर्गतपाठास्तु संहिताया न दृश्यन्ते ।

(३) ऋ० ९ । १०४ । २ । (४) ऋ० ९ । १०९ । २ ।

(५) उपसृज्यमानायां = सवत्सोक्रियमाणायामित्यर्थः ।

(६) ऋ० १ । १६४ । ४९ । (७) वत्से स्तनं गूहति सतीत्यर्थः ।

आध्वर्यवपद्धतिः ।

"ॐयस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसु विद्यः सुदत्रः ।
येन विश्वा पुष्यसि वार्य्याणि सरस्वति तमिह धातवेऽकः" (३८।५) । एवं (१)प्रतिप्रस्थाताजां मयूखे तूष्णीम् (२) ।

धेनुसामसमाप्तौ पयो गायेति प्रेष्यति । पयो गाय ।

औद्गात्रपद्धतिः ।

(२३। हाउ २ हाउ०। ओहो १ इ।३।) इन्द्रायेषा । तावायिसुताः । (हाउ २ हाउ० या २३४ औ हो वा।) करत् । इडा २३ । हा-उ २ हाउ०। औ हो १ यि।२। ओ हो २ । या २३४ औ हो वा । ए।३ । धेनुं(३) ॥ १२ ॥

पयसो (दोहन) राहरणकाले(४) अग्नेयुक्ष्वेति पयः संज्ञकं साम सकृदुगायेत् । प्रजापतिऋषिः गायत्रोछन्दः घर्मोदेवता ।

इयो ३ । इ या । इ यो ३ । इ या । इ यो ३ । इ या । अग्ने युक्ष्वाही

हौत्रपद्धतिः ।

"गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्कृणोन्मातवा उ सृकाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः३म्"(५) ।

इत्युन्नीयमाने(६) ।

"नमसेदुप सीदत दध्नेदपि श्रीणीतन इन्दुमिन्द्रे दधातनो३म्(७) ।

सञ्जानाना उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यन्नमस्यन् रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणो३म्"(८) ।

---

(१) केचिदनुपयोगाद्बर्करसन्दानं नेच्छन्ति तदयुक्तम् । आपस्तम्बकठसूत्रादिषु बर्करस्य साक्षात्पाठात्, एवं शब्देन कात्यायनेनापि संगृहीतत्वाच्च ।

(२) अत्र कठसूत्रे विशेषः—

स्रश्चरिष्यन्प्रवर्ग्येण पूर्वेद्युर्वत्सबर्करौ ।
अपाकुर्यात्तथा प्रातः सायं चोत्सृज्य धेनुके ।
नाशे घर्मदुहो धेन्वा व्रतधेनुं दुहेत्ततः ।
घर्मार्धं व्रतार्धं दुह्यात् द्वौ द्वौ स्तनाविह ।
घर्मव्रतदुहो नाशे आज्येन प्रचरेद्द्विधा ।
अजानाशे तु गव्येनान्यां वा धेनुमानयेत् ।
सर्वनाशे वृता दुग्धं पयो वा दधि वा नयेत् । इति ।

(३) छ० आ० ५, २, ४, २, आ० गा० ३, १, ७ ॥

(४) "पय आहरन्ति तत्पयः" (द्रा० श्रौ० २।२।३४)

(५) ऋ० १।१६४।२८ । (६) स्तनादुन्मुच्य वत्से नीयमाने ।

(७) ऋ० ९।११।६ । (८) ऋ० १।७२।५ ।

आध्वर्यवपद्धतिः ।

उत्तिष्ठ ब्रह्मणस्पत इत्युच्यमाने उपोत्तिष्ठति ।

औद्गात्रपद्धतिः ।

३ ये तवा । अग्ने युंक्ष्वा । ही ये तवा । अग्नेयुंक्ष्वाही ३ ये ३ तवा । ई यो ३ । ई या । ईयो २ ईया । ईयो ३ । ईया । अश्वासोदायि-वा ३ साधवः । अश्वासो दायि । वासाधवः । अश्वासो दायि वा ३ साधवः । ई यो ३ । ईया । इयो २ ईया । ईयो ३ । ईया । अरंवहान्ती ३ आशवः । अरं वहा । तीयाशवः । अरं वहान्ती ३ आशवः । इयो ३ । ईया । ईयो २ ईया । ईयो इया ३ उ वा ३ । आ २ । ३ । हंस् । पै ३ पया ३४५ः (१) ॥ १३ ॥

होत्रपद्धतिः ।

इत्युपसीदति ।

(२)"दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जारमिन्द्रं कोशं न पूर्णं वसुना न्यृष्टमा च्यावय मघदेयाय शूरो३म्(३) ।

दुहन्ति सप्तैकामुप द्वा पञ्च सृजत स्तोर्थसिन्धोरधि स्वरो३म्(४) ।

(५)आ दशभिर्विवस्वत इन्द्रः कोशमचुच्यवीत्खेदया त्रिवृता दिवो३म्।

(६)आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमव मेहन्ति पेरवो३म् ।

(७)समिद्धो अग्निरश्विना तप्तो वां घर्म आ गतं दुह्यन्ते गावो वृष-णेह धेनवो दस्रा मदन्ति कारवो३म् ।

समिद्धो अग्निर्वृषणा रयिर्दिवस्तप्तो घर्मो दुह्यते वामिषे मधु वयं हि वां पुरुतमासो अश्विना हवामहे सधमादेषु कारवो३म् ।

(८)तदु प्रयक्ततममस्य कर्म दस्मस्य चारुतममस्ति दंसोपन्हरे यदुपरा अपिन्वन्मध्वर्णसो नद्यश्चतस्रो३म्" ।

इति दुह्यमानायाम् ।

(९)"अधुक्षत्पिप्युषीमिषमूर्जं सप्तपदीमरिः सूर्यस्य सप्तरश्मिभो३म्(१०) ।

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे उप प्र यन्तु मरुतः सुदानव इन्द्र

---

(१) छ० आ० १, १, ३, ५, आ० गा० ३, १, ८ ॥

(२) गवि दुह्यमानायां "दोहेन गा" मित्याद्याः सप्ताभिष्टुयात् ।

(३) ऋ० १०।४२।२ । (४) ऋ० ८।७२।७ । (५) ऋ० ८।७२।८ ।

(६) ऋ० ९।७४।४ । (७) शां० श्रौ० ५।१०।८ । (८) ऋ० १।६२।६ ।

(९) गां दुग्ध्वाऽध्वर्यौ उत्तिष्ठति सति "अधुक्षदुत्तिष्ठे"त्येते द्वे अभिष्टुयात् ।

(१०) ऋ० ८।७२।१६ ।

आध्वर्यवपद्धतिः ।

उप द्रव पयसेत्युच्यमाने स यथायथेतङ्गच्छत्युर्वन्तरिक्षमिति ।
"ॐउर्वन्तरिक्षमन्वेमि" (३८।५) ।

तूष्णीं प्रतिप्रस्थाता उभावग्नीधे पयसी प्रदाय,

अध्वर्युः—

परीशासावादत्ते गायत्रञ्छन्दोऽसीति प्रतिमन्त्रम् ।
"ॐ गायत्रं छन्दोऽसि । ॐत्रैष्टुभं छन्दोऽसि" (३८।६) ।
वशिष्ठशफौ गायेति प्रेष्यति । वशिष्ठशफौ गाय ।

औद्गात्रपद्धतिः ।

आसेचनकाले आत्वाविशन्त्विति सिन्धुसाम सकृद्गायेत् । असित-ऋषिः गायत्रीछन्दः धर्मोदेवता—

ऑत्वाविशन्त्विन्दा ६ वोः । समुद्रमिवसिन्धवः । समुद्रमि । वसिन्धा २३ वोः। न त्वा मिन्द्रातिरिच्येत । न त्वा मा २३ यिन्द्रा । तिरिच्या २३ ताँ ३४३ यि । ओ २३४५ इ । डा(१) ॥ १४ ॥

(प्रस्तोता) शफाभ्यां परिग्रहणकाले प्रथश्च यस्येति वशिष्ठशफौ (२)सकृद्गायेत् । वशिष्ठऋषिः त्रिष्टुप्छन्दः धर्मोदेवता—

हा उ प्राथाः । चयस्यसप्रथः । चं ना २ । भा ३ उ वाँ ३ । ईहा । ३ । हुवायि । ओ २३४ वाँ । ई ३ २३४ डाँ । ऑनुष्टुभस्य हविषः । हवा १ यिः । या ३ उ वाँ ३ । ई हा । ३ । हुवायि । ओ २३४ वाँ । ई २३४ डाँ धातुर्द्युनानाँसवितुः । चवा २ यि । ष्णा ३ उवा ३ । ईहा । ३ । हुवायि । ओ २२४ वाँ । ई २२४ डाँ ५ । रथन्तरमाजभारा वसा २ यि । ष्ठा ३ उ वा । ३ ईडा । ३ । हुवायि । ओ २३४ वा । ई २३४ डाँ । एँ ३ । द्यूत्॥१५॥

प्राथाः । चयस्यसप्रथः । चं ना २ । मा ३१ उ वा २३ । ईडा । ३ ।

हौत्रपद्धतिः ।

प्राशूर्भवा सचोऽम्"(३) ।

इत्यु(प)त्तिष्ठति ।

(४)"उप द्रव पयसा गोधुगो षु मा धर्मे सिञ्च पय उस्रियायाः वि

---

(१) छ० आ० ३, १, १, ४—गे० गा० ५, २, २३

(२) "शफाभ्यां परिगृह्णाति वशिष्ठस्य शफौ"।(द्रा० श्रौ० २।२।३६) इति।

(३) ऋ० १।४०।१ ।

(४) अत्राध्वर्युर्येन क्रमेण गां दोग्धि तेनैव क्रमेण प्रतिप्रस्थाताऽजां मयूखे बध्वा तूष्णीं दोग्धि । तत एकं गव्यमेकमाजमेवं द्वे पयसी, तयोर्द्वयोः पयसोरध्वर्युप्रतिप्रस्थातृभ्यां शालायामानीयमानयो "रुप द्रव पयसे"त्यादिकां कल्पजामभिष्टयात् ।

आध्वर्यवपद्धतिः ।

ताभ्यां महावीरं परिगृह्णाति द्यावापृथिवीभ्यान्त्वा परिगृह्णामीति । "ॐद्यावापृथिवीभ्यां त्वा परिगृह्णामि" (३८।६) ।

औद्गात्रपद्धतिः ।

हो यि। हो। वोहा ३१ उ वा २३ । ई २३४ हो। आनुष्टुभस्य हविषः । हं वा २ यिः । या ३१ उ वा २३ । ईडो। ३ । हो यि । हो । वोहा ३१ उ वा २३ । ई २३४ हो । धोतुर्द्युतानात्सवितुः । चं वा २ यि । ष्णा ३१ उवा २३ । ईडो । ३ । हो यि । हो । वो हा ३१ उवा २३ । ई २३४ हो । रथन्तरमाजभारो । वसा २ इ । छा ३१ उवा २३ । ईडो । ३ । होई । ० । ई २३४ हा । ३ ए ३ । द्युता २३४५ः(१) ॥ १६ ॥

(प्रस्तोता) अध्वर्युभिर्महावीरे (हि) हीयमाणे इन्द्रेन्नर इति व्रतपक्षौ (२)सकृद्गायेत् । प्रजापतिऋषिः त्रिष्टुप् छन्दः घर्मोदेवता ।

हो उ ३ । हं ँ ह ँ ह ँ ह ँ हं ँ । ३ । होउ । ३ । इन्द्रेन्नरो । ने ३ मधि । ताहवन्तोयि । यत्पारियाः । युनजं । तोयिधियस्तोः । शेरोनृषा । तो ३ श्रवसश्चकामायि । आगोमतायि । व्रजेभं । जातुवेन्नोः । होउ । ३ ।

हं ँ ह ँ हँ हं ँ । ३ । होउ २ होउ । वा ३ । ई २३४५ ॥ १७ ॥

हौत्रपद्धतिः ।

नाकमख्यत्सविता दमूना अनु द्यावापृथिवी सुप्रणीतेा३म्"(३) ।

इत्याहियमाणयोः पयसोः ।

(४)"आ सुते सिञ्चत श्रियमा नूनमश्विनोर्ऋषि"रित्यासिच्यमानयोः । "उदु ष्य देवः सविता हिरण्यये"त्युद्यम्यमाने । अत्र कात्यायनानां खरादुद्यम्यासेचनं विहित (का० श्रौ० २६।६।१५-१६) मस्ति कर्मविपर्यासे

---

(१) आ० आ० १, १, २, ९ = आ० गा० ३, २, ९—६ ॥

(२) "हियमाणे व्रतपक्षौ" (द्रा० श्रौ० २।२।३७)

(३) शां० श्रौ० ५।१०।१० ।

(४) अच केषाञ्चिदध्वर्यूणां शालायां पयसो आनीय खरस्य एव महावीरे आसेकक्रियास्ति । तत्रासिच्यमानयोः पयसोर्यथासङ्ख्यं "मासुते सिञ्चत श्रिय" मित्येकस्मिं "ना नूनमश्विनोर्ऋषि" रित्यपरस्मिन्नेवं द्वे अभिष्टुयात् ।

केषाञ्चिदध्वर्यूणामाजं प्रथमं केषाञ्चिद्गव्यं प्रथमम् । तत्राश्वलायनसूत्रे विशेषव्यवस्था-"आसिच्यमान आ नूनमश्विनोर्ऋषिरिति गव्य, आ सुते सिञ्चत श्रियमित्याजे" (आ०श्रौ० १७० पृ० १ पं०) इत्यस्ति तथापि शाङ्खायनानां (९।१०।११) सूत्रक्रमेणैव भवति। भाष्यकारैरपि तथैव व्याख्यातम् ।

आध्वर्यवपद्धतिः ।

उद्यम्य मुञ्चवेदेनोपमृज्योपयमन्योपगृह्णात्यन्तरिक्षेणोपयच्छामीति ।

"ॐअन्तरिक्षेणोपयच्छामि" (३८।६) ।

अजापयसाऽवसिच्य शान्ते गोः पयोऽवनयतीन्द्राश्विनेति ।

"ॐइन्द्राश्विना मधुनः सारघस्य घर्मꣳपात व्वसवो यजत व्वाट्" ।

स्वाहा सूर्य्यस्य रश्मये वृष्टिवनये" (३८।६) ।

"प्रेतु ब्रह्मणस्पतिरित्युच्यमाने समुद्राय त्वेति वातनामानि (१)जपति गच्छन्नाहवनीयम् ।

"ॐसमुद्राय त्वा व्वाताय स्वाहा ।

सरिराय त्वा व्वाताय स्वाहा ।

अनाधृष्याय त्वा वाताय स्वाहा ।

प्रतिधृष्याय त्वा वाताय स्वाहा ।

अवस्यवे त्वा व्वाताय स्वाहा ।

अशिमिदाय त्वा व्वाताय स्वाहा ।

इन्द्राय त्वा वसुमते रुद्रवते स्वाहा ।

इन्द्राय त्वाऽऽदित्यवते स्वाहा ।

औद्गात्रपद्धतिः ।

हॅाउ ३ । इॅहा । ह ꣳ ह ꣳ हॅ ꣳ । ३ । हॅाउ ३ । इॅन्द्रॅन्नरो (पूर्ववत्)

हॅा उ । ३ । इॅहा । ह ꣳ ह ꣳ हॅ ꣳ । ३ । हॅा उ २ हा उ । वा ३ ।

हौत्रपद्धतिः ।

यथा कर्मे(२)ति (शां० श्रौ० ५।१०।१३) स्वसूत्रात् ।

"उदु ष्य देवः सविता हिरण्यया बाहू अयंस्त सवनाय सुक्रतुर्घृतेन पाणी अभि प्रुष्णुते मखो युवा सुदक्षो रजसो विधर्मणे३म्"(३) ।

इत्युद्यम्यमाने ।

"आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियं रसा दधीत वृषभो३म्(४)

आ नूनमश्विनोर्ऋषिः स्तोमं चिकेत वामया आ सोमं मधुमत्तमं घर्मं सिञ्चादथर्वणो३म्"(५) ।

इत्यासिच्यमानयोः ।

---

(१) अत्र संहितास्वरेण जपः ।

(२) आसेकोद्यमकर्मणोर्विपर्यासे 'यथाकर्म'(शां० श्रौ० ५।१०।१३)ति सूत्रात् प्रथम "मुदुष्य देवः सविते"त्येतामभिष्टु"त्यासु ते सिञ्चतश्रियमाननूनमश्विनोऋषि"रित्येते अभिष्टुयात् । (३) ऋ० ६।७१।१ । (४) ऋ० ८।७२।१३।

(५) ऋ० ८।९।७ ।

आध्वर्यवपद्धतिः ।

इन्द्रायत्वाभिमातिघ्ने स्वाहा ।
सवित्रे त्वा ऋभुमते विभुमते वाजवते स्वाहा ।
बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ।
ऽमाय त्वाङ्गिरस्वते पितृमते स्वाहा" । (३८।७-९) ।
स्वाहा घर्मायेत्युपयमन्यासिञ्चति घर्मं ।
"ॐस्वाहा घर्माय" ।
स्वाहा घर्मः पित्रे इति जपित्वा ।
"ॐस्वाहा घर्मः पित्रे" । (३८।९)
अतिक्रम्याश्राव्याह घर्मस्य यजेति ।
ओ३श्रा३वय ।
अग्नीत्—अस्तु श्रौ ३षट् ।
अध्वर्युः—घर्मस्य यज ।

औद्गात्रपद्धतिः ।

ई २३४५(१) ॥ १८ ॥
घर्मे हुते इमाउवामित्यश्विनोर्व्रते (२)सकृद्गायेत् । अश्विनावृषी

हौत्रपद्धतिः ।

"प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नो३म्"(३) ।
इति प्रव्रजेत्सु ।
"नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्यो३म्"(४) ।
इत्यनुसंयन् ।
ततो होतृषदन उपविश्य घर्मस्य यजेत्युक्ते ।
भूर्भुवर्यं ४ यजामहे ।
(५)"उभा पिबतमश्विनोभा नः शर्म यच्छतमविद्रियाभिरूतिभि(६)

---

(१) १७, १८—छ० आ० ४, १, ३, ६—आ० गा० २।२।९—६ ॥
(२) "हुतेऽश्विनोर्व्रतेऽहोरात्रयोर्वा" (द्रा० श्रौ० २।२।३८)
(३) ऋ० १।४०।३ । (४) ऋ० १०।१२३।६ ।
(५) अत्रो "परिष्टाच्च ये यजामहाद्देवतादेशनं सपुरोऽनुवाक्ये" (शा० श्रौ० १।२।१९) इति परिभाषितत्वात्पुरोऽनुवाक्याया अभावाद्देवतादेशनं न भवति ।
उभापिबतमश्विना (ऋ० १।४७।१५) गायत्री, तप्तो वां घर्म इत्यादि ऋलपजा (शा० श्रौ० ५।१०।१८) त्रिष्टुप्, आभ्यामेकीकृत्य मध्येऽनवस्यन् वषट्कुर्यात् । "द्वाभ्यां यजेत् त्रिष्टुब्वतीभ्यां पूर्वार्द्ध" इति (कौ० ब्रा० ८।७) श्रुतेः ।
(६) ऋ० १।४६।१५ ।

आध्वर्यवपद्धतिः ।

वषट्कृते जुहोति विश्वा आशा इति ।

"ॐविश्वा आशा दक्षिणसद्विश्वान्देवानयाडिह ।

स्वाहाकृतस्यांघर्मस्य मधोः पिवत मश्विना" (३८।१०) ।

स्वाहाकारे (१)होमः । इदमश्विभ्याम ।

दिविधा इति त्रिरुत्कंपयति ।

"ॐ दिवि धा इमं यज्ञमिमं यज्ञन्दिवि(२)धाः" (३८।११) ।

स्वाहाऽग्नय इत्यनुवषट्कृते सशेषम् ।

'ॐस्वाहाऽग्नये यज्ञियाय शं यजुभ्यः(३) (३८।११)

इदमग्नये स्विष्टकृते न मम । उदकोपस्पर्शः ।

औद्गात्रपद्धतिः ।

बृहतीछन्दः घर्मोदेवता ।

हो इहा । ३ । इ हो इ हा ३ । ३ । इमा उवां दिविष्टया ओ हा उ । उस्रो-हवन्ते अश्विना ओ हा उ । अयं वामह्वेवसे शचीवसू ओ हा उ । विशं

हौत्रपद्धतिः ।

स्तमो वां घर्मो न क्षति स्वहोता प्र वामध्वर्युश्चरति प्रयस्वान्मधो-र्दुग्धस्याश्विना तनाया वीतं पातं पयस उस्रिया(४)या ४ वौ ४ षट् । ओजः सहः सह ओजः स्वः ।

ततो भूर्भुवः घर्मस्याग्ने वीही ४ वौ ४ षट् ।

ओजः सहः सह ओजः स्वः ।

इति पूर्वाह्णे याज्या ।

अथापराह्णे—

भूर्भुवर्यें ४ यजामहे (५)ऽस्य पिवतमश्विना युवं मदस्य चारुणो-मध्वोरातस्य धिष्ण्यायदुस्रिया स्वाहुतं घृतं पयोऽयं सु वामश्विना भाग आ गतम्माध्वी धर्तारा विदथस्य सत्पती तप्तं घर्मं पिवतं रोचने दि(६)वा ४ वौ ४ षट् ।

---

(१) मन्त्रात एव होमः न त्वन्तरा स्वाहाकारान्ते । अवरꣳस्वाहा करोति परां देवतामिति (श० ब्रा० १४।२।२।१६) मन्त्रस्वरूपानुवादमात्रं न त्वन्तरा होमविधि-परमिति देवयाज्ञिकाः ।

(२) उत्क्रम्पनमत्र सकृन्मन्त्रेण द्विस्तूष्णीं "एकद्रव्ये कर्मावृत्तौ सकृन्मन्त्रवचन" (का० श्रौ० १।७।८) मिति परिभाषायामुक्तत्वात् ।

(३) 'तत एव होम' (का० श्रौ० ३।३।२६) इत्युक्तेरुत्तरार्द्धं होमः ।

(४) शां० श्रौ० ५।१०।१८ ।

(५) ऋ० ८।५।१४ । (६) शां० श्रौ० ५।१०।२१ ।

आध्वर्यवपद्धतिः ।

अश्विना घर्ममिति ब्रह्माऽ(१)नुमन्त्रयते ।

"ॐअश्विना घर्मम्पातꣳ० हार्द्धानमहर्दिवाभिरूतिभिः ।

तन्त्रायिणे नमो द्यावापृथिवीभ्याम्" (३८।१२) ।

अपातामिति यजमानः ।

"ॐअपातामश्विना घर्ममनु द्यावापृथिवी अमर्त्ं० साताम् ।

इहैव रातयः सन्तु" (३८।१३) ।

ॐ इषे पिन्वस्वेति पिन्वमानमनुमन्त्रयते

अध्वर्युः—

"इषे पिन्वस्वोर्जे पिन्वस्व ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व" (३८।१४) ।

औद्गात्रपद्धतिः ।

विशꣳ हि गच्छथा ओ३ हो३ उ३ । हो३ इहा ३ । ई३हो३ इहा २ । ई३हो३ इहा ३४ औ३ हो३ वा । ई३ऽ५ हो३ ही३ ही३ १ हो३ हो३ ॥ १९ ॥

हो३ इ३ हा । इ३ हो३ इ३ हा । ३ । इमाउवां दिविष्टया हो३ हा उ । उस्राह-वन्ते । अश्विनाहो३ हाउ । अयं वामह्वसे शची वसू हो३ हाउ । विशंवि-शꣳ हि गच्छथा हो३हा उ । हो३ इ३ हा३ ई३ हो३ इहा३ । २। हो३ इ३ हा३ । इ३ हो३ इ३ हा३ ३४ औ३ हो३ वा ॥ ई २ । ३ । (२) ॥ २० ॥

हौत्रपद्धतिः ।

ओजः सहः सह ओजः स्वः ।

भूर्भुवः घर्मस्याग्ने वीहि ४ वौ ४ षट् ।

ओजः सहः सह ओजः स्वः ।

इत्यपराह्णे याज्या ।

ततः "स्वाहाकृतः शुचिर्देवेषु घर्मो यो अश्विनोश्चमसो देवपानस्तमीं विश्वे अमृतासो जुषाणा गन्धर्वस्य प्रत्यास्ना रिहन्तो३म्"(३) ।

इत्यभिष्टुत्य ।

---

(१) "अथ ब्रह्मानुमन्त्रयते ब्रह्मा वा ऋत्विजां भिषक्तम" (श० ब्रा० १४।२।२।१९ इति श्रुतेर्ब्रह्मानुमन्त्रयते । हुतं द्रव्यमिति कर्कः । पात्रस्थमित्यन्ये। उभयमेतत्समूलं शाखान्तरात् । "विश्वा आशा इति ब्रह्मा हुतमनुमन्त्रयत" इति काठके । "घर्मेम्पातमश्विनेत्यनुवाकशेषेणोपस्थायोपर्याहवनीये धार्यमाणमि"त्यापस्तम्बसूत्रे (१९।१०।१२) । अतश्चेच्छयाऽनुष्ठानम् ।

(२) १९-२० छ० आ० ४, १, २, २, आ० गा० ४, १, १९-१६ ।

(३) शां० श्रौ० ५।१०।२३ ।

आध्वर्यवपद्धतिः ।

धर्मासीत्युत्क्रामत्युत्तरपूर्वार्धम् ।

"ॐधर्मासि सुधर्मा" (३८।१४) ।

अमेन्यस्म इति खरे करोति ।

"ॐअमेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्रं धारय विशन्धारय" (३८।१४) ।

उपविश्य विकङ्कतशकलैर्जुहोति घर्मे न्यञ्च न्यञ्च स्वाहा पूष्णे शरस इति प्रतिमन्त्रम् ।

"ॐस्वाहा पूष्णे शरसे" (३८।१५) ।

इदं पूष्णे शरसे न मम । हुत्वा हुत्वा प्रथमपरिधा उपश्रयति ।

"ॐस्वाहा ग्रावभ्यः" (३८।१५) ।

इदं ग्रावभ्यो न मम ।

"ॐस्वाहा प्रतिरवेभ्यः" (३८।१५) ।

इदं प्रतिरवेभ्यः । चतुर्थमहुतमुदङ्ङीक्षमाणो दक्षिणतो बर्हिष्युपगूहति । उभयोरपसव्यम् ।

"ॐस्वाहा पितृभ्यऽ ऊर्ध्वबर्हिभ्यो घर्मपावभ्यः स्वाहा" (३८।१५) इदं पितृभ्य ऊर्ध्वबर्हिभ्यो घर्मपावभ्यो न मम(१) । उभयोः

हौत्रपद्धतिः ।

(२)"सखे सखायमभ्या ववृत्स्वाशुं न चक्रं रथ्येव रंह्यास्मभ्यं दस्म रंह्याग्ने मृळीकं वरुणे सचा विदो मरुत्सु विश्वभानुषु तोकाय तुजे शुशुचान शं कृध्यस्मभ्यं दस्म शं कृधो३म्"(३) ।

इत्यायति ।

(४)"गन्धर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतो गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशतो३म्"(५) ।

इति साद्यमाने ।

---

(१) अत्र त्यागोऽपि यजमानेनापसव्येन कार्यः । होमाभावेऽपि "त्रया वै पितरस्तानेवैतत्प्रीणाती" (श० ब्रा० १४।२।२।३९) त्यवगूहने च पितॄणां प्रीणनश्रवणात् । "स्वाहापितृभ्य ऊर्ध्वबर्हिभ्यो घर्मपावभ्य इति । अहुत्वैवोदङ्ङीक्षमाणो दक्षिणाद्ध उपगूहति" (श० ब्रा० १४।२।२।३९) इति श्रुतेः ।

(२) अध्वर्या उत्तरपूर्वार्द्धे आगच्छति सति सखे सखायमित्येतामभिष्टुयात् ।

(३) ऋ० ४।१।३ ।

(४) अध्वर्युणाहवनीयादुत्तरतः खरे महावीरपात्रे साद्यमाने 'गन्धर्व' इत्येतामभिष्टुयात् । (५) ऋ० ९।८३।४ ।

आध्वर्यवपद्धतिः।

सव्यम्, उदकोपस्पर्शश्च।

"ॐ स्वाहा द्यावापृथिवीभ्याम्" (३८।१५)।

इदं द्यावापृथिवीभ्याम्०।

"ॐस्वाहा विश्वेभ्यो देवेभ्यः" (३८।१५)।

इदं विश्वेभ्यो देवेभ्यो न मम।

सप्तमं च सर्वलेपाङ्कं(१) दक्षिणेक्षमाणः प्रतिप्रस्थात्रे प्रयच्छति।

"ॐस्वाहा रुद्राय रुद्रहूतये" (३८।१६)।

इदं रुद्राय रुद्रहूतये०। उभयोरुदकस्पर्शः(२)।

तर्ह० स उत्तरत शालाया उदञ्चं निरस्यति तूष्णीम्।

स्वाहा सञ्ज्योतिषेत्युपयमन्यामासिञ्चति घर्म्यम्।

"ॐस्वाहा सञ्ज्योतिषा ज्योतिः (३)गच्छताम्" (३८।१६)।

निधनकाल उत्तरर्ह० रौहिणं जुहोति।

औद्गात्रपद्धतिः।

(प्रस्तोता) द्वितीयरौहिणपुरोडाशहोमकाले इन्द्रन्नर इति रौहिणं साम सकृद् गायेत्। इन्द्रऋषिस्त्रिष्टुप्छन्दः घर्मोदेवता,

हौत्रपद्धतिः।

(४) "तं घेमित्था नमस्विन उप स्वराजमासतेऽर्थं चिदस्य सुधितं यदेतव आवर्तयन्ति दावनो३म्" (५)।

इति प्रागाथिकामावत्स्यति।

(६) "हविर्हविष्मो महि सन्न दैव्यं नभो वसानः परि यास्यध्वरं राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो वृहो३म्(७)"।

---

(१) अत्र सर्वस्याज्ञनवचनात्पूर्वेषां शकलानामग्रमात्रस्याज्ञनम्।

(२) रौद्रत्वात् "रौद्रर्ह० राक्षसमासुरमाभिचरणिकं मन्त्रमुक्त्वा पित्र्यमात्मानंचालभ्योपस्पृशेदप" (का० श्रौ० १।१०।१४) इति परिभाषोक्तेः सप्तमसमर्पणानन्तरमुदकस्पर्शनम्। (३) अत्र गच्छतामित्यस्याध्याहारः।

"अथ महावीरादुपयमन्यां प्रत्यानयति स्वाहा सं ज्योतिषा ज्योतिरि"ति (श० ब्रा० १४।२।२।४०) श्रुतेः। पूर्वं "मथोपयमन्या महावीर आनयती" (श० ब्रा० १४।२।२।१३) त्युक्तम्। अधुना महावीरादुपयमन्यां प्रत्यानयति पश्चात्प्रक्षिपतीत्यर्थः।

(४) अध्वर्यावावत्स्यति = उपयमन्यां घमद्रव्यासेचनार्थं महावीरपात्रं न्युब्जीकुर्वति सति 'तं घेमित्थे'ति प्रागाथिकां = प्रगाथर्षिदृष्टामष्टममण्डलभ शमभिष्टुयात्।

केषांचिदध्वर्यूणां होमानन्तरमेव न्युब्जीकरणमस्ति तत्र 'तं घेमित्था' 'सखे सखायं' 'गन्धवं इत्थे' ति क्रमः। (५) ऋ० ८।७०।१७।

(६) अत्राध्वर्यूणामुपयमनीस्थघर्मस्याग्निहोत्रावृता होमो भवति तद्धोमात्पूर्वं 'हविर्हविष्म' इत्येतामभिष्टुयात्। (७) ऋ० ९।८३।५।

आध्वर्यवपद्धतिः ।

"ॐ अहः केतुना जुषताꣳसुज्योतिर्ज्योतिषा स्वाहा" (३८।१६) । इदं घर्माय ।

उपश्रितानि(१) च प्रहरति ।

"(२)अग्निहोत्रावृता हुत्वा वाजिनवद्धक्षयन्ति । अपरेणाहवनीयं

औद्गात्रपद्धतिः ।

हाँउ । ३ । आँयिहीं । ३ । आँयिहियाँ । ३ । आँसाँउ । ३ । आँयाँम् । ३ । नाँमाः । ३ । किँट् । २ । इन्द्रन्नरोनेँ मधिताँहवा २ न्ताँयि। यत्याँर्या युनजतेँधिया २ स्ताः । शूरोनृषाताँश्रवसश्चका २ माँपि । आँगोमतिव्रजेँ-भजाँतु वा २ श्वाः । मना २३ होइ । प्राणा २३ होइ । चक्षू २३ होँयि । श्रोत्रा २३ ँहोँयि घोषा २३ होँयि । व्रता २३ ँहोँयि । भूता २३ ँहोँ-यि । पाँना २३ ँहोँयि । चित्ता २३ ँहोँयि । धीता २३ ँहोँयि । सुवा

हौत्रपद्धतिः ।

इति पुरा होमात् ।

---

(१) उपश्रितप्रहरणं शाखान्तरात् ।

(२) अत्र होममात्रमग्निहोत्रवत्कार्यम् । न तु सञ्चराचमनादिका सर्वेतिकर्तव्यता । यदि तथाभिमतमभविष्यत्तदाग्निहोत्रं हुत्वेत्येवमेवावक्ष्यत् । आधानकौण्डपायिनामयन-वत् (का०श्रौ०२४।४।२४)।अत्र त्वग्निहोत्रावृतोपयमनीस्थं द्रव्यं हुत्वेत्येतावदेवोक्तं,अतस्त द्रव्यस्य समिदाधानपूर्वक आहुतिद्वयहोमः न प्राचीनोदीचीनान्यङ्गानि ।

अत्रापस्तम्बः—"अपीपरोमाह्नो रात्रिये मा पाहि । अपीपरो मा रात्रिया अन्हो मा पाहीं"(१५।१२।७) ति मन्त्राभ्यां सायं प्रातः समिधमादधाति । "अग्निर्ज्योति-र्ज्योतिरग्निः स्वाहेति सायमग्निहोत्रं जुहोति । सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः। संसृष्टहोमं वा" (आ०श्रौ० १५।१२।८-९) इति । एवमेव कठसूत्रेऽपि ।

अतोऽत्रापि प्रातः "सूर्यो ज्योतिषं त्वे" (का० श्रौ० ४।१४।१३) ति मन्त्रेण समिदा-धानं "सूर्योज्योतिरि" (शु० य० ३।८) ति मन्त्रेण होमः । "सजूरि" (शु० य० सं ३।९)ति वा । सायं घर्मे चाग्निर्ज्योतिष" (का०श्रौ० ४।१४।१३) मिति समिदाधानं "अग्नि-र्ज्योति" (य० सं० ३।९) रिति "सूजू (३।९) रि"ति वा पूर्वाहुतिहोमः । एवं समन्त्रक मेवाग्निहोत्रवद्धोमं कुर्यात् न त्वमन्त्रकम्। आवृच्छब्दस्येतिकर्तव्यतावाचित्वात् ।न ह्या-वृच्छब्दः क्वचिदपि मन्त्ररहितां क्रियामभिधत्ते । तथासति "सर्वꣳ सुज्योषां करोत्येतयैवा-वृता नुपहरन्यजुस्तूष्णीमेव" इत्यत्रानुपहरन्यजुरित्याद्यवक्तव्यं स्यात् । आवृतेत्य नेनैवार्थस्य सिद्धत्वात् उक्तं च,अत आवृच्छब्दो मन्त्रनिवृत्तिपरो न भवतीति गम्यते। अत एवापस्तम्बसूत्रे (१५।१२।७-९) समन्त्रकमेवाग्निहोत्रमुपदिष्टम्। अमन्त्रकपक्षेऽपि प्रातरिदं सूर्यायेति त्यागः । सायं घर्मे चेदमग्नय इति । आपस्तम्बसूत्रे तथा दर्शनात् । "पूर्वेवयो-निः पूर्वावृत्पुनराधानकर्मणि" "पिण्डपितृयज्ञावृता देयं" "मृताहिताग्न्यावृच्च सोपकरण-माहिताग्न्यावृता दग्ध्वा तामेतैरेव यजुर्भिरेतया वृता चिनोति तस्यैषैव सामान्यावृदि"

आध्वर्यवपद्धतिः ।

मौञ्जं कूर्चं निदधाति । औदुम्बरीꣳसमिधमादधाति ।

"ॐ सूर्यज्योतिषं त्वा वायुमतीं प्राणवतीꣳस्वर्ग्याꣳस्वर्गायोपदधामि भास्वतीम्" (काश्रौ० ४।१४।१३) ।

प्रदीप्तायां सजूरिति वा जुहोति ।

"ॐ सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या । जुषाणः सूर्यो वेतु स्वाहा" (शु० य० सं० ३।१०)

इदं सूर्याय न मम । कूर्चं निधाय गार्हपत्यमनवेक्ष्यैव तूष्णीं भूयसीमुत्तराम् ।

इदं प्रजापतये न मम । भूयिष्ठं स्रुचि सिक्त्वा(१) वाजिनवद्भक्षयन्ति मधुहुतमिति होत्रध्वर्युब्रह्मप्रस्तोतृप्रतिप्रस्थात्रग्नीध्यजमाना भक्षण-

औद्गात्रपद्धतिः ।

२३ ह्वोयि । ज्योता २३ यिर्हो २ वा २३४ और ह्वो वा । ऊ ३३३३ २३४५(२) ॥२२॥

हौत्रपद्धतिः ।

ततो हुतशेषस्य भक्षणम्, प्राणभक्षो होतुः, प्रत्यक्षो यजमानस्य, ततो होता अध्वर्य उपह्वयस्व ब्रह्मन्नुपह्वयस्व प्रस्तोरुपह्वयस्व । प्रतिप्रस्थातरुपह्वयस्व । अग्नीदुपह्वयस्व । (यजमानोपह्वयस्व ।) एवं(३) तं तं

त्यादौ सवत्र समन्त्रकेऽप्यावृच्छब्दप्रयोगदर्शनाच्च समन्त्रकमेवाग्निहोत्रं होतव्यमित्याभातीति देवयाज्ञिकाः ।

आवृच्छब्दो मन्त्ररहितक्रियामात्रपर इति कर्काचार्याः (का० श्रौ२।२।४) ।

वाजिनवदित्युपहवपूर्वकं भक्षयितारः । तत्क्रमेऽपि वाजिनवदेव। तेन होत्रध्वर्युब्रह्मप्रस्तोतृप्रतिप्रस्थात्रग्नीध्यजमानानामनेनैव क्रमेण सोपहवं भक्षणम्। उभयतो वा यजमानो भक्षयति प्रथम उत्तमश्चेति । अस्मिन्पक्षे आदावन्ते च उपहवप्रार्थनम् "अथ यजमानाय घर्मोच्छिष्टं प्रयच्छति स उपहवमिच्छा भक्षयति सुहुत (श० ब्रा० १४।२।२।४२) मि"त्यादि श्रुतेः । अस्यां श्रुतौ केवलस्य यजमानस्यैव भक्षणमुक्तं ऋत्विजां शाखान्तरात् । अत्र छन्दोगसूत्रे विशेषः—सत्रं चेत्स्याद्यजमाना उपह्वयध्वमित्येवोपह्वानमिति । एवकारः सर्वेषूपह्वानेष्वेवमेव प्राप्तार्थ इति तद्भाष्ये ।

(१) न द्विःप्रक्रम्पना (का० श्रौ० ४।४।१९) दि हुत्वेत्यनेन होममात्रस्योक्तत्वात् ।

(२) २२ छ० आ० ४, १, ३, ६, आ० गा० ४, २, २० ॥

(३) यजमानोऽपि होतारं ब्रह्माणं प्रस्तोतारमध्वर्युं प्रतिप्रस्थातारमाग्नीध्रं च 'होतरुपह्वयस्व' इत्येवमादिना तं तं पृष्ट्वा 'हुतं हविः' (शां०श्रौ० ५।१० ३१) रिति मन्त्रेण भक्षयेत् ।

अत्र कात्यायनेन (श्रौ० २६।७।१९) सर्वेषां भक्ष उक्तः । शाङ्खायनानां (शां० श्रौ० ५।१०।२८-२९) तु होतृयजमानयोरेव भवति ।

आध्वर्यवपद्धतिः ।

क्रमेण समुपहूय स्वस्वमन्त्रेण ।

"ॐ मधु हुतमिन्द्रतमे अग्नावश्याम ते देव घर्म नमस्ते अस्तु मा मा हिर्ठ०सीः" । (३८।१६) ।

उच्छिष्टखरे(१) प्रक्षाल्योपयमनीं निदधाति ।

(२)अत्र वोपश्रितप्रहरणम् । सर्ठ० साद्यमानायानुवाचयति ।

सर्ठ० साद्यमानायानुब्रूहि ।

सर्ठ० साद्यमानेभ्य इत्येके 'सूयवसाद्भगवती'(शां०श्रौ०५।१०।३३) त्युच्यमाने यवसोदके धेनवे प्रयच्छन्त्येके ।

सर्वमासन्द्यां करोत्यतः प्राक् । पूर्ववच्छान्तिपाठः सर्वेषाम् । ऋचं वाचं० शरदः शतात् ॐ शान्तिः ३ ।

सर्वमासन्द्यां करोति । अभीममिति महावीरम् ।

"ॐ अभीमम्महिमा दिवं विप्रो बभूव सप्रथाः ।

उत श्रवसा पृथिवीꣳसर्ठ० सीदस्व महाँ असि रोचस्व देववीतमः ।

औद्गात्रपद्धतिः ।

यदाध्वर्यवो घर्मपात्राणि संघ्राडासन्द्याꣳसमारोपयन्ति तदा इत एत इत्यारूढवदाङ्गिरसन्त्रिर्गायेत् । अङ्गिरा ऋषिः अनुष्टुप्छन्दः घर्मो देवता—

हौत्रपद्धतिः ।

पृष्ट्वा तैः प्रत्येक 'मुपहूत' इति प्रत्युक्ते ।

"ॐ हुतं हविर्मधु हविरिन्द्रतमेऽग्नावश्याम ते देव घर्म मधुमतो वाजवतः पितुमतः(३)" इति भक्षमन्त्रः ।

ततः सर्ठ०साद्यमानायानुब्रूहीत्युक्ते महावीरपात्रेषु (सं साद्यमानेषु)

"आ यस्मिन्सप्त वासवा रोहन्ति पूर्व्या रुह ऋषिर्हि दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथो३म्"(४) ।

इत्यभिष्टुत्य

"सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्यामाद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्तो३म्(५) ।

---

(१) केचिद् घर्मर्त्विजः सयजमाना अत्र पवित्रैर्मार्जयन्त इत्याहुः । तथा चाथर्वणे पठ्यते "उच्छिष्टखरे पवित्रैर्मार्जयन्त" इति । अथवा आथर्वणेऽप्युपयमनीप्रक्षालनमेवैतत् । शतपथे—"य एव मार्जालीये बन्धुः सोऽत्रे" (१४।२।२।४३) ति वाक्यशेषात् मार्जालीये प्रक्षालनं पात्राणामेवास्ति नर्त्विजामत उपयमनीप्रक्षालनमेव युक्तम् ।

(२) स्वशाखायामत्रैव श्रुतत्वात् "अनुप्रहरति शाकलानथोपसदा चरन्ती" (श० ब्रा० १४।२।२।४३) ति श्रुतेः । (३) शां० श्रौ० ५।१०।३१ ।

(४) शां० श्रौ० ५।१०।३२ । (५) ऋ० १।१६४।४० ।

आध्वर्यवपद्धतिः ।

वि धूममग्ने अरुषमियेध्य सृज प्रशस्तदर्शतम् (३८।१७) ।

अत्र वा शान्तिपाठः । ततो द्वारोद्घाटनम् । सकृदासादनप्रोक्षणे, खरस्थूणामयूखकृष्णाजिनाभ्युपशयासन्दीनामावृत्तिर्वा प्रधानकालत्वात् । इति पूर्वाह्णप्रवर्ग्यः ।

(उपसदिष्टिः)

अथोपसत् । उपसदेव वाऽप्रवर्ग्ये । प्रणीताद्युपसत् (१) ।(२)षडासनम् ।

औद्गात्रपद्धतिः ।

आरो३ हान् । ३ । इत एत ऊ३ दारू१ हा२ न् । दिवः पृष्ठानो३ था रू१ हा२ न् । प्रभूर्ज्जयो या३ था पा१ था२ उर्व्यामङ्गिरा३ सो-यां१ यू२ः । आरो२ हान् । २ । आ२३ । रो२ । हा२३४ औ२ हो वा । (अत्र स्वर्णिधनं भवति(३) । सू२३४ वाः(४) ॥ २३ ॥

प्रस्तोता एतानि धर्मसामानि प्रतिप्रवर्ग्यङ्गायेत् ।

हौत्रपद्धतिः ।

सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्यामाद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्तो३म् ॥

सूयवसाद्भगवतो हि भूया अथो वयं भगवन्तः स्यामाद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ता३म् ॥

इति त्रिः परिधाय मदन्तीरुपस्पृश्योत्सृज्यते । ऋचं वाचमित्यादि-पूर्ववत् । इति घर्मः ।

---

(१) प्रणीतादि = प्रणीताप्रणयनादि उपसदिष्टिर्भवति । अग्न्यन्वाधान-ब्रह्मावरण-व्रतग्रहणानामभावस्यो (पूर्व ६० प० टि०) क्तत्वात्प्रणीताश्चैव घटते । तत्र प्रणीतानां यदि सर्वार्थत्वं अदृष्टार्थत्वं वा तदैतत्सूत्र (का० श्रौ० ८।२।१०) मुपपद्यते न संयवनार्थत्वे, अत्र संयवनस्याभावात् । ततः प्रणीतानां सर्वार्थत्वमेव युक्तं, तथा हि द्रव्यप्रकल्पनस्य परार्थत्वात् प्रणीतानामपां अस्मिन्प्रयोगे यद्यदकार्यं तदर्थता गम्यते न च दृष्टेऽर्थे सम्भवत्यदृष्टं कल्पनीयं योऽपि विनियोगः श्रूयते "प्रणीताभिर्हवींषि संयौती" (आप० श्रौ० १।२४।३)ति स सर्वार्थत्वेन संयवनेऽपि प्रणीतानामेवानुवादः वर्तमानापदेशात् । सूत्रकारस्याप्ययमेवाभिप्रायो गम्यते येन संयवनाभावेऽपि प्रणीताद्युपसदिति सूत्रं कृतवान् ।

तच्च प्रणीताप्रणयनं यजमानमदन्तीभ्यो गृहीत्वा कर्तव्यं "उदकार्थैस्तत" (का० श्रौ० ७।१।९) इत्युक्तत्वात् ।

(२) चतुरासनमिति देवयाज्ञिकाः । वाचस्पतिप्रधार्थं प्रणीतार्थं च चतुरासनादानमिति रामचन्द्रवाजपेयिनः । नियोगार्थत्वाद्वाचस्पतिप्रधः ।

(३) संहितायान्तु "ऊ २, ३, ४, पा" इति निधनं श्रूयते । निधनं नाम साम्नोऽन्तिमोभागः । (४) २३ छ० आ० १, २, ९, २, गे, गा, ३, १, २, ।

आध्वर्यवपद्धतिः ।

बाचस्पतिप्रैषः, मदन्तीभ्यः प्रणीताप्रणयनम्, परिस्तरणमाहवनीयस्यैव ।

पात्रासादने—अग्निहोत्रहवणी, वज्रः, पवित्रच्छेदनानि, पवित्रे, आज्यस्थाली, कुशमुष्टिः, वेदितृणम्, (१)पक्षे—योक्त्रम्, स्रुवो, जुहूः, उपभृत्सन्नहनावच्छादनानि, आतिथ्यपरिधयो विभृत्यौ च । आज्यर्ठ० होतृपदनम् ।

उपकल्पनीयानि-इध्मकाष्ठानि एकादश, आतिथ्यप्रस्तरोपसन्नद्धमेकवृत्स्तरणार्थं(२)बर्हिः, उपसदर्थमाज्यं, मदन्त्युदकम् (३), हिरण्यम् (४), सुब्रह्मण्यपात्रं च, वाग्यमनम्, पवित्रकरणं प्रोक्षणीसंस्कारः । पात्रप्रोक्षणम्, असञ्चरे प्रोक्षणीर्निधानम्, वाग्विसर्गः, कुक्कुटाहननम्(५),

---

(१) अयोक्त्रदीक्षापक्षे इति भावः ।

(२) मुष्टिमात्रमिति रामवाजपेयिनः ।

अत्र सूत्रम् "मात्रावदिध्मावर्हिः" (का० ८।२।२३) रिति । इध्मावर्हिषोर्या मात्रा ब्राह्मणे श्रुता तत्परिमाणं भवति । अत एकादशकाष्ठक इध्मो भवति, सामिधेनीनां नवसङ्ख्यत्वात्तासां प्रणवे प्रणवे एकैकस्य प्रक्षेपात् । स्रुग्घृयानुस्रुग्घृये च द्वे एवमेकादशेति । बर्हिश्चैकवृत्स्तरणपर्याप्तं भवति । "अष्टादशेध्मं परिधिवृक्षाणा" (का० श्रौ० १।३।१८) मिति परिभाषयाऽष्टादशसङ्ख्यकाष्टक इध्मे प्राप्ते मात्रावदित्युक्तम् ।

(३) यजमानार्थम् ।

(४) आप्यायनार्थम् । अत्र प्रसङ्गाद्धिरण्यशकलमानमुच्यते--

हिरण्यशकलार्थं तु हिरण्यं यस्य नोच्यते ।
कृष्णलेनैव तद्व्याख्या यज्ञे सिद्ध्यति याज्ञिकी ।
कृष्णलं त्रियवं मानं ताम्रायसमतःपरम् ।
सुवर्णार्धं च माषाणां सुवर्णश्च त्रिसप्ततिः ।
त्रीणि चैव सहस्राणि दद्याद्बहुसुवर्णके । (का० श्रो० शु० ७।२८) इति ।

(५) अत्रार्थं विचारः—किं पेषणाभावे चोदकप्राप्तं "कुक्कुटोऽसी" (शु० य० स० १।१६) त्यादिना दृषदुपलयोराहननं भवति उत नेति । तत्र सूत्रेणैव पूर्वपक्षः—"हविष्कृतमाहूयानाहननमपेषणे तीक्ष्णार्थत्वात्" (का० श्रौ० ८।२।१६) । अस्यार्थः—अपेषणे = पेषणरहिते कर्मणि हविष्कृतमाहूय अनाहननं भवति । हविष्कृदाह्वानकाले यद्दृषदुपलयोराहननं तन्न भवतीति । यथोपसत्सु पयस्यायां चर्विष्टिषु च । कुतः आहननस्य तीक्ष्णार्थत्वात । प्रकृतौ दृषदुपलयोस्तीक्ष्णीकरणार्थमाहननम् । तीक्ष्णीकृताभ्यां हि सुखेन पेषणं कर्तुं शक्यते । अतोऽपेषणेऽर्थलोपान्निवर्तत इति प्राप्ते—

"स्याद्वा धर्ममात्रत्वात्" (का० श्रौ० ८।२।१७) । वाशब्दः पक्षव्यावृत्तौ । अपेषणेऽप्याहननं भवत्येव । आहननस्य धर्ममात्रत्वात् यत इदमाहननं धर्ममात्रमदृष्टार्थं न तीक्ष्णीकरणार्थम् । यतो नियतप्रहारं काष्ठकरणकं च न हि शम्यया त्रिसङ्ख्याकेनाहननेन पाषाणस्य तीक्ष्णतोपजायते । अतो धर्ममात्रमदृष्टार्थमारादुपकारकं प्रकृतावाहननम् । तेन प्रकृतिवदेवापेषणेऽपि पयस्याज्यचर्विष्टिषुषु भवत्येवेति सिद्धान्तः ।

आध्वर्यवपद्धतिः ।

अध्वर्योराज्यनिर्वापः, (१)वेदबन्धः, अध्वर्योरेवाज्याधिश्रयणम्, पर्यग्निकरणम्, उदकोपस्पर्शः । सतृणवज्रादानादि, पाꣳसुस्थाने (२)बर्हिषः प्रच्छेदर्ठ० हरति । पूर्वपरिग्रहान्ते उत्तरपरिग्रहः । नानुमार्जनम्, वेद्युपरि प्रोक्षणीधारणम् । प्रैषे—मदन्तीरिति वा प्रेष्यति, प्रोक्षणीर्मद-

---

उपसत्सु यावदुक्तपयस्यायां चापूर्वत्वात्प्रकृतितः प्राप्तेरभावादेव न भवतीति देवः ।
उपसदो यावदुक्तत्वान्न कुक्कुटाहननादीति रामवाजपेयिनः ।
अत्र निर्णयसूत्रप्रणयनादुपसत्सु भवतीति याज्ञिकाः ।

"श्रुतेश्च" (का० श्रौ० ८।२।१९) श्रुतेरप्याहननस्याहृष्टार्थतैव गम्यते न तीक्ष्णीकरणार्थता । तथाहि"स यत्रैष हविष्कृन्नमदादयति तदेको हृषदुपले समाहन्ती" (श० ब्रा० १।१।४।१३)ति तथा "सैषासुरघ्नी (सपत्नघ्नी) वागुद्यति स यस्य हैवं विदुष एतामत्र वाचं प्रत्युद्यच्छन्ति पापीयाꣳसो हैवास्य सपत्ना भवन्ती "(श०ब्रा०१।१।४।१७) ति । अत्र पुराकल्पश्रुत्या हृषदुपलयोराहननमसुरसपत्नहननार्थं न हृषदुपलयोस्तीक्ष्णीकरणार्थमिति प्रतीयते ।

(१) यजमानस्य वेदबन्ध इति रामः ।

(२) स्तम्बयजुर्हरणेऽध्वर्युर्बर्हिषः प्रच्छेदं पुरीषस्थाने बर्हिः प्रच्छिद्य प्रच्छिद्य हरति न तु पुरीषम् । अत एव बर्हिषः प्रच्छेदनोपदेशादातिथ्यायां यद्बर्हिस्तीर्णं तत्स्तृतमेव तिष्ठति नोद्धृत्य पुनस्तीर्यत इति गम्यते । अतश्च वेदेस्तृतत्वाद्रेखाकरणानुमार्जनखननवर्जितानां वेदिसंस्काराणामप्राप्तानामेव वचनात्पुनः करणम् ।

अत्र कात्यायनः—"परिस्तरण—पात्रसर्ठ०सादन—प्रोक्षणाज्यनिर्वपणाधिश्रयणानि कृत्वा स्फ्यादि करोति" (८।२।२०) इति। सूत्रेणानेनानुष्ठानसौकार्याय प्राकृताः पदार्था अनूद्यन्ते न तु प्राप्ताः परिसङ्ख्यायन्ते । तेनानुक्तमप्याज्यनिर्वापानन्तरं वेदकरणं आज्याधिश्रयणानन्तरं च पर्यग्निकरणं भवत्येव । कुक्कुटाहननमत्र भवतीति केचित् । सूत्रकारेणात्रैव समर्थितत्वात् ।

अपरे त्वाहुः—"तस्मादन्यतरमेवाधारमाधारयति यꣳस्रुवेणे" (श०ब्रा०३।४।४।९) ति स्रुवाधारस्य प्राप्तस्यैव पुनर्विधानमितरस्यैवं जातीयस्यारादुपकारकस्याहृष्टार्थस्य परिसङ्ख्यानार्थमुपसदोऽपूर्वत्वज्ञापनार्थं (जै० १०।७।१४) च । तेनात्र कुक्कुटाहनन—स्फ्योदकप्रहरणोत्तराधार—प्रयाजा-ज्यभागानुयाज-पत्नीसंयाज-दक्षिणाग्निहोम-पूर्णपात्र—विष्णुक्रमादिकमदृष्टार्थमारादुपकारकं न भवत्येवेति । अतोऽपूर्वत्वाद्यावत्पुनरुच्यते तावदेव भवति नाधिकं प्रकृतितः प्राप्तं किंचित् ।

तत आज्यनिर्वपणं वेदबन्धनं अग्नीध एवाधिश्रयणमध्वर्योरेव पर्यग्निकरणं च, एतानि कृत्वा ततः स्फ्यादानादि कर्म कुर्यात् । स्फ्यादानं त्वत्राप्राप्तमेव विधीयते वेदेस्तृतत्वेन स्तम्बयजुर्हरणस्य प्राप्त्यभावात् । यद्यप्युपसदोऽपूर्वत्वात्परिस्तरणादयोऽपि न प्राप्नुवन्ति तथाप्यत्र पूर्वधारस्य विहित (श० ब्रा० ३।४।४।९) त्वात्, आग्नपात्रत्विग्वेद्यादीनां चाङ्गप्रधानार्थ (पू०मी० ३।७।३) त्वात्पूर्वाधारप्रयुक्ताः परिस्तरणादयोऽप्यत्र भवन्तीति ।

आध्वर्यवप्रकाशः ।

न्तीरासादयेध्मं बर्हिरुपसादय स्रुचौ संमृढ्डि (१)पत्नीꣳसन्नह्याज्येनोदेहि । पक्षे—पत्नीसन्नहनाभावः । वेद्यां प्रोक्षणीनिधानम्, (२)स्फ्योदकप्रहारपाण्यवनेजनाभावः । अपरेण प्रणीताः स्फ्येध्मबर्हिषामासादनम् । वेदाग्रनिष्पत्तिः । स्रुवतृतीयाः स्रुचःसम्मार्ष्टि(३)सम्मार्जनापासनम् । पक्षे पत्नीसन्नहनम् । आज्योद्वासनादीक्षणान्ते (४)अष्टगृहीतं जुह्वां चतुरुपभृति, यथाप्रकृति वा, इध्मप्रोक्षणम्, न वेदिप्रोक्षणं कर्तव्यमिति रामः ।

"ॐ बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामी"(२।१)ति बर्हिः प्रोक्षणम् । (५)एकवृत्स्तरणम् । इध्मात्समिधमादाय आहवनीयकल्पनम् । नोल्मुकोद्दहनम(६) । परिधिपरिधानम् । स्पृश्यास्पृश्ये च । सूर्यस्त्वे(२।५)ति जपः । आवर्तनम् । विधृत्योः स्थापनम् । प्रस्तरासादनम् । अभिधानम् । स्वस्वमन्त्रेण जुहूपभृतोः सादनम् । आज्यस्थाली ध्रुवार्थं प्रियेणे(५।६)ति । ध्रुवा असदन्नि(५।६)ति सर्वालम्भः । पाहि मामि(५।६)-

---

उपसदामपूर्वार्थत्वाधिकरणे न्यायमाला—

उपसत्सु निषिद्धेभ्यः शिष्टं सर्वं किमाचरेत् ।
यावदुक्तमुताऽऽद्योऽस्तु चोदकस्यानिवारणात् ॥
स्रौवाधारे पुनः श्रुत्या शिष्टस्य परिसङ्ख्यया ।
अपूर्वार्थत्वतो वाऽन्त्योऽनुवादोऽत्र निषेधगीः ।
(१०।७।२४—२५) इति ।

(१) अयोक्त्रदीक्षापक्षे—'पत्नी ꣳ सन्नह्याज्येनोदेही'ति प्रषो नियमेन ।

(२) स्फ्योदकप्रहरणपाण्यवनेजनोत्तराधाराज्यभागादि यावदुक्तत्वान्निवर्तत इति रामाशयः ।

(३) अत्र स्रुचौ सम्मृढ्डीत्येव प्रैषो देयः । तथा च मानवे—"प्रोक्षणारासादयेध्ममुपसादय स्रुचौ सम्मृज्याज्येनोदेहीति संशास्ती" (२।२।१।२२) ति ।

(४) अष्टगृहीतं जुह्वामाज्यं गृह्णीयादुपभृति च चतुर्गृहीतं गृह्णीयात्प्राकृते एव काले, संमार्गवेदिस्तरणयोरन्तराले सूत्रित (का० श्रौ० ८।२।२६) त्वात् । "स वा अष्टौ कृत्वो जुह्वां गृह्णाति चतुरुपभृती" (श० ब्रा० ३।४।४।७)ति श्रुतत्वाच्च । तूष्णीमेवैतद्ग्रहणमपूर्वत्वात् । प्रधानयागार्थमिदमाज्यग्रहणं न प्रयाजार्थमतो यावदुक्तं ग्रहणमात्रमेव ।

पक्षान्तरे "यथाप्रकृति वा" ('का० श्रौ० ८।२।२६) प्रकृतिवदेवाज्यं गृह्णीयात् चतुर्गृहीतं जुह्वामुपभृत्यष्टगृहीतमिति । एवमेव श्रूयते—"अथो इतरथाहश्चतुरेव कृत्वा जुह्वां गृह्णीयादष्टौ कृत्व उपभृती"(श० ब्रा० ३।४।४।७) ति । अस्मिन्नपि पक्षे ग्रहणं तूष्णीमेव सङ्ख्यामात्रस्यैव प्राकृतस्य श्रुतत्वात् ।

गृह्णातीति प्रकृतिलिङ्गा "द्धामनामासो"(य०सं० १।३१)ति मन्त्रेण गृह्णातीति रामः ।

(५) स्तीर्णाया अपि वेदेर्वाचनिकमेकवृत्स्तरणम् ।

(६) अनुयाजाभावात् ।

आध्वर्यवपद्धतिः।

त्यात्मालम्भः। उदकोपस्पर्शः(१)। होतृषदनकरणम्। अप्रैवग्र्यं होतरेहीं(२)ति। अग्नये समिध्यमानायेति प्रैषः। अवघाधने-नवमेन वज्रेणेति। प्रतिप्रणवमाधानम्। आहवनीयोपवाजनम्। स्रुवाघारमाघाय अग्निसम्मार्गप्रैषः। अग्निसम्मार्गः। न निन्हवः। नोत्तराधारः। सम्मृष्टेग्नौ

हौत्रपद्धतिः।

अथोपसदिष्टिः। (३) एहि होतरित्यामन्त्रितः—आचम्यादिब्रह्मन्त्सामिधेनी० हि।

---

(१) न व्रतोपायनं निर्वर्तितत्वात्।

(२) अत्र रामवाजपेयिनः—होतुरुपांशुप्रयोगानां लोपः। यथा-नमः प्रवक्त्र इत्यादि हौत्रं जुषध्वमित्यन्तस्य लोपः। न हिकारलोपः मन्त्रैकदेशत्वात्। एवं 'होतारम वृथा' इत्यस्य च न लोपः वषट्कारानुमन्त्रणस्य च न लोपः नैमित्तिकत्वादिति।

(३) अत्र ब्रह्मा तीर्थेन प्रविश्य प्रकृतिवन्मन्त्रेणोपविशेत्। यजमानस्य प्रकृतिवदुपवेशनम्। होता एहि होतरित्यामन्त्रित आचम्यान्तरेण प्रणीतोत्करौ प्रविश्याग्नये समिध्यमानायानुब्रूहीति प्रेषितो ब्रह्मन्त्सामिधेनीरनुवक्ष्यामि इति ब्रह्माणं पृष्ट्वा अनुब्रूहीति तेनानुज्ञातः "कं प्रपद्ये तं प्रपद्ये यत्ते प्रजापते शरणं छन्दस्तत्प्रपद्ये यावत्ते विष्णो वेद तावत्ते करिष्यामि देवेन सवित्रा प्रसूत आर्त्विज्यं करिष्यामि नमोऽग्नये उपद्रष्ट्रे नमो वायव उपश्रोत्रे नम आदित्यायानुख्यात्रे जुष्टामद्य देवेभ्यो वाचं वदिष्यामि शुश्रूषेण्यां मनुष्येभ्यः स्वधावतीं पितृभ्यः प्रतिष्टां विश्वस्मै भूताय प्रशास्त आत्मना प्रजया पशुभिः प्रजापतिं प्रपद्येऽभयं नो अस्तु प्राजापत्यमनुवक्ष्यामि वागार्त्विज्यं करिष्यति वाचं प्रपद्ये 'भूर्भुवः स्व'रिति जपं वर्जयित्वा पठेत्।

"उपसदि चेत्याचार्याः" (शां० श्रौ० सू० ३।१६।२१) इति कल्पवचनादुपसदि पित्र्याधर्मप्राप्तेः "उत्सर्गो जपाना" (श० श्रौ० सू० ३।१६।१९)मिति कल्पवचनात्पित्र्यावदत्रापि "कं प्रपद्ये" (शां०श्रौ० १।४।५) इत्येवमादीनां प्राकृतानां जपानामुत्सर्गसिद्धिर्भवति। "उत्सृज्यन्ते ह निगदा" (कौ० ब्रा० ८।८) इति श्रुतेश्च। "कर्माणि तूष्णीं जपमन्त्राणी"ति (शां० श्रौ०३।१६।२०) सूत्रात् कर्माणि तूष्णीं, जपमन्त्राणि तूष्णीं,भूमिसम्मर्शनांसाभिमर्शनादीनि तूष्णीं भवन्ति मन्त्राणां तूत्सर्गो भवति।

त्रिर्हिंकृत्यपौर्वाह्णिक्यामुपसदि उपसद्यायेत्येतास्तिस्रः सामिधेनीरनवानमधर्चोऽनुच्छ्वसन्नेकैकां सप्रणवां मकारान्तप्रणवावसानां त्रिस्त्रिराह। एवं नव सामिधेन्यः ताः "समनूक्ताः नव सम्पद्यन्त" (कौ० ब्रा० ८।२) इति श्रुतेः। तत्रैकामृचं द्विर्द्विरुक्त्वा तस्यास्तृतीये वचने शुद्धप्रणवेनोत्तरामृचं सन्धाय मकारान्तप्रणवेनावस्येत्। तृतीयस्यास्तृतीये वचने तु अन्ते शुद्धप्रणवं कृत्वा तेन सन्धायाग्निमाऽवह सोममाऽवह विष्णुमाऽवहेति तिस्रो देवता व्यवस्यन्नावहेत्। श्रुतावपि "अग्निमावह सोममावह विष्णुमावहे" (कौ० ब्रा० ८।८) त्येतावदेवावाहनमुक्तम्।

अत्र च यथापठितं नान्यदधिकं पारसङ्ख्यानात्।

"प्रणवेन सन्धाये" (शां० श्रौ० ५।१२।४) ति प्रणवेन सन्धानोपदेशादग्ने महां असीत्येवमादेराऽवह देवान्यजमानायेत्येवमन्तस्य चाभावः।

आध्वर्यवपद्धतिः ।

इध्मसन्नहनान्यादायाश्राव्य, ओ३श्रा३वय । अस्तु श्रौ३षट् । (१) सीद होतरित्येव ब्रूयात् । न प्रयाजाः नाज्यभागौ । (२)स्रुचौ गृहीत्वा प्रसूतेऽतिक्रामन्नग्नयेऽनुवाचयति ।

हौत्रपद्धतिः ।

अनुब्रू३होति तेनानुज्ञातः कं प्रपद्यादि भूर्भुवः स्वरित्यन्तं जपं वर्जयित्वा यथैवैवामिथः संश्रृण्वीरन्निति श्रुतेः (३)सर्वांपांशु ।

"हि हि हि (४)उपसद्याय मीळ्हुष आस्ये जुहुता हविर्यो नो नेदिष्टमाप्यो३म् ।

उपसद्याय मीळ्हुष आस्ये जुहुता हविर्यो नो नेदिष्टमाप्यो३म् ।

उपसद्याय मीळ्हुष आस्ये जुहुता हविर्यो नो नेदिष्टमाप्यो३ ।

यः पञ्च चर्षणीरभि निषसाद दमेदमे कविर्गृहपतिर्युवो३म्

यः पञ्च चर्षणीरभि निषसाद दमेदमे कविर्गृहपतिर्युवो३म्

यः पञ्च चर्षणीरभि निषसाद दमे दमे कविर्गृहपतियुवो३म् ।

स नो वेदो अमात्यमग्नी रक्षतु विश्वत उतास्मान्पात्वंहसो३म् ।

स नो वेदो अमात्यमग्नी रक्षतु विश्वत उतास्मान्पात्वंहसो३म् ।

स नो वेदो अमात्यमग्नी रक्षतु विश्वत उतास्मान्पात्वंहसो३म्" ।

अग्निमा ४ वह सोममा ४ वह विष्णुमा ४ वह एतावदेवावाहनमन्यस्य निवृत्तिः ।

ततोऽध्वर्युणाऽऽश्राव्य सीद होतरित्युक्तो होता उपविशेत् ।

ततस्तूष्णीं भूमिमन्वारभ्य तूष्णीमंसाभिमर्शनं कृत्वा तूष्णीं तृणं

---

(१) "स्रुवाधारमाधार्य सम्मृष्ट आश्राव्य सीद होतरि"ति (का०श्रौ० ८।२।२९) सूत्रे "तस्मादन्यतरमेवाधारमाधारयति यदुस्रुवेणे" (श० ब्रा० ३।४।४।९) ति श्रुतत्वात्स्रुवाधारमाधार्येत्युक्तं, एवकारेणान्यत्पर्युदस्यते । अस्य चाधारस्य प्रकृतितः प्राप्तवत एव पुनर्वचनादेतेनैव केवलेन प्राकृताङ्गोपकारः क्रियत इतीतरान्यप्यङ्गान्यत्र निवर्तन्ते । अतो अपूर्वा उपसत् । तेन यावदुक्तमेवात्र भवति नाधिकं प्रकृतितः प्राप्तं किञ्चिदिति । "अथाश्राव्य न होतारं प्रवृणीते सीद होतरित्येवाहेति" (श० ब्रा० ३।४।४।१०) श्रुतत्वात्तथोक्तम् । अत्र न होतारमित्यनुवाद एव प्राप्त्यभावात् सीद होतरित्ययं तु विधिः । "उपविशति होते" (श० ब्रा० ३।४।४।१०) त्यादिनिवर्तमानप्रतिप्रसवः ।

(२) वाचनिकमत्र स्रुगादापनमप्रयाजार्थत्वात् ।

(३) "तस्मादु तत्रोपांशु चरेयुर्यथैवैव मिथः संश्रृण्वीर" (कौ० ब्रा० ९।१)न्निति श्रुतेः । अन्यत्र दीक्षणीयादौ प्रधानमात्रमुपांशु, अत्र तु प्रधानमङ्गजातं सर्वमुपांशु । श्रुतौ "तस्मादु तत्रापांशु चरेयुरि"ति पुनर्वचना "त्रिपत्न्योपसदः सतन्त्रा"(आश्व० श्रौ० २।१९) इत्याश्वलायनभणितत्वाच्च ।

(४) ऋ० ७।१९।१-३ ।

आध्वर्यवपद्धतिः ।

अग्नयेऽनुब्रू३हि ।

अग्निं यज । (१) पूर्वार्धे होमः । इदमग्नये न मम ।

अर्द्धर्च० हुत्वा सोमाय मध्ये सोमायानुब्रू३हि ।

सोमं यज । इदं सोमाय न मम ।

हौत्रपद्धतिः ।

निरस्यति । अप उपस्पृश्य तूष्णीं स्वासने उपविशेत् ।

तत एष वामाकाश(२) इति वक्तव्यम् ।

ततः स्रुगादापनमग्निर्होतेति ।

ततोऽग्नयेऽनुब्रू३हीत्युक्ते—

"अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया समिद्धः शुक्र आहुतो३म्"(३) ॥

अग्निं यज ।

भूर्भुवर्यं ४ यजामहेऽग्निं य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः ।

अग्ने पुरो रुरोजिथा(४) ४ वौ ४ षट् । ओजः सहः सह ओजः स्वः ।

सोमायानुब्रू४हि ।

त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदास्त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिद्युम्न्यभवो नृचक्षो३म्(५) ।

सोमं यज ।

भूर्भुवर्यं ४ यजामहे सोममषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् । भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोमा(६) ४ वौ ४ षट् ।

---

(१) "प्रतीचो जुहोत्युपसत्सु चे" (का० श्रौ० ३।५।१०—११) त्याम्नातत्वात् "तस्मात्त उपसद्रूपेण प्रत्यञ्चो ह्यन्त" इति श्रुतेश्चतेषां त्रयाणां प्रधानानां होमोऽग्नौ प्रत्यक्संस्थः कर्त्तव्यः । पूर्वार्द्धे अग्नेः, मध्ये सोमस्य, अपरार्द्धे विष्णोरिति । तथा च मानवे—"घृतवता अध्वर्यं" (का० हौ०प० १।४) इत्युच्यमाने स्रुचावादाय दक्षिणातिक्रम्य यथादेवतमनुवाचयत्यग्निं पूर्वार्द्धे यजति मध्य सोममौपभृतं जुह्वां समानीय विष्णुं पश्चार्द्धे" (२।१।३४—३६) इति । सकृदतिक्रान्तेनैव त्रयोऽपि यागाः कर्त्तव्याः "स यत्समानत्र तिष्ठञ्जुहोति न यथेदं प्रचरन्त्सञ्चरता" (श०ब्रा०३।४।४।१४) ति श्रुतेः ।

(२) "उदक्संसर्पन्नाहैष वामाकाश" (शां० श्रौ० १।६।१२)इत्यस्मिन् सूत्रे आहैत्यतिरिक्तं वदतास्य वचनस्याजपत्वं सूचितं तेनाऽस्य नोत्सर्गः ।

(३) ऋ० ६।१६।३४ ।

(४) ऋ० ६।१६।३९ । (५) ऋ० १।९१।२ ।

(६) ऋ० १।९१।२१ ।

आध्वर्यवपद्धतिः ।

विष्णवे समानाय पश्चार्द्धं विष्णवेऽनुब्रूऽहि ।

विष्णुं यज । इदं विष्णवे न मम ।

उपभृत्यष्टगृहीतपक्षे सर्वमग्नये हुत्वा समानीय समानीयेतरयोः । समानयनकाले विष्णवेऽनुवाचनं समानीयेतरस्य । प्रत्याक्रम्य सादयित्वा स्रुचौ सोमाप्यायनाद्यासुब्रह्मण्याप्रैषात् ।

आतिथ्या(१)वत्सोमाप्यायनं निह्नवश्च । ततः शेषप्रतिपत्तिः । प्रस्तरे पवित्रकरणम् । अग्निसम्मार्गप्रैषः । अग्निसम्मार्गः । व्यूहने-अग्नेः सोमस्य विष्णो रु० (२।१५) । अग्निः सोमो विष्णुस्तम० (२।१५) ।

औद्गात्रपद्धतिः ।

अथोपसदस्ते आतिथ्यान्तवत्सोमाप्यायनं निह्नवनं सुब्रह्मण्याह्वानञ्च कार्यम् ।

हौत्रपद्धतिः ।

ओजः सहः सह ओजः स्वः ।

विष्णवेऽनुब्रूऽहि ।

यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति । यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसो३म्(२) ।

विष्णुं यज ।

भूर्भुवर्यं ४ यजामहे विष्णुं तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन । आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहा(३) ४ इवौ ४ षट् । ओजः सहः सह ओजः स्वः ।

मदन्तीरुपस्पृश्य यावदादिष्टं (४)कुर्यात् ।

तत आप्यायनम् ।

---

(१) पूर्वं (८३-८४) पत्रे द्रष्टव्यः ।

(२) ऋ० १।१५६।२ । (३) ऋ० १।१५६।३ ।

(४) "यावदादिष्टं कुर्यात्" (शां श्रौ० ५।१२।१०) इत्युक्तत्वात् "देवता उपसत्सु प्रतियजती" ति श्रुतेश्च प्रयाजाज्यभागस्विष्टकृदनुयाज-सूक्तवाक-पत्नीसंयाजादीनां चोत्सर्गः सिद्धो भवति ।

"अत्र यावदादिष्टं कुर्या"(शां० श्रौ० ५।१२।१०)दित्युक्तेऽप्यध्वर्युवशात्प्रतिपत्तिकर्मत्वेन सूक्तवाको भवत्येव, स चेत्थम्—

सूक्ताब्रूऽहीत्युक्ते 'इदं द्यावापृथिवी० तयोराविदि । अग्निरिदर्ढ० हविः सोम इदर्ढ० हविः विष्णुरिदर्ढ० हविः (देवा आज्यापा अग्निर्होत्रेणेति च न भवति प्रयाजस्विष्टकृतोरभावात्) अस्यामृधद्धोत्रायामित्यादि नमो देवेभ्य' (शां० श्रौ० १।१४।१-२१) (का० हौ० प०१।८) इत्यन्तं भवत्येव । न शंयोर्वाकः । वेदविमोकः । आवेदेस्तरण"मिति याज्ञुषहौत्रप्रयोगे विशेषः ।

आध्वर्यवपद्धतिः।

अभ्युद्धृत्य जुह्वा परिध्यञ्जनम् । परिधि गृहीत्वाऽऽश्राव्य(१) सूक्तवाकप्रैषः । प्रस्तरादानं न विधूत्योः स्थाने करणम् । अञ्जने—आज्यस्थाल्यां मूलम् । अकृत्वा प्रस्तरमुपसदं (२)जुहोति स्रुवेण या त इ(३)त्ययःशयामन्वारब्धे (४)यजमानेन द्विरेकया चरति (५)सुसायर्ठ० सुपूर्वाह्णे च । प्रतिप्रस्थातोपकल्पितमाज्यर्ठ० संस्कृत्याध्वर्यवे प्रयच्छति ।

"ॐ या ते अग्नेऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा ।
उग्रं वचो अपावधीत्स्वेषं वचो अपावधीत्स्वाहा" (५।८) ।

इदमग्नयेऽयःशयाये तन्वै । परिधिविधृत्योरासादनाद्यग्नीधे समर्पणान्तमातिथ्या(६)वत् । "चक्षुष्पा" (२।१६) इत्यात्मालम्भः । उदकोपस्पर्शः । संस्रवाहुतिः । देशे निधानम् । न वेद्यालम्भः । तूष्णीं वेदविमोकः । पत्ने योक्त्रस्य । एकवृद्धर्हिर्होमः । प्रणीताविमोकः । पूर्ववत् ।

हौत्रपद्धतिः ।

"अंशुरंशुष्टे देव सोमा प्यायतामिन्द्रायैकधनविदे ।
आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व ।
आ प्याययास्मान्त्सखीन् त्सन्या मेधया स्वस्ति ते ।
देव सोम सुत्यामुद्वचमशीयेति" ।
तत उरोभिमर्शनम् ।
"यमादित्या अंशुमा प्यायन्ति यमक्षितिमक्षितयः पिबन्ति ।
तेन नो राजा वरुणो बृहस्पतिरा प्याययन्तु भुवनस्य गोपाः" ।
इति पुनर्मदन्ती० ।

---

(१) देवयाज्ञिकमते न सूक्तवाकप्रैषः ।

(२) उपसदिति सामान्यसंज्ञा । (३) अयःशयेति मन्त्रलिङ्गाद्विशेषसंज्ञा ।

(४) अनेकयजमानके एकस्यैवान्वारम्भः । पूर्णाहुतिप्रकृतित्वेनान्वारम्भः प्राप्त एव परिसङ्ख्यार्थं पुनरुक्तः । उपसत्स्वेवान्वारम्भो नान्येषु होमेष्विति ।

(५) सायं शब्देनात्रापराह्णो लक्ष्यते "स यत्सायंप्रातः प्रचरति तथा ह्येव सम्पत्सम्पद्यते स यत्पूर्वाह्णे प्रचरति तज्जयत्यथ यदपराह्णे प्रचरती" (श० ब्रा० ३।४।४।२१) ति श्रुतत्वात् "याः पूर्वाह्णे पुरोऽनुवाक्यास्ता अपराह्णे याज्याः करोति" (कौ०ब्रा० ८।९) "तद्याः पूर्वाह्णेऽनुवाक्या भवन्ति ता अपराह्णे याज्या" (श० ब्रा० ३।४।४।२) "सुपूर्वाह्ण एव पूर्वयोपसदा प्रचरितव्यं स्वपराह्णे परया" (ऐ० ब्रा० १।४।२३) इत्यादि श्रुतेश्च, सूत्रकारप्रस्थानाच्च "उपसत्सु पौर्वाह्णिक्यापराह्णिक्यन्तरे चयनपुरोषनिवपने" (का०श्रौ० १७।७।३) इति । सुः पूजायाम् । प्रशस्तः पूर्वाह्णः सुपूर्वाह्णः । तस्य च प्रशस्तत्वं प्रथमावयवः = उदयानन्तरमेवेत्यर्थः ।

(६) पूर्वं (८६) पत्रे ।

आध्वर्यवपद्धतिः ।

(१)सुब्रह्मण्याप्रैषगाने । इत्युपसदिष्टिः(२) सतन्त्रोपांशु ।

(अथ द्वितीयदिनस्योपराह्णिकः प्रवर्ग्यः ।)

अपराह्णे द्वारापिधानम् । तानूनप्त्रमिश्रव्रतप्रदानमुभाभ्याम् । सप्र-

हौत्रपद्धतिः ।

ततः प्रस्तरे निन्हुवते दक्षिणोत्तानान्पाणीन्कृत्वा(३) । यजुः—

ॐ एष्टारायः प्रेषे भगाय ऋतमृतवादिभ्यो नमो द्यावापृथिवीभ्या-मिति ।

इत्युपसदिष्टिः ।

(आरम्भाद्द्वितीयदिनस्योपराह्णिकः प्रवर्ग्यप्रचारः ।)

अथापराह्णिके प्रचरणे विशेष उच्यते । "ऋचं वाचमि"त्यादि शान्ति-

---

(१) पूर्वं (८७-८८) पत्रे ।

(२) एकाहस्त्र्युपसत्कः (का० श्रौ० ८।२।३७)। एकाहः = एकसुत्यः क्रतुस्त्र्युपसत्को भवति । तिस्र उपसदो यस्यासौ त्र्युपसत्कः एकसुत्ये यज्ञे तिस्र उपसदो भवन्तीत्यर्थः । "स वै तिस्र उपसद उपेया"दिति (श० ब्रा० ३।४।४।१७) श्रुतेः

"द्वादश वा" (का० श्रौ० ८।२।३८) । अथवा द्वादशोपसदो भवन्ति "यद्य द्वादशोप-सद उपेयादिति" (श० ब्रा० ३।४।४।१९) श्रुतेः ।

अपरे त्वन्यथा व्याचक्षते—एकाहस्त्र्युपसत्क इत्यत्र प्रकान्त एवैकाहे पुनरेकाहग्रहणं द्वादशोपसत्कस्यानेकाहविषयत्वज्ञापनार्थं तेनैकाहस्त्र्युपसत्क एव । द्वादशत्वं त्विह पठितमपि शाखान्तरीयवाक्यवशादुत्कृष्याहीनविषयं व्याख्यायते । तथा च वाक्यम् । "तिस्र एव सान्हस्योपसदो द्वादशाहीनस्ये" (भाप० श्रौ० ११।४।७) ति । अन्हा सह समाप्तिं प्राप्नोतीति सान्ह एकाह इत्यर्थः ।

केचित्त्वेवं व्याचक्षते—एकाहस्त्र्युपसत्को ज्योतिष्टोमव्यतिरिक्तः तद्विकार एकाह-स्त्र्युपसत्क एव भवति एकाहपठितः । "तिस्रः सान्हस्ये"ति वाक्यात् "द्वादश वा" वैकृते एकाहे तिस्रः स्थिता एव ज्योतिष्टोमे विकल्पो द्वादश वा तिस्रोवेति तत्प्रकरणे उभयस्य विकल्पेन श्रुतत्वात् "स वै तिस्र" (श० ब्रा० ३।४।४।१७) इति "यद्य द्वादशे" (श० ब्रा० ३।४।४।१९) ति च ।

(३) एवमापराह्णिके प्रचारे सव्यानुत्तानान्दक्षिणान्नीचैः कृत्वा निन्हुवीरन् । निन्हुवनं नाम द्यावापृथिव्योर्नमस्कारः । तथा च ब्राह्मणम्—"प्रस्तरे निन्हुवते द्यावापृथिव्यामेव तं नमस्कुर्वन्ती"ति । आप्यायनमुरोऽभिमर्शनं प्रस्तरे निन्हु-वनमित्यादिपदार्थजातं पूर्ववद्वक्ष्यमाणलक्षणायामुपसद्युपसदि समाप्तायां कर्तव्यम् । तत्र पूर्वाह्णिक्यामुपसदि दक्षिणोत्तानधर्मः, आपराह्णिक्यामुपसदि सव्योत्तानधर्मः । अत्राप्यायने "यजमानषष्ठा सोममाप्याययन्ती" (का० श्रौ० ८।२।६) ति शतपथश्रुते (३।४।३।१७) ब्रह्मोद्गातृहोत्रध्वर्य्वग्नीध्रयजमानानां षण्णामेवाधिकारः, तदङ्गत्वाद्विन्हुवे-ऽपि । शाङ्खायनकल्पभाष्ये (२३२ पत्रे) ऽयमेव पक्षोऽभिहितः । तैत्तिरीयाणां सर्वेषामा-प्यायनमभिहितं (आप०श्रौ० ११।१।११) तथैव शाङ्खायनानामपि सर्वेषामाप्यायनं पद्ध-तावभिहितमतश्चेच्छयानुष्ठानं विधेयम् ।

आध्वर्यवपद्धतिः ।

वर्ग्ये पुनः पूर्वाह्णप्रवर्ग्यवद्पराह्णप्रवर्ग्यप्रचारः शान्त्यादिशान्त्यन्तः ।

तत्र विशेषः । रौहिणहोमे —

"ॐ रात्रिः केतुना जुषताꣳसुज्योतिर्ज्योतिषा स्वाहा" (३७।२१)

इदं घर्माय ।

अग्निहोत्रावृता होमे (समिद्धोमे) "अग्निर्ज्योतिषं त्वा वायुमती-प्राणवतीꣳस्वर्ग्याꣳस्वर्गायोपदधामि भास्वतीम्" (कण्वसं० ३।२।१ का० श्रौ० ४।१४।१३) इति । प्रधानहोमे—

हौत्रपद्धतिः ।

पाठं पूर्ववत् (पत्रे ६१) कृत्वा ततो "ब्रह्म यज्ञानमि"(१)त्यादि "कण्वा-नां सवने सुतेऽ३मि"त्यन्तं पूर्ववदभिष्टुत्य "प्रातर्यावाणे"(२)ति सूक्त-स्य स्थाने "आ भात्यग्निरि"(३)ति सूक्तमभिष्टुयात् ।

("आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुर्वाञ्छा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छेऽ३म् ।

न संस्कृतं प्रमिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह दिवाभिपि-त्वेऽवसागमिष्ठा प्रत्यवर्तिं दाशुषे शंभविष्ठोऽ३म् ।

उता यातं सङ्गवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य दिवा नक्तमव-सा शन्तमेन नेदानीं पीतिरश्विना ततानोऽ३म् ।

इदं हि वां प्रदिवि स्थानमोक इमे गृहा अश्विनेदं दुरोणमा नो दिवो बृहतः पर्वतादद्भ्यो यातमिषमूर्जं वहन्तोऽ३म् ।

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेमा नो रयिं वहत-मोत वीराना विश्वान्यमृता सौभगानोऽ३म्" ।)

तत "ईळे(४) द्यावापृथिवी"त्यादि "यमस्य योनौ शकुनस्मुरण्योऽ३मि" त्यन्तं पूर्ववदभिष्टुत्याध्वर्युणा 'घर्मस्य यजे'त्युक्तो "अस्य पिबतं" "यदुः स्त्रियास्वाहुत"मित्येते द्वे अनवानं पठित्वा (द्वितीयस्या अन्ते वषट् कुर्या-त्तथैवानुवषट् कुर्याच्च । भूर्भुवर्यें ४ यजामहे"ऽस्य पिबतमश्विना युवं मदस्य चारुणो मध्वो रातस्य धिष्ण्या(५) यदुस्त्रियास्वाहुतं घृतं पयोऽयं सु वामश्विना भाग आ गतं माध्वी धर्तारा विदथस्य सत्पती तप्तं घर्मं पिबतं रोचने दिवा"(६) ४ वौ४षट् । ओजः सहः सह ओजः स्वः ।

---

(१) शां० श्रौ० ५।९।९। पूर्वं ९५-१०५ पत्रेषु ।
(२) ऋ० ५।७७।१-५ (३) ऋ० ५।७६।१-५ ।
(४) ऋ० १।११२।१ । पूर्वं १०६-११९ पत्रेषु ।
(५) ऋ० ८।५।१४ ।
(६) शां० श्रौ० ५।१०।२१ ।

आध्वर्यवपद्धतिः ।

"ॐ सजूर्देवेन सवित्रा सजू राज्येन्द्रवत्या । जुषाणो अग्निर्वेतु स्वाहा" (३।१०)

इदमग्नये न मम । इतरत्सर्वं पूर्ववत् । इत्यपराह्णप्रवर्ग्यः ।

(आरम्भाद्द्वितीयदिनस्यापराह्णिक्युपसत्)

ततः पुनः पूर्ववत्सायमुपसत् (पत्र १२७-१३६) । न तत्र विशेषः ।

हौत्रपद्धतिः ।

भूर्भुवः घर्मस्याग्ने वीही ४ वौ४षट् । ओजः सहः सह ओजः स्वः ।)

ततः "स्वाहाकृत" इत्यादि (प० १२१-१२७) शान्तिपाठान्तः पूर्ववत्प्रवर्ग्य इति ।

(आरम्भाद्द्वितीयदिनस्यापराह्णिक्युपसत् ।)

तत उपसत् । आचम्यादि ब्रह्मन् सामि० ।

हिं हिं हिं "(१)इमां मे अग्ने समिधमिमामुपसदं वनेरिमा उ षु श्रुधी गिरो३म् ।

इमां मे अग्ने समिधमिमामुपसदं वनेरिमा उ षु श्रुधी गिरो३म् ।
इमां मे अग्ने समिधमिमामुपसदं वनेरिमा उ षु श्रुधी गिरो ३-
मया ते अग्ने विधेमोर्जो नपादश्वमिष्ट एना सूक्तेन सुजातो३म् ।
अया ते अग्ने विधेमोर्जो नपादश्वमिष्ट एना सूक्तेन सुजातो३म् ।
अया ते अग्ने विधेमोर्जो नपादश्वमिष्ट एना सूक्तेन सुजातो३-
न्तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः सपर्यम सपर्यवो३म् ।
तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः सपर्यम सपर्यवो३म् ।
तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः सपर्यम सपर्यवो३"
मग्निमा४ वह सोममा४ वह विष्णुमा४वह ।

ततो होता उपवेशनादि स्रुगापादनान्तं पूर्ववत् (कुर्यात्) ।

ततो याज्यापुरोनुवाक्ययोर्विपर्यासं कृत्वा पठेत् ।

अग्नयेऽनुब्रू३हीत्युक्ते—

"य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः । अग्ने पुरो रुरोजिथो३म्"(२) ।

अग्निं यजेत्युक्ते—

भूर्भुवर्यं३ यजामहेऽग्निं"मग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुता"४वौ४ षट्"(३) । ओजः सहः सह ओजः स्वः ।

---

(१) ऋ० २।६।१-३ (२) ऋ० ६।१६।३९ । (३) ऋ० ६।१६।३४ ।

आध्वर्यवपद्धतिः ।

अनस्तमिते वाग्बन्धप्रैषादि । त्रिस्तनमेकस्तनं वा(१) गोदोहनप्रैषो मेहनादिपूर्ववत् । अपररात्रे व्रतप्रदानं पूर्ववत् ।.

इति द्वितीयमहः ।

औद्गात्रपद्धतिः ।

अथापराह्णे घर्मोपसदन्ते सोमाप्यायनं निह्नवनं सुब्रह्मण्याह्वानं च कार्यम्

हौत्रपद्धतिः ।

सोमायानुब्रू३ हि—

"अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् । भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोमो३म्"(२) ।

सोमं यज—

भूर्भुवर्यꣳ यजामहे "त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः । त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षा"ꣳ(३) वौꣳ षट् । ओजः सहः सह ओजः स्वः ।

विष्णवेऽनुब्रू३हि—

"तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन । आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहो३म्"(४) ।

विष्णुं यज—

भूर्भुवर्यꣳ यजामहे विष्णुं "यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति । यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसा"(५)द्वौꣳषट् । ओजः सहः सह ओजः स्वः ।

यावदादिष्टं कुर्यात् ।

ततो मदन्तीरुपस्पृश्य पूर्ववदाप्यायनेरोऽभिमर्शनानि च कृत्वा स-

---

(१) "त्रिस्तनं प्रथमायां दोहयति" (का० श्रौ०।८।३।१) प्रथमायामुपसदि त्रिस्तनं व्रतं दोहयेत् । उपसत्स्वेव विशेषवचनाद्दीक्षासु न नियमः । "एकापचयेनोत्तरयोः" (का० श्रौ० ८।३।२) । उत्तरयोर्द्वयोरुपसदोरेकापचयेनैकैकस्तनापसारणेन व्रतं दोहयति । द्वितीयायां द्विस्तनं तृतीयायामेकस्तनमिति भावः । अग्निचयनरहिते क्रतौ विपर्यस्य वा प्रथमायां त्रिस्तनं द्वितीयायां द्विस्तनं तृतीयायामेकस्तनमित्येवं भवति । एवमपि हि श्रुतं "स यासामेकं प्रथमाहं दोग्ध्यथ द्वावथ त्रीनि" (श०ब्रा०३।४।४।२६) त्यादि । अनग्निचित्ये उभयथा श्रवणात् साग्निचित्ये तु नियमेन त्रिस्तनाद्येव व्रतं भवति । अत्र हि "अथातः पयो व्रताया" इति प्रकृत्य "त्रींस्तनानुपैति स द्वौ स्तना उपति स एकस्तनमुपैतीति" पुनः श्रवणात् ।

(२) ऋ० १।९१।२१ । (३) ऋ० १।९१।२२ ।
(४) ऋ० १।१५६।३ । (५) ऋ० १।१५६।२ ।

आध्वर्यवपद्धतिः ।

(अथ तृतीयदिनकृत्यम्)

(तृतीयदिनस्य पौर्वाह्णिकः प्रवर्ग्योपसत्प्रचारः)

अथ तृतीयमहः । प्रातर्विबुद्धवाचनादि वाग्विसर्गान्तं पूर्ववत् ।
व्रतप्रैषे—त्रिस्तनं गावौ धुक्वेति । व्रतकरणम् ।
ततः पूर्ववत्प्रवर्ग्योपसदौ । पक्षे उपसदेव वा । तत्रोपसद्धोमे विशेषः।
"ॐ या ते अग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा ।
उग्रं वचो अपावधीस्वेषं वचो अपावधीत्स्वाहा" (५।८) ।
इदमग्नये रजःशयाय तन्वै ।

औद्गात्रपद्धतिः ।

निह्नवने सव्यान् पाणीनुत्तानान् कृत्वा दक्षिणान्नीचैः कृत्वेति विशेषः ।
अथ तृतीयदिवसे घर्मोपसदन्ते आतिथ्यान्तवत्सोमाप्यायनं निह्नवनं सुब्रह्मण्याह्वानं च कार्यम् । सुब्रह्मण्याह्वाने ह्यहे सुत्यामिति विशेषः ।

हौत्रपद्धतिः ।

व्यान्पाणीनुत्तानान् कृत्वा प्रस्तरे निह्नुवीरन् । इत्येकमुपसदहः ।

इति द्वितीयमहः ।

(अथ तृतीयमहः ।)

(आरम्भात्तृतीयदिनस्य पौर्वाह्णिकः प्रवर्ग्योपसत्प्रचारः)

तत आरम्भात्तृतीयेऽहि द्वितीये चोपसदहि पूर्वाह्णे प्रवर्ग्योपसद्भ्यां चरन्ति ।

तत्र शान्त्यादिशान्त्यन्तः पौर्वाह्णिकः पूर्ववत् (पत्र९१-१२७) प्रवर्ग्यः।
उपसदि विशेष उच्यते । ब्रह्मन् सामिधेनी० । त्रिर्हिङ्कृत्य ।
(१)इमां मे अग्ने समिधमिमामुपसदं वनेरिमा उषु श्रुधी गिरो३म् ।
इमां मे अग्ने समिधमिमामुपसदं वनेरिमा उ षु श्रुधी गिरो३म् ।
इमां मे अग्ने समिधमिमामुपसदं वनेरिमा उ षु श्रुधी गिरो३
मया ते अग्ने विधेमोर्जो नपादश्वमिष्ट एना सूक्तेन सुजातो३म् ।
मया ते अग्ने विधेमोर्जो नपादश्वमिष्ट एना सूक्तेन सुजातो३म् ।
मया ते अग्ने विधेमोर्जो नपानश्वमिष्ट एना सूक्तेन सुजातो३
न्तत्त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः सपर्येम सपर्यवो३म् ।
तन्त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः सपर्येम सपर्यवो३म् ।
तन्त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः सपर्येम सपर्यवो३"
मग्निमावहेत्यादि सर्वं पूर्वदिनीयपौर्वाह्णिक्युपसद्वन्निन्हु(ह्नु)वान्तम् ।

(१) ऋ० २।६।१—३

आध्वर्यवपद्धतिः ।

(वेदिमानम्)

ततो वेदिमानम् । औपवसथ्यात्पूर्वेऽहनि पौर्वाह्णिक्या प्रचर्य वेदिं मिमीते ।

आहवनीयस्य दक्षिणतो महावेदेश्च दक्षिणतो द्विर्द्विर्गार्हपत्याहवनीययोरुत्तरत एकैकमिति षडासनम् ।

ब्रह्मा स्तम्बयजुर्हरिष्यत्याहवनीयदेशं दक्षिणेनास्ते वेदिसहित एवर्त्वि० सर्वत्र प्रागग्नीषोम(मीय)प्रणयनात्कर्मणः कर्मणो वा सहितस्तत्तदेवान्वेति।

अत्र समन्त्रकमासनमिति देवः ।

ततः प्रणीताप्रणयनं (मदन्तीभ्यः) कर्कमते ।

याज्ञिकास्तु न प्रणयन्ति, यतस्तत्पक्षे ताभ्य एव प्रोक्षणीसत्वे अग्नीषोमीये प्रणीतानिषेधात्सप्राणीताप्राणीतप्रोक्षणीभेदेन प्रयोगकाठिन्यम् ।

आहवनीयस्योत्तरतस्तासां निधानं कर्कमते प्रणयनपक्षे ।

आहवनीयस्य पश्चादुत्तरतो वा पञ्चकासादनम्—अग्निहोत्रहवणी वज्रः पवित्रच्छेदनानि पवित्रे अन्तर्धानतृणश्च ।

उपकल्पनीयानि—रज्जुः, शङ्कुः, शम्या, अभ्रिः, पुरीषाहरणम्, प्रोक्षणीः, सिकताः, आच्छादनबर्हिः ।

पवित्रकरणम् । यथायथं प्रणीताभ्यो मदन्तीभ्यो वा प्रोक्षणयः । वज्रं प्रोद्य तदुपग्रहे(णेत)णोत्तरप्रोक्षणम् । असञ्चरे प्रोक्षणीनिधानमग्नीषोमीयार्थं पवित्रयोश्च ।

ततः पूर्वार्द्धात्स्तम्भात्पुरस्तात् त्रिषु (१)प्रक्रमेषु शङ्कुं(२)निहन्ति

हौत्रपद्धतिः ।

(वेदिमानम्)

ततोऽध्वर्यूणां महावेदिमानम् ।

---

(१) प्रक्रमश्चात्र द्विपदः सोमत्वात् । तथा चोक्तं शुल्बकृता—

आधाने पदिकं कुर्यात् द्विपदः सौमिको भवेत् ।
अग्नौ च त्रिपदं कुर्यात् प्रक्रमं याज्ञिको बुधः ।।(श्लो० शु०७।३४) इति ।

अत्र परिमाणं प्रधानयोगादध्वर्यूरेव न यजमानस्य, गुणभूतत्वादस्य इति कर्कमतम् । अन्ये तु "दान-वाचना-न्वारम्भण—वर-वरण-व्रत-प्रमाणेषु यजमानं प्रतीयादि" (का० श्रौ०।१।१०।१२) ति परिभाषणाद्यजमानस्यैव प्रक्रमणमाहुः ।

कात्यायनस्मृतावप्येवमेव—

मानक्रियायामुक्तायामनुक्ते मानकर्तरि ।
मानकृद्यजमानः स्याद्विदुषामेष निश्चयः (६।११) । इति ।

(२) शुल्बसूत्रे शङ्कुपरिमाणाद्युक्तम् ।

आध्वर्यवपद्धतिः।

सोऽन्तःपात्यः । तस्मात्पुरस्तात्पट्त्रिंशति शङ्कुः पूर्वार्द्धसंज्ञः ।

षडङ्गुलपरीणाहं द्वादशाङ्गुलमुच्छ्रितम् ।
जरठं चाग्रणं चैव शङ्कुं कुर्याद्विचक्षणः ॥
द्विवितस्तिप्रमाणस्तु खादिरो मुद्गरस्तथा ।
शङ्कुस्तेन निखातव्यस्तस्मात्तस्य परिग्रहः ॥
एकतश्च ऋजुस्तीक्ष्णः खादिरः सम आयतः ।
शङ्कुः कार्यस्तु शुल्बज्ञैस्तस्यार्द्धं गमयेन्महीम् ॥
(शु०प०७।७-९)

कात्यायनस्मृतावपि—

शङ्कुश्च खादिरः कार्यो रजतेन विभूषितः ।
शङ्कुश्चैवोपवेषश्च द्वादशाङ्गुल इष्यते (१७।३)। इति ।

हविर्यज्ञे तु—

प्रादेशमात्रो हविर्यज्ञे पूर्वलक्षणलक्षितः ।
शङ्कुरामश्चिराः कार्यस्तस्याप्यर्धं निखापयेत् ॥
चतुरस्रं मुद्गरं तत् षोडशाङ्गुलमायतम् ।
अविद्धं क्रमणीयं च दारुमध्याच्च निर्मितम् ॥
(श्लो०शु०७।१०-११) इति)।

सर्वत्र मानादिसाधनोपयोगिनी रज्जुः कात्यायनोक्ता ग्राह्या । सेटशी—

अजीर्णा ग्रथिनी सूक्ष्मा समा श्लक्ष्णा त्वरोमशा ।
रज्जुर्मानाधिका कार्या अध्वरे योगमिच्छता ॥
शाणी वा बाल्वजी चैव वैणवी वा विधीयते ।
रज्जुस्त्रिभयतपाशा त्रिवृत्ता यज्ञकर्मणि ।
रज्जुर्मुञ्जमयी कार्या शणैस्तु परिमिश्रिता ।
कात्यायनो वदत्येवमषोढा कुशबल्वजैः ।
(शु० प० ७।१२-१४) इति ।

अषोडा = अखण्डा ।

अत्रार्थं साधनोपायः । काठके-सौमिकी वेदिं विधित्सन् पञ्चदशसु प्रक्रमेषु लक्षणं कुरुते त्रिपदः प्रक्रमोऽर्द्धचतुर्थपदो वा पदं। पञ्चदशाङ्गुलं द्वादशाङ्गुलं वा तत एकविंशतौ ततश्चिषु ततो द्वादशसु पाशः पूर्वेण प्रारम्भं त्रिषु प्रक्रमेषु शङ्कुं निहन्ति तस्मिन्पाशं प्रतिमुच्य प्राचीमायम्य यदेकविंशतौ तत्र शङ्कुं निहन्ति तस्मिन्पाशं प्रतिमुच्य पञ्चदशसु गृहीत्वा दक्षिणायम्य शङ्कुं निहन्त्येतेनोत्तरोऽन्तो व्याख्यातः । एवं पूर्वार्द्धं विदधाति त्रिषु गृहीत्वा।द्वादशसु तत्र शङ्कुं निहन्तीति । परिशिष्टे च—

पञ्चदश(मथै)मेकविंशं त्रिकमपरं च परतश्चिकं चापि ।
द्वादशसु पाश उत्तमः सोमे रज्जुप्रमाणमेतत् ॥
(श्लो० शु० ७।१६)।

रज्वां पञ्चदशसु प्रक्रमेष्वेकं लक्षणं श्रोण्यङ्कनार्थमाकर्षणार्थं च तदेव, ततः पञ्चदशसु कृतालक्षणात् परं एकविंशे प्रक्रमे द्वितीयं लक्षणं प्राच्यन्ताङ्कनार्थं, ततः परं त्रिषु प्रक्रमेषु तृतीयमाकर्षणार्थं ततोऽपि परं त्रिषु चतुर्थमंसोऽङ्कनार्थं ततः परं द्वादशसु प्रक्रमेष्वन्तिमः पाश इति । एवं चतुःपञ्चाशत्प्रक्रमा रज्जुर्भवतीति । तथा चोक्तं शुल्वकृता ।

आध्वर्यवपद्धतिः ।

अन्तःपात्याद्दक्षिणोत्तरौ च पञ्चदशसु पञ्चदशसु श्रोण्योः शङ्कू । अर्द्ध-सप्तदशेषु वा । पूर्वार्ध्यौ च द्वादशसु द्वादशसु अंसयोः ।

वेदिं परिसमूह्य वितृतीयेऽग्नीदुत्तरत उत्करं करोति । चतुरङ्गुलोच्चां वेदेर्मध्ये प्राक् संस्थां (१)पृष्ठ्यामायम्य अन्तःपात्यदेशे —

"प्रमाणार्द्धं वाऽभ्यस्याभ्यासचतुर्थं (षष्टे) लक्षणं करोति तन्निरूछनमि" (शुल्व० १।१४) ति । तथा—"शाम्बवदर्धं दीर्घचतुरस्रस्ये" (१।१७) त्युक्त्वा "एतेन प्राग्वर्ठंश—वेदिमानानि व्याख्यातानी०" (शु० प० १।१९) ति चोक्तम् ।

अत्र रज्जोः प्रथमं पाशमन्तःपात्ये प्रमुच्य प्राचीं निष्पाद्य "पञ्चदशमथैकविठं० श" मित्येकविठंशे शङ्कुं निहत्य तस्मिन्नन्तिमं पाशं प्रतिमुच्य पञ्चदशे कृतेन लक्षणेन रज्जुं दक्षिणत आकृष्य पञ्चदशे एव शङ्कुं निखनेत् सा दक्षिणश्रोणिः । तेनैव गृहीत्वोत्तरत आकृष्य तत्रैव शङ्कुः सा उत्तरश्रोणिः ।' तत 'स्त्रिकमपर' मित्यनेन गृहीत्वा दक्षिणतो रज्जुमाकृष्य 'परतस्त्रिकमि'त्यस्मिन् शङ्कुः स दक्षिणोऽसः । ततस्तेनैव गृहीत्वोत्तरत आकृष्य तत्रैव शङ्कुः स उत्तरोंसः इति । अत्र यूपावटाच्छङ्कोः पश्चात्पदमात्रं पश्चादन्तराले मुक्त्वा युगमात्री यजमानदशपदप्रमाणा वोत्तरवेदिः साधनीया । प्रक्रमश्चानग्निके सोमे द्विपद इति पूर्वमुक्तम् । अथं च त्रिंशत्प्रक्रमा पश्चादिति पक्षे साधनोपायः ।

त्रयस्त्रिंशत्पक्षे तु-षट्त्रिंशत्प्रक्रमां रज्जुं द्विगुणां द्वासप्ततिप्रक्रमां कृत्वा तस्यां सार्धषोडशे प्रक्रमे श्रोण्यङ्कनार्थं लक्षणं कृत्वा सप्तविंशतितमे निरूछनं श्रोणिसाधने रज्जाराकर्षणार्थं षट्त्रिंशत्तमे च यूपावट्यशङ्कर्थं ततः परं नवसु प्रक्रमेषु अंससाधनकाले रज्जोराकर्षणार्थं ततोऽन्तिमात्पाशाद्द्वादशे प्रक्रमेऽसाङ्कनार्थमित्येवं विधया रज्वा साधनम् ।

अत्राहापस्तम्बः—"प्राग्वंशस्य मध्यमाल्ललाटिकात् त्रीन् प्राचः प्रक्रमान् प्रक्रम्य शङ्कुं निहन्ति । तस्मात्पञ्चदशसु दक्षिणतः । एवमुत्तरतस्ते श्रोणी । प्रथमनिहिताच्छङ्कोः षट्त्रिंशति पुरस्तात्तस्माद्द्वादशसु दक्षिणत एवमुत्तरतस्तावंसौ । विमिमेत्वा पथस्वर्ती देवानां धेनुं सुदुघामनपस्फुरन्तीम् । इन्द्रः सोमं पिबतु सोमो अस्तु न । इति विमानः । सर्वतः स्यन्द्यया पर्यातनोति । मध्ये पृष्ठ्यामि"ति (आप० श्रौ० ११।४।१२—१६)। सन्नमनं च मध्ये सङ्गृहीतत्वम् । तथा चोक्तं दर्शपूर्णमासयोः—"मध्ये सन्धारिता (श० ब्रा० १।२।३।१६) "मध्येसन्ततरा भवती"ति अतो महावेद्यां संग्रहाभावः ।

(१) पृष्ठे भवा पृष्ठ्या वेदिलेखामायतां कृत्वेति पितृभूतिः । वरण्डकमिति कर्कः । पृष्ठेति संज्ञाकरणं संव्यवहारार्थं "मनुपृष्ठ्यां बर्हिस्तृणाती" (का०श्रौ०९।७।६) त्यादौ ॥

अत्रायं देवोक्तः क्रमः—पूर्वं शालामध्याग्निषु प्रक्रमेषु शङ्कुनिखननम् । ततो द्विरासनम् । ब्रह्मणः समन्त्रकमुत्तरवेदिदेशं दक्षिणतो बर्हिर्वेद्युपवेशनं वेदिपृष्ठस्य यजमानस्य च । यजमान वाचं यच्छेति प्रैषः, ततोऽग्निहोत्रहवण्यादीनां वेदिमानोपयोगिनां पात्राणामासादनं शालाद्वार्यस्य पश्चादुत्तरतो वा, ततो वाग्यमः । पवित्रच्छेदनादि तेषां प्रोक्षणं प्रोक्षणीनां पवित्रयोश्च यत्नेन रक्षणं, ततो वेदिमानं परिसमूहनं, उत्करकरणं, पृष्ठ्याकरणं, ततः स्फ्यादानादि ।

आध्वर्यवपद्धतिः ।

स्फ्यादि करोति (१)खादिरेणाच्छादनात् । उपरवदेशात्स्तम्बयजुर्हरति । अन्तःपात्ये उपविश्य पूर्वपरिग्र हप्रैषः । यूपावटावधिदक्षिणत उत्तरतश्च परिग्रहः । उपरवदेशे एव त्रिरुल्लेखः । सम्मार्जनान्ते (संमर्शनान्ते) ऽन्तःपात्ये महावेद्यां प्रणीतानियनमपरीत्यैव "कस्त्वे"(शु०य०सं०२।२३)ति । कर्कमते प्रणीताप्रणयनपक्ष एवैतत् ।

सम्मर्शनान्ते चात्वालमानम् । महावेदेरुत्तरार्धसात्पश्चा(२)दध्यर्धे पदे चात्वालं(३) यथोक्तं वा । शम्यामादाय चात्वालं मिमीते पूर्वेणोत्करर्ठ०सञ्चरं परिहाप्य । शम्यामुदीचीं निदधाति पुरस्ताच्च दक्षिणतः प्राचीमुत्तरतश्च स्फ्येनान्तर्लिखति तप्तायनीति प्रतिमन्त्रम् ।

"ॐ तप्तायनी मेऽसि ।
ॐ वित्तायनीमेऽसि ।
ॐ अवतान्मा नाथितात् ।
ॐ अवतान्मा व्यथितात्" ("।९) ।

विदेदग्निरिति चात्वाले प्रहरति स्फ्येनान्वारब्धे यजमानेन ।

"ॐ विदेदग्निर्नभो नाम" (५।६) ।

अग्ने आङ्गर इति पुरोषर्ठ०हरति हस्तेन च । चा(त्वाला)त्स्फ्येन ।

"ॐ अग्ने अङ्गिर आयुना नाम्नेहि" (५।९) ।

योऽस्यामिति निवपति पूर्वार्द्धे शङ्कुसहितम् ।

---

(१) शाखान्तरात् । स्फ्यादानमप्युरवदेश एव कर्तव्यं तदर्थत्वात्, देशान्तरस्यानुपदेशाच्च ।

ननु "खादिरः स्रुवः, स्फ्यश्च" (का० श्रौ० १।३।३३—३४) इति परिभाषितत्वात्खादिर एव स्फ्यः, किमर्थं पुनरुच्यते खादिरेणेति । अत्रोच्यते—"खादिरो यूपो भवति खादिर स्फ्य" इति स्फ्ययूपयोरेकजातीयत्वं श्रुतम् (श० ब्रा० ३।६।२।१२) तत्र यदि खादिराभावे सोमे वैल्वो वा रौहितको वा (का० श्रौ० ६।१।९) यूपः स्यात्तदा स्फ्यस्यापि तज्जातीयत्वशङ्कानिवृत्त्यर्थं पुनः खादिरेणेत्युक्तम् ।

(२) अत्र पितृभूतिस्तु—अध्यर्धे पदे अतिक्रम्य चात्वालं परिलिखेत्, पदशब्देन प्रक्रमस्तथा श्रुतत्वादिति वर्णितवान् ।

(३) "यत्रैव स्वयं मनसा मन्येताग्रेणोत्करमि (श० ब्रा० ३।९।१।२६) त्यादि श्रुतेः । चात्वालशब्देन पुरीषार्थं खातोऽभिधीयते । परिशिष्टे त्वेवमुक्तमस्ति—

चात्वालदुत्करं कुर्यादूवपरेण रथान्तरम् ।
उत्कराद्रुत्तरं कुर्यादूवध्यस्य रथान्तरम् ॥
ऊवध्यात्पूवतः कुर्याच्छामित्रस्य रथान्तरमिति ।

अत्र स्फ्यशम्यादानशुत्तरवेदि छादनान्तं इह कर्तव्यम् ।

आध्वर्यवपद्धतिः ।

"ॐ योऽस्याम्पृथिव्यामसि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे" (५।६) ।

अग्नीदुत्करवत्तूष्णीं हृतम् । एवं द्विरपरम् । मन्त्रे अस्यामिति पदस्थाने द्वितीयस्यां तृतीयस्यामिति विशेषः ।

ततस्तूष्णीमभ्रया खात्वा अनुत्वेति चतुर्थं यथार्थमाहृत्य ।

"ॐ अनुत्वा देववीतये हरामि" (५।६) ।

सिंह्यसीति व्यूहत्युत्तरवेदिम् ।

"ॐ सिंह्यसि सपत्नसाही देवेभ्यः कल्पस्व" (५।१०) ।

अपरेण यूपावटदेशर्ठ० सञ्चरमवशिष्य वेद्यां युगमात्रीं यजमानदशपद्यां वोत्तरवेदिं यथासम्भवमुच्चां करोति ।

युगमात्रिस्त्र्यरत्निः स्यादङ्गुलानि चतुर्दश ।
सञ्चारश्चार्थवांश्चापि शस्यतेऽपि दशाङ्गुलः ॥

इति युगमात्रीमानं परिशिष्टे ।

पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी तस्यादक्षायारज्जुर्दशकरणी- (का० शु० सू० २।८) ति दशपद्यामानम् ।

तस्या मध्ये नाभिं करो ति प्रादेशसमां चतुःस्रक्तिमीषदुच्चाम् ।

लौकिकीभिरुपकल्पिताभिरद्भिः प्रोक्षत्युत्तरवेदिंसिकताश्च प्रकिरति सिंह्यसीति प्रतिमन्त्रम् ।

"ॐ सिंह्यसि सपत्नसाही देवेभ्यः शुन्धस्व ।
ॐ सिंह्यसि सपत्नसाही देवेभ्यः शुम्भस्व" (५।१०) ।

एतांरात्रिं वस्त्रादिनैषा(१)च्छन्ना वसति ।

इति वेदिमानम् ।

(आरम्भात्तृतीयदिनस्यापराह्णिकः प्रवर्ग्योपसत्प्रचारः)

अपराह्णे शालाद्वाराण्यपिधाय यथोक्तं व्रतप्रदानम् ।

ततोऽपराह्णे प्रवर्ग्योपसद्भ्यां प्रचर्य रौहिणहोमो "रात्रिः केतुने" औद्गात्रपद्धतिः ।

अथापराह्णे घर्मोपसदन्ते सोमाप्यायनं निह्नवनं सुब्रह्मण्याह्वानं च हौत्रपद्धतिः ।

(आरम्भात्तृतीयदिनस्यापराह्णिकः प्रवर्ग्योपसत्प्रचारः ।)

तत अपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां चरन्ति ।

---

(१) छादने विशेष आपस्तम्बेनोक्तः "उदुम्बरशाखाभिः प्लक्षशाखाभिर्वा प्रच्छन्ना वसती" (श्रौ० ११।५।६) ति ।

आध्वर्यवपद्धतिः ।

(३७।२१) ति ।

अग्निहोत्रहोमे राज्यग्निपदविशिष्टो मन्त्रः । उपसद्धोमे "रजःशये" (५।८)ति विशेषः ।

अनस्तमिते प्रैषादि । द्विस्तनं गावौ धुक्षेति प्रैषः । व्रतग्रहणम् । अपररात्रे व्रतप्रदानम् ।

इति तृतीयमहः ।

(अथ चतुर्थमहः ।)

अथौपवसथ्यं चतुर्थमहः । विधुक्षवाचनादिव्रतकरणान्तं पूर्ववत्

औदुम्बरपद्धतिः ।

कार्यम् । निह्नवने सव्यान् पाणीनुत्तानान् कृत्वा दक्षिणाग्नीधैः कृत्वेति विशेषः ।

(अथ चतुर्थमहः ।)

अथ चतुर्थदिवसे घर्मोपसदन्ते आतिथ्यान्तवत्सोमाप्यायनं निह्नौत्रपद्धतिः ।

तत्र शान्त्यादिशान्त्यन्तः पूर्वदिनापराह्णप्रवर्ग्यवत्प्रवर्ग्यः ।

उपसाद विशेष उच्यते—

ब्रह्मन्त्सामि० । हिंहिंहिं (१)"उपसद्याय मीळ्हुष आस्ये जुहुता हविर्यो नो नेदिष्ठमाप्योऽम् ।

उपसद्याय मीळ्हुष आस्ये जुहुता हविर्यो नो नेदिष्ठमाप्योऽम् ।

उपसद्याय मीळ्हुष आस्ये जुहुता हविर्यो नो नेदिष्ठमाप्योऽ

म्यः पञ्च चर्षणीरभि निषसाद दमे दमे कविर्गृहपतिर्युवोऽम् ।

यः पञ्च चर्षणीरभि निषसाद दमे दमे कविर्गृहपतिर्युवोऽम् ।

यः पञ्च चर्षणीरभि निषसाद दमे दमे कविर्गृहपतिर्युवोऽ

स नो वेदो अमात्यमग्नी रक्षतु विश्वत उतास्मान्पात्वंहसोऽम् ।

स नो वेदो अमात्यमग्नी रक्षतु विश्वत उतास्मान्पात्वंहसोऽम् ।

स नो वेदो अमात्यमग्नी रक्षतु विश्वत उतास्मान्पात्वंहसोऽ॥

मग्निमाषहेत्यादि पूर्वदिनीयापराह्णिक्युपसद्वन्निन्हवान्ता ।

इति द्वितीयोपसद्दिनम् ।

इति तृतीयमहः ।

(अथ चतुर्थमहः ।)

(आरम्भाच्चतुर्थदिनस्य पौर्वाह्णिक्यौ प्रवर्ग्योपसदौ ।)

ततस्तृतीये उपसदन्हि=आरम्भाच्चतुर्थे उपवसथसंज्ञकेऽहि प्रातः

---

(१) ऋ० ७।१५।१—३ ।

आध्वर्यवपद्धतिः ।

(पृष्ठ ३३) । तत्र एकस्तनं त्रिस्तनं वेति प्रैषे विशेषः ।

(आरम्भाच्चतुर्थदिनस्य पौर्वाह्णिक्यौ प्रवर्ग्योपसदौ ।)

ततः पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां (प्रचरेत्) प्रचर्य तत्रोपसद्धोमे विशेषः—

"ॐ या ते अग्ने हरिशया तनूर्वर्षिष्ठा गह्वरेष्ठा ।
उग्रं वचो अपावधीत्वेषं वचो अपावधीत्स्वाहा" (५।८) ।
इदमग्नये हरिशायै तन्वै ।

(आरम्भाच्चतुर्थदिनस्यापराह्णिक्यौ प्रवर्ग्योपसदौ)

द्वारापिधानम् । (१)अर्धव्रतप्रदानम् ।

पुनस्तदानीमेवापराह्णिक्यौ प्रवर्ग्योपसदौ पूर्ववत् । (२)उभाभ्यां

औद्गात्रपद्धतिः ।

वनं सुब्रह्मण्याह्वानञ्च कार्यम् । सुब्रह्मण्याह्वाने श्वः सुत्यामिति विशेषः ।

अथापराह्णे घर्मोपसदन्ते सोमाप्यायनं निह्नवनं सुब्रह्मण्याह्वानञ्च

हौत्रपद्धतिः ।

प्रवर्ग्योपसद्भ्यां चरन्ति । तत्र शान्त्यादिशान्त्यन्तः पौर्वाह्णिकः पूर्ववत्प्रवर्ग्यः ।

उपसदपि प्रथमदिनपूर्वाह्णोपसद्वन्निह्नवान्ता ।

(आरम्भाच्चतुर्थदिनस्यापराह्णिक्यौ प्रवर्ग्योपसदौ ।)

ततः पूर्वाह्ण एव अपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां चरन्ति ।

---

(१) यजमानायार्द्धव्रतं प्रयच्छेत्, न्यायस्य च समानत्वात्पत्न्यै च । तथा च मानवे—"उत्तमायामुपसदि पूर्वाह्णिकीं कृत्वा शालामच्छैति । अर्धव्रते प्रदाय सद्यः कुर्यादापराह्णिकीं" (२।२।२।१) मिति । "अपराह्णे वेदिं स्तीर्त्वाऽऽहुव्रतं प्रदाय सम्प्रपद्यन्त" इति आम्नतत्वादर्धव्रतं प्रदत्तमिति गम्यते । यजमानः पत्नी च तदानीमेव व्रतयतः । व्रतस्यार्द्धं समविभक्तं अर्धव्रतम् । "अर्द्धं नपुंसकं" (पा० २।२।२) मिति समासः । तेन यावद्व्रतार्थं दुग्धं भवति त्रिस्तनमेकस्तनं वा तस्य समविभक्तं अर्द्धं दद्यान्न न्यूनातिरिक्तं वा ।

(२) उभाभ्यामुपसद्भ्यां चरिते प्रवर्ग्यं महावीरं यथोक्तमुत्सादयति यथाप्रवर्ग्याध्याये उक्तं "उपसदन्ते प्रवर्ग्योत्सादन" (का० श्रौ० २६।७।१) मित्यत्र । चेच्छ्रोत्रियोऽनूचानः प्रथमयज्ञेऽपि प्रवर्ग्यं कुर्यात् । "स वै तृतीयेऽहन् षष्ठे वा द्वादशे वा प्रवर्ग्योपसदौ समस्य प्रवर्ग्यमुत्सादयती" (श० ब्रा० १४।३।१।१) ति श्रुतेः ।

अग्नौचयने विशेषः । तत्र पौर्वाह्णिक्योपसदा प्रचर्य सर्वं वा व्रतं यजमानाय प्रयच्छेदर्धव्रतं वा । तथा च श्रवणात् "प्रत्येत्य प्रवर्ग्योपसद्भ्यां प्रचरति प्रवर्ग्योपसद्भ्यां प्रचर्याथास्मै व्रतं वार्धव्रतं वा प्रयच्छत्यथ प्रवर्ग्योपसद्भ्यामि" (९।२।१।१८)। ति अनग्निचित्ये नियमेनार्धव्रतमेव, साग्निचित्ये तु विकल्पः ।

आर्ध्यवपद्धतिः ।

चरिते सुब्रह्मण्यान्ते प्रवर्ग्यमुत्सादयति सप्रवर्ग्ये ।

औद्गात्रपद्धतिः ।

कार्यम् । निह्नवने सव्यान् पाणीनुत्तानान् कृत्वा दक्षिणाग्नीधैः कृत्वेति विशेषः ।

हौत्रपद्धतिः ।

तत्र शान्त्यादिशान्त्यन्तः आपराह्णिकः पूर्वाह्णवत्प्रवर्ग्यः ।
उपसदपि प्रथमदिनापराह्णिकयुपसद्वन्निह्नवान्ता ।
यथा प्रथमे तथा तृतीये । एवमेतास्तिस्र उपसदः(१) ।

---

(१) स्वश्रुतौ तिस्र उपसदः । श्रुत्यन्तरे तु ज्योतिष्टोम एव द्वादशाप्याम्नाताः । तत्र प्रथमेऽहनि या क्रिया सैव चतुर्हं(प्रथमद्वितीयतृतीयचतुर्थदिवसेषु)भवति । तथा द्वितीयेऽहनि या क्रिया सा चतुरहं (पञ्चमषष्ठसप्तमाष्टमदिनेषु) भवति । या तृतीयेऽहनि क्रिया सा चतुरहं (नवमदशमैकादशद्वादशस्वहःसु) भवति एवमेताः स्वकाला एव विवर्द्धरन्नेवं क्रमो बाधितो न भवति । तदुक्तं जैमिनिकात्यायनाभ्याम्—"स्वस्थानात्तु विवृध्येरन् कृतानुपूर्व्यत्वात् (५।३।३) स्वस्थानविवृद्ध (८।३।९) रि"ति । न्यायमालायां च—

"आवृत्तिरुपसत्स्वेषा संघत्यैकैकगाऽथवा ।
त्रिरध्यायं पठेत्यादाविव स्यात्समुदायगा ॥
प्रथमा मध्यमान्त्येति प्राकृतक्रमसिद्धये ।
एकैकस्या द्विरभ्यासे षट् सङ्ख्यापि प्रसिद्ध्यति ॥ (५।३।३-४।) इति ।

अत्र शाङ्खायनः—अहरहर्वा विपर्यासः (५।१२।१६) यद्युपसदो विवर्धेरन् प्रत्यहं वा विपर्यासं कुर्यात् । एवमपि श्रुतत्वात् । केचित्तु श्रुतिमन्यार्थां मन्यमानाः पूर्वपक्षमेतदिच्छन्ति । सिद्धान्तसूत्रं तु स्वकालास्तु विवर्धरन्" (शां. श्रौ. ५।१२।१६) इति ।

एवमुपवसथे = सुत्यायाः पूर्वस्मिन्नहनि प्रातरेव पौर्वाह्णापराह्णिके उपसदौ समाप्य प्रवर्ग्यरहिते यज्ञेऽग्निप्रणयनं भवति, सप्रवर्ग्ये यज्ञे तु प्रवर्ग्योपसदौ समाप्य महावीरपात्रोद्वासनं भवति ततोऽग्निप्रणयनम् । तदुक्तं कात्यायनाचार्यैः—"उभाभ्यां चरिते प्रवर्ग्यमुत्सादयति यथोक्तं कुर्याच्चे (८।३।१८) दि"ति ।

यदाध्वर्यवोरन्तःपात्यदेशस्थापितानां प्रवर्ग्यपात्राणामुत्तरवेदौ निधानार्थमुद्वासनं करोति तदा ब्रह्मा दक्षिणतः प्रकृतिवन्मन्त्रेणोपविशेद्यजमानोऽप्यमन्त्रकः ।

ततो निष्क्रमणकालेऽध्वर्यवः प्रस्तोतारं प्रेष्यति ततः प्रस्तोता 'त्यमूषुरि'ति साम त्रिषु स्थलेषूद्गायति तत्र "ए३। विश्वं न्यत्रिणं न्दहा २३४५ । ए३। विश्वं न्यत्रिणन्दहा २३४५ ॥" इति निधनं त्रिषु स्थलेषु होता पठेत् । यदापि सौत्येऽहनि प्रवर्ग्यस्तदापि होतुर्निधनपाठः ।

यदा यजमानव्रतदुघां होत्रे यजमानो ददाति तदा होता रुद्राये (शां० श्रौ० ७।१७।२) ति तां प्रतिगृह्णीयात् । यदा च प्रवृज्यनीयौ शतमानौ ब्रह्मणे ददाति तदा ब्रह्मा अग्नये त्वे (शां० श्रौ० ७।१७।१)त्यादिना प्रतिगृह्णीयात् । इति प्रवर्ग्योत्सादने होतृप्रयोगः ।

आध्वर्यवपद्धतिः ।

(अथ प्रवर्ग्योत्सादनम् ।)

अथ प्रवर्ग्योत्सादनम् । उपसदन्ते (१)प्रवर्ग्योत्सादनम् । अन्तःपात्ये वेदिमध्ये परिधमर्यं निधाय पूर्वापरौ खरावपि तत्रोत्तरतः दक्षिणेन निर्हृत्योच्छिष्टखरं दक्षिणतो विप्रकृष्टं निदधाति ।

दक्षिणेनाहवनीयं तूष्णीं(२) ब्रह्मास्ते ।

आहवनीये त्रीन् शालाकान्प्रदीप्य प्रदीप्याग्नीध्रो धारयति शतरुद्रियवत्प्रतिलोमं प्रमाणेषु ।

औदुम्बरपद्धतिः ।

(अथ प्रवर्ग्योत्सादनम् ।)

अथ प्रस्तोता प्रवर्ग्योद्वासनकाले उत्तरेण सम्राडासदङ्कृत्वा पश्चात्तिष्ठन्नध्वर्युप्रेषितस्त्यग्नायिरिति प्रवर्ग्यसाम सकृद्गायेत् ।

बृहस्पति ऋषिः, अत्यष्टिश्छन्दः, अग्निर्देवता ।

त्यग्नायिः । प्रतिदहति । (संहितायान्तु दीर्घान्तः पाठः) हाउ हो ५ हाउ । अग्निꣳहो तारम्मा ३ न्ये ३ दास्वन्तम् । (३) (त्यग्नायिः०।) वसोः सूनुर्ठ० सहसो जा ३ ता ३ वेदसम् (त्यग्नायिः०) विप्राम् । न जा ३ ता वेदसम् (त्यग्नायि०) य ऊ । ध्वया ३ सु ३ वध्वरः । (त्यग्नायिः०।) देवो । देवा ३ चो ३ याकृपा (त्यग्नायि०।) घृता । स्य विभ्राष्टिमनु शू ३ क्रा शोचिषः (त्यग्नायिः०।) आजु । ह्वाना ३ स्या ३ सपिषः । (त्यग्नायिः) प्रतिदहति। हा उ हो ५ हाउ । वा । ए ३ । विश्वर्ठ० समत्रिणं दहा २३४५ । ए ३ । विश्वं व्यत्रिणन्दहा २३४५ । ए ३ । विश्वं न्यत्रिणं दहा २३४५ (४) ॥२४॥ (५)

---

(१) प्रवर्ग्योत्सादनमिति संज्ञा संव्यवहारार्था । अत्र प्रवर्ग्यशब्देन तत्सबंधीनि पात्राणि लक्ष्यन्ते । तेषां तत्स्थानात् निष्कासनं प्रवर्ग्योत्सादनम् ।

(२) अत्र प्रवर्ग्यं दक्षिणाग्निमपरेण वा शकटस्य वा पूर्वेण परेण वा गार्हपत्यस्य दक्षिणत आहवनीयस्य वा दक्षिणत आसीत ब्रह्मा । तथा च कात्यायनः—दक्षिणाग्निं वाऽपरेण घर्मं (११।१।९) इति ।

(३) कुटिलरेखाद्वयान्तर्गतपाठा न दृश्यन्ते संहितायाम् ।

(४) संहितायां तु नीचैर्लिखितवान् पाठः ।

"ए ३ । विश्वर्ठ० समत्रिणन्दह । ए ३ । विश्वं व्यत्रिणं दह । ए ३ । विश्वं न्यत्रिणं दहा २ ३ ४ ५" इति ।

(५) छ० अ० ५।२।३।९। गे०गा १२।१।३८

आध्वर्यवपद्धतिः ।

तिसृभिः शलाकाभिरेकः शालाकः ।

(१)पूर्णाहुतिवदान्यꣳसꣳस्कृत्य चतुर्गृहीतेनाभिजुहोति या ते घर्म दिव्या शुगिति प्रतिमन्त्रम् ।

अध्वर्युस्तिष्ठन्नाज्यतृतीयांशं (२)मुखसमीपे(सम्मिते)ऽग्नीधा धारिते प्रदीप्ते शालाके जुहोति ।

"ॐ या ते घर्म दिव्या शुग्या गायत्र्याꣳहविर्द्धाने ।
सा त आप्यायतां निष्ठ्यायतान्तस्यै ते स्वाहा" (३८।१८) ।
इदं घर्माय ।

अग्नीत् शालाकमग्नौ प्रक्षिप्य द्वितीयं प्रदीप्य नाभिमात्रे धारयति ।

अध्वर्युस्तिष्ठन्नेव तत्र जुहोति ।

"ॐ याते घर्मान्तरिक्षे शुग्या त्रिष्टुभ्याग्नीध्रे ।
सा त आप्यायतां निष्ठ्यायतां तस्यै ते स्वाहा" । (३८।१८)
इदं घर्माय ।

अग्नीच्छालाकमग्नौ प्रास्य तृतीयं प्रदीप्य जानुमात्रे धारयति ।

अध्वर्युः प्रास्याग्नौ शालाकं तृतीयं, उपविश्य जुहोति ।

"ॐ या ते घर्म पृथिव्याꣳशुग्या जगत्याꣳसदस्या ।
सा त आप्यायतां निष्ठ्यायतान्तस्यै ते स्वाहा" । (३८।१८) ।
इदं घर्माय ।

अध्वर्योः क्षत्रस्य त्वेति निष्क्रमणं पुरस्तात्पत्नीमन्तर्धाय(३) ।

सर्वेषां तूष्णीं निष्क्रमणम् ।

"ॐक्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि ।
विशस्त्वा धर्मणा व्वयमनुक्रामाम सुविताय नव्यसे" (३८।१९) ।

अन्तःपात्ये तिष्ठन् साम प्रेष्यति । साम गाय । अवभृथवद्देशाः निधनं च(४) । सपत्नीयजमाना धर्मर्त्विजः सर्वेऽत्र निधनं त्रिर्ब्रूयुः ।

औद्गात्रपद्धतिः ।

एविश्वमित्यादीनि त्रीणि निधनानि धर्मोपयुक्ताः सर्व्वे ब्रूयुः । पत्नी च ब्रूयात् । एवम्मध्ये हवनीयस्थाने च गायेत् ।

---

(१) निरूप्याज्यं गार्हपत्येऽधिश्रित्य स्रुक्स्रुवं च सम्मृज्योद्वास्योत्पूयावेक्ष्य चतुर्गृहीतं समित्पूर्वकमिति भावः ।

(२) मुखमात्रादिप्रमाणं यजमानस्यैव "दान-वाचना-स्वारम्भण-वर-वरण-व्रत-प्रमाणेषु यजमानं प्रतीया (का, औ० १।१०।१२) दित्युक्तेः ।

(३) "अथोपनिष्क्रमति क्षत्रस्य त्वेति" (१४।३।१।९) श्रुतेः । पत्न्यन्तर्धानं शाखान्तरात् । (४) चकारादाहृतमादायोत्सादनदेशं गच्छन्तीत्येतदप्यवभृथवद्भवति ।

आध्वर्यवपद्धतिः ।

(१)उत्सादनदेशं गच्छन्त्यनग्ना उत्तरवेदिम् ।

अर्द्धपथे स्थित्वा साम प्रैषो गानं निधनानि । ततस्तथैवोत्तरवेदिसमीपे । ततो जलेनोत्तरवेदिं त्रिः परिषिच्याचिक्रददिति(२) ।

"ॐअचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।
सꣳ० सूर्य्येण दिद्युतदुदधिर्निधिः" (३८।२२) ।
ईशानकोणादारभ्य सकृन्मन्त्रेण त्रिस्तूष्णीम् ।
मन्त्रक्रमेण वाऽग्रे परिषेचनम् । अन्ते इतरथावृत्तिः ।
महावेदेर्दक्षिणतः समन्त्रं ब्रह्मास्ते ।
अध्वयुर्नाभिस्पृशं प्रवृञ्जनीयं महावीरं निदधाति चतुःस्रक्तिरिति ।
"ॐचतुः स्रक्तिर्नाभिर्ऋतस्य सप्रथाः ।
स नो विश्वायुः सप्रथाः ।
स नः सर्वायुः सप्रथाः ।
अपद्वेषो अप ह्वरो ऽन्यव्रतस्य सश्चिम" (३८।२०) ।

प्राञ्चावितरौ तत्पुरतः। प्रत्येकं मन्त्रः । उपशयां च तत्पुरतस्तूष्णीम् । परीशासावभितः। रौहिणहवन्यौ चावकृष्टे वाह्ये। अग्निमुत्तरतः।आसन्दीं दक्षिणतः । कृष्णाजिनमुत्तरतः । सर्वतो धवित्राणि प्राग्वꣳशे परिधींश्च तथा रज्जुसन्दानं वेदमुपयमन्यामाधाय पश्चात् पिन्वने चाभितो दण्डं स्थूणामयूखं पश्चाद्रौहिणकपाले धृष्टी च मध्येऽन्यत्स्रुवकूर्चादि । खरावुत्तरतः पूर्वापरौ । दक्षिणतो मार्जालीयदेशं (३)बहिर्वेदुच्छिष्टखरं आ-

औद्गात्रपद्धतिः ।

प्रस्तोता परिषिच्यमाने घर्मे परिषेकजलमुपस्पृश्याचिक्रददिति वार्पाहरन्त्रगायेत् ।

---

(१) उत्सादनं = महावीराणं परित्यागः । तस्य देशोऽग्निचयने परिस्यन्दो विहितः ।(श०ब्रा०९।२।१।१९) स च जलपरिवृतो द्वीपो निर्जलो भूभागः । अनग्निचित्ये उत्तरवेदिरेव उत्सादनदेशः ।

(२) आग्नापस्तम्बे विशेषः—"अपां मध्य उद्गासयेन्नदीद्वीपे वोद्गासयेद्यदि नदीद्वीप उद्गासयेन्न परिषिञ्चे (१६।१६।२-३) दि"ति । तेन परिष्यन्दस्य परिषेको न भवति स्वत एव तस्याद्विवेष्टितत्वादिति ।

(३) ननु "आग्नीध्राद्दक्षिणर्ठ० सम्प्रति वेद्यन्ते दक्षिणामुखो मार्जालीय (का० श्रौ० ८।६।२०) मिति वेद्यन्त एव मार्जालीयस्य विधानान्मार्जालीयं दक्षिणत इत्येतावतैव बहिर्वेदित्वसिद्धेर्व्यर्थं बहिर्वेदिरिति । सत्यं अत एव वेद्यन्तसन्निहितं न भवतीति प्रतीयते । अत एव सूत्रकारेण सम्प्रतीति तत्रोक्तम् । सम्प्रति—सन्निहितं न संश्लिष्टमिति । अत एव महाव्रते छन्दोगसूत्रे—"शूद्रार्यौ चर्मणी" (तां० ब्रा०५।६।१४) ज्ञा०श्रौ०१३।३।९) त्यत्रार्यस्य मार्जालीयं दक्षिणतोऽन्तर्वेद्यवस्थानमुक्तम् । "मार्जालीयन्दक्षिणेनान्तर्वेदि आर्यो बहिर्वेदि शूद्र" इति ।

आध्वर्यवपद्धतिः ।

सेचनवन्ति पयसः पूरयति घर्मैतत्त इति ।

ॐघर्मैतत्ते पुरीषं तेन वर्धस्व चा चप्यायस्व ।

वर्धिषीमहि च वयमा च प्यासिषीमहि (३८।२१)।

महावीरत्रयं—(पिन्वन)(त्रे)-स्रुक्-स्रुवाणां सप्तानां सशेषं पूरणं प्रत्येकं मन्त्रः ।

शेषं व्रतमिश्रं दीक्षिताय प्रयच्छति व्रतं चेत्केवलम् ।

अत्र वा परिषेचनम् ।

वार्षाहरेष्टाहोत्रीये सामनी गायेति प्रेष्यति ।

वार्षाहरर्ठं० साम गाय ।

नात्र निधनपाठः सर्वेषाम् ।

इष्टाहोत्रीयर्ठं साम गाय ।

निधनपाठः सर्वेषाम् ।

औद्गात्रपद्धतिः ।

वृषाहरि ऋषिः गायत्रीछन्दः सोमोदेवता—

अचिक्रदा३त् । आचिक्रदा३त । अचिक्रदा५दे । वृषाहरा ३ यि । वार्षाहरा३यि । वृषाहरा३ए । महान्मित्राः ३ । माहान्मित्राः ३ । महान्मित्राः ५ए । नदर्शताः ३ । नादर्शता ३ः । नदर्शता५ए । सर्ठ०सूरिया३यि । साꣳसूरिया३ई । सꣳसूरिया५ए । णादिद्युता३यि । णादिद्युता३यि । णदा५यिद्युताउ । वा(१) ॥ २५ ॥

परिषिक्ते घर्मे इष्टाहोत्रीयं त्रिर्गायेत् ।

अप्सराऋषिः गायत्रीछन्दः आपोदेवता ।

इष्टा होत्राः । आसुत्ता २३४ ता । इन्द्रं वृधा । तो २ ध्वा २३४ रा·यि । आछा३वोमु । थमो३जा ५ सा ६५६ । ए ३। उदधिर्निधी(२) ॥२६॥

घर्मोपयुक्ताः सर्वे निधनं ब्रूयुः ।

प्रस्तोतापत्नीशालां प्रत्यावजन्नभिप्रव इति श्यैतं तृचे गायेत् ।

श्यैतऋषिः बृहतीछन्दः इन्द्रो देवता—

अभिप्रवः सुरा । धसा ३४ ओहो वा । आविन्द्रमर्च । यथाविदा

(१) छ० आ० ६।१।२।१—गे० गा० १४, १, १,

(२) छ० आ० २,२, १, ७,—गे० गा ४, २, १२ ।

आध्वर्यवपद्धतिः ।

चात्वाले मार्जयन्ते सपत्नीकाः सुमित्रिया न (१)इति धर्मर्त्विजः पाणिनैवाङ्गिः ।

"ॐ सुमित्रिया न आप ओषधयः सन्तु ।
दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः" (१८।२३)
उद्वयमित्युत्क्रामत्युत्तरपूर्वार्द्धे यजमानः ।
"ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ॥
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्" (३८।२४) ।
अनपेक्षमेत्यैधोऽसीति समिधमादाय यजमानः ।
"ॐ एधोऽस्येधिषीमहि" (३८।२५) ।
आहवनीयेऽभ्यादधाति समिदसीति ।
"ॐ समिदसि तेजोऽसि तेजो मयि धेहि" (३८।२५) ।
पत्नी च गार्हपत्ये तूष्णीम् (२) ।

औद्गात्रपद्धतिः ।

२३४ इ । ओ३हा । योजरितृभ्यः । माघा २३ वा । पुरुतृ २ वा २३४ सू । सहस्रेणायिवा ३ शा । हुम्मायि । क्षा २ ता २३४ औहोवा ॥ + ॥ सहस्रेणे वशि । क्षता ३४ औ हो वा । साहस्रेणे । वशायिक्षता २३४ यि । शतानीकेव । प्राजा २३ यिगा । तिधा २ । ष्णू २३४ या । हन्ति वृत्राणी ३ दा । हुम्मायि शुश्रुषा २३ औ हो वा ॥ + ॥ हन्तिवृत्राणिदा । शुषा ३४ औ हो वा । हान्तिवृत्रा । णिदाशुषा २३४ यि । ओ३ हा । गिरे रिधप्र । रासा २३ आ । स्य पा२यि । न्वा २३४ यि रायि । दत्राणिपुरू ३ भो । हुम्मायि । जा २ सा २३४ औहोवा । वा २३४ सू(३) ॥ २७ ॥

---

(१) "अथ चात्वाले मार्जयन्ते सुमित्रिया न" (श०ब्रा०१४।३।१।२७) इति श्रुतेः । अत्र "अम्जलिनाऽप उपसिञ्चति, दुर्मित्रिया" इति प्रकृत्य "यामस्य दिशं द्वेष्यः स्यात्तां दिशं परासिञ्चे" (श०ब्रा०१४।३।१।२७) दित्येतच्छौत्रामणीवच् (श०ब्रा०१२।९।२।६) श्रुतिपठितमपि सूत्रकृता पद्धतिकृता च कथमपि नोपनिबद्धमिति न ज्ञायते । (२) शाखान्तरात् ।

(३) उ० आ० २, १, १३, १-२ = ऊ० गा० २, १, ३ ।

आध्वर्यवपद्धतिः ।

यजमानः-स्वासने उपविश्य प्रवृञ्जनीये शतमाने ब्रह्मणे ददाति(१) । धर्मदुघामध्वर्यवे(२), यजमानव्रतदुघा ँ होत्रे पत्न्या उद्गातृभ्यः(३) । अग्नीधेऽजाम्(४) । धर्मभेदे यथोक्तमुखावच्चान्यं कुर्यादभिन्नेन चरेत् ।

इति प्रवर्ग्योत्सादनम् ।

औद्गात्रपद्धतिः ।

श्यैतस्य यजमानो निधनं ब्रूयात् ।

प्रस्तोता पूर्ववया द्वारा प्रपद्योत्तरेणाग्नीन् गत्वा पश्चाद्गार्हपत्यस्य तिष्ठन् प्रवर्ग्यस्थानं प्रेक्ष्यमाणो वामदेव्यं तृचे गायेत् ।

वामदेव्यऋषिः गायत्रीछन्दः इन्द्रोदेवता—

३ ऽ ८ ४ २ ४८ ५ १ ८ २ १८ २ १
का ५ या । न श्रा ३ यित्रा ३ आभुवात् । ऊ । ती सदा वृधः स ।
२ ६ २ १ २ ३ २ १८ – १
खा । औ ३ हो हा यि । कया २ ३ शचायि । यौ हो ३ । हुम्मा २। वाऽ
२ ३ ६ ४ २ ४ ५ १
२ तौ ३५ हायि ॥ + ॥ काऽ ५ स्वा । सत्यो ३ मा ३ दानाम् । मा ।
२८ १ २ १ २ ६ २ १ २ ३ ६
हिष्ठोमात्सा दन्ध । सा । ओ ३ हो हायि । हढा २ ३ चिदा । रु जो
२ १ – १ २ ३ ६ ४ २
हो ३ । हुम्मा २ वा २ सोऽ ५ हायि ॥+॥ आऽ ५ भी । षुणा ३ः सा
४ ५ १ २८ १ २८ १ ८ २ १
३ खीनाम् । आ । विता जरायितृ । णाम् । औ २ ३ हो हा यि । शता २३
२ ३ ८ २ १ – १ २
भवा । सि यौ हो ३ हुम्मा २ । ताऽ २ यो ३ ५ हायि(५) ॥ २८ ।

---

(१) 'इच्छतो मन्त्रवचन' (का०श्रौ०१०।२।३०) मित्युक्तेर्मन्त्रवचनेच्छा चेत्तदा-ब्रह्मा "अग्नये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीयायुर्दात्र एधि मयो मह्यं प्रति गृहीत्रे" (य० सं० ७।४७।) (शां० श्रा० ७।१८।१) इति प्रतिगृह्णीयात् ।

(२) अध्वर्युः "रुद्राय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय प्राणोदात्र एधि मयो मह्यं प्रतिप्रहात्रे" (य० सं० ७।४७ ।) (शां० श्रौ० ७।१८।२) इति प्रतिगृह्णीयात् । एवं होता उद्गाता च रुद्रायेति प्रतिगृह्णीयाताम् ।

(३) यद्यपि "उद्गात्रे" (का०श्रौ०२६।७।४४) इति सूत्रे एकवचनं तथापि त्रिभ्योऽपि दानम् । "अथ यैषा पत्न्यै व्रतदुघा तामुद्गातृभ्यो ददातीति (श० ब्रा०१४।३।१।३५) श्रुतौ बहुवचनश्रुतेः । "सा विभक्ता च विक्रीता दातारं पातयत्यध" इत्यस्य श्रुत्या बाधः । (४) अजामग्नीधे ददाति शाखान्तरात् ।

(५) २८—उ०आ०१,१,१२,१—३=ऊ०गा०१,१,५॥

आध्वर्यवपद्धतिः ।

(अग्निप्रणयनम् ।)

अथाग्निप्रणयनम् । अग्निं (१)प्रणयत्यौपनिवपनात्कृत्वा त्रियूनबद्धं द्वाविंशतिकाष्ठमयमिध्ममाहवनीये प्रज्वाल्य निरूप्याज्यं गार्हपत्येऽधिश्रित्य स्रुक्स्रुवं सम्मृज्य उद्वास्योत्पूयावेद्य पञ्चगृहीतं गृहीत्वा, आज्यं स्रुक्स्थं लौकिकप्रोक्षणीश्चोद्यम्योत्थायान्यस्मै प्रदाय सोपयमनीकमग्निं स्वयं गृहीत्वाह—

अग्नये प्रणीयमानायानुब्रूहि एकस्फ्यायानुदेहि ।

औद्गात्रपद्धतिः ।

अथाग्निप्रणयने अभिमनुगच्छन्नग्नेर्मूर्द्धव्रतं त्रिर्गायेत्। अग्नि ऋषिः गायत्री छन्दः अग्निर्देवता ।

हौत्रपद्धतिः ।

(अग्निप्रणयनम् ।)

अथाग्निप्रणयनम्(२) । होताऽऽचम्य सञ्चरेण(३) प्रविश्याग्नये प्रहि-

---

(१) अत्र महावेदिमुत्तरेणैवेध्मनयनं कर्तव्यं दरुणप्रवासे पशौ (आ०श्रौ०७।।७।१) चापस्तम्बलौगाक्षिसूत्रयोस्तथादर्शनात् । "इध्ममभ्यादधती" (श०ब्रा०३।१।२।१) त्यत आरभ्योत्तरवेदावग्निनिधानान्तस्येह श्रुतत्वात् ।

अत्र "एकविंऽशति वा" (का०श्रौ०१।३।१९) इति सूत्रेण एकविंशतिसङ्ख्यकाष्ठकइध्मप्राप्ता "वपरिमितं प्रणयनीयं त्रियून" (का०श्रौ०१।३।२१) मित्यपरिमिते उक्ते अपरिमितशब्देन पूर्वोक्तपरिमाणप्रतिषेधः उतायमपि सङ्ख्यान्तरविधिरिति संशयः । अत्र अपरिमितशब्दगतेन नञा परिमाणं निषिध्यते । तथासत्यपरिमितशब्दव्युत्पत्त्या (ग्राह्य) द्रव्यस्य परिमाणशून्यता प्रतीयते इति पूर्वः पक्षः । अपरिमितशब्दस्य रूढ्या बहुत्वमर्थः । तथैव प्रयोगबाहुल्यात् । ततः सङ्ख्यान्तरं विधीयत इति सिद्धान्तः । तथा च जैमिनिकात्यायनौ—"अपरिमाणे शिष्टस्य सङ्ख्याप्रतिषेधस्तच्छ्रुतित्वात् । कल्पान्तरं वा तुल्यवत्प्रसङ्ख्यानात" (६।७।२१-२२) । "अपरिमितं प्रमाणादूभूय" (का०शु०१।२३) इति ।

अधिकप्रमाणता च एकेनैव सम्पादनीया न तु द्वित्रादिना, अनवस्थाप्रसङ्गात् । अत एव पद्धतौ द्वाविंशतिकाष्ठकमिध्यमित्युक्तं युक्तमेवेति ।

(२) अत्र ब्रह्मयजमानौ दक्षिणत उपविशेयाताम् ।

(३) "चात्वालोत्करावन्तरेण सञ्चरः प्रणीतोत्करावितिष्ठिव्वि" (का०श्रौ०१।३।४१-४२) (शां०श्रौ०१।४।१) ति परिभाषोक्तेरन्तरेण चात्वालोत्करौ प्रपद्याहवनीयस्योत्तरतस्तूष्णीमुपविश्याह ।

चात्वालोत्करलक्षणप्रतिपादकः श्लोकः—

चात्वालो नाम पश्वादौ वेद्यर्थं क्रियतेऽवटः।।

देवाः स उत्करो ज्ञेयः कीर्यन्ते यत्र पांशवः । इति ।

आध्वर्यवपद्धतिः ।

ब्रह्मयजमानौ चानुगच्छतः ।

ब्रह्माहवनीये प्रणीयमाने अप्रतिरथस्य द्वादश (१७।३३-४४) ध्रुवन्नग्नौ सर्वत्रैके ।

(अप्रतिरथसूक्तम् ।)

(आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
सङ्क्रन्दनो निमिषऽएकवीरः शतऽसेनाऽअजयत्साकमिन्द्रः ॥१॥
सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ॥
तदिन्द्रेण जयत तत्सहध्वं युधो नरऽइषुहस्तेन वृष्णा ॥२॥
सऽइषुहस्तैः सनिषङ्गिभिर्वशी सꣳस्रष्टा सयुधऽइन्द्रो गणेन ॥

औद्गात्रपद्धतिः ।

२८ ८ ३८ २८ ३८ ८ २ ८ ४ १ २
हाउ २ हाउ । ग्रा जा ओ वा । ३ । अग्निर्मूर्द्धा दी ३ वाः का १ कू
४ १ २ ४ ४ ४ १
२ त् । पति पृथिवी ३ याग्रा १ या २ म । अपा ꣳ रेताऽसी ३ जायि·
२ २ ४ १ ३८ २८ ३८ ८ ३८ २ ४
न्वा १ ती २३ । हाउ २ हाउ । ग्रा जा ओ वा । २ । ग्रा जा ३ ओ ५ वा

हौत्रपद्धतिः ।

यमाणायानुब्रू३हीत्युक्ते आसीनः प्रथमाम् ।

(१) "प्र देवं देव्या धिया भरता जातवेदसम् ।
हव्या नो वक्षदानुषो ३ म् ।
प्र देवं देव्या धिया भरता जातवेदसम् ।
हव्या नो वक्षदानुषो ३ म् ।
प्र देवं देव्या धिया भरता जातवेदसम्"(२) ।
तत उत्थाय अनुगच्छन् ।
"हव्या नो वक्षदानुषो ३ म् ।
अयमुष्य प्र देवयुर्होता यज्ञाय नीयते ।
रथो न यो रभीवृतो घृणीवाꣳश्चेतति त्मनो ३ म् ।

---

(१) ऋ०१०।१७६।२-४

(२) अत्रार्धर्चं विरमेद्यावदध्वर्यवो न गच्छन्ति, गच्छत्सु तेषु शिष्टमर्धर्चमासीन एवोक्त्वा तत उत्थाय उत्तरे द्वे ऋचावनुगच्छन्पठेत् "आसीनः प्रथमामुत्तरे अनुसंयन्ति" (शां० श्रौ० ३।१४।९-१०) स्युक्तत्वात् ।

आध्वर्यवपद्धतिः ।

सꣳ० सृष्टजित्सोमपावाहु शर्द्धुग्रधन्वा प्रतिहिताभिरस्ता ॥३॥
बृहस्पते परि दीयारथेन रक्षोहा मित्राँऽअपबाधमान ॥
प्रभञ्जन्सेना ः प्रमृणो युधाजयन्नस्माकमेधयविता रथानाम् ॥४॥
बलविज्ञायस्थविरः प्रवीरः सहस्वान्वाजी सहमानऽउग्रः ॥
अभिवीरोऽअभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥५
गोत्रभिद्गोविदं व्वज्रबाहुञ्जयन्तमज्मप्रमृणन्तमोजसा ॥
इमꣳ० सजाताऽअनुवीरयध्वमिन्द्रꣳ० सखायोऽअनुसꣳरभध्वम् ॥
अभिगोत्राणि सहसा गाहमानोदयोव्वीरः शतमन्युरिन्द्रः ॥
दुश्च्यवनः पृतनाषाडयुद्ध्योस्माकꣳ० सेनाऽअवतु प्रयुत्सु ॥७॥
इन्द्रऽआसाञ्जेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः ॥
देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्रम् ॥ ८ ॥

औदुम्बरपद्धतिः ।

२८ १ २ १ २८ १८ ३ १ १ १
६ ५ ६ । ए । वि इव स्य जगतो ज्यो ती २ ३ ४ ५:(१) ॥ ५९ ॥

हौत्रपद्धतिः ।

अयमग्निरुरुष्यत्यमृतादिव जन्मनः" (२) ।
तत इध्मे साद्यमाने—
"सहसश्चित्सहीयान्देवो जीवातवे कृतो ३ म् ।
इळायास्त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो निधीमह्यग्ने हव्याय वोळहवो ३ म् (३) ।
अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम् ।
कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधो ३ म् । (४)
सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञं सुकृतस्य योनौ ।

---

(१) २९छ०आ०१,१,३,७=आ०गा०६,१,१, ॥
(२) "सन्तानार्थोऽर्धर्चेन काङ्क्षतो" (शां० श्रौ० १।१।२९) ति परिभाषणाद्यावदिध्मासादनमत्र विरामः कार्यः ।
(३) ऋ० ३।२९।४। (४) ऋ० ६।१६।१६

आज्वयपद्धतिः ।

इन्द्रस्यवृष्णो वरुणस्य राज्ञऽआदित्यानाम्मरुताँशर्द्धऽउग्रम् ।
महामनसाम्भुवनच्यवानाङ्घोषो देवानाञ्जयतामुदस्थात् ॥ ६ ॥
उद्धर्षय मघवन्नायुधान्युत्सत्वनाम्मामकानाम्मनाँसि ।
उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानाञ्जयतां यन्तु घोषाः ॥१०॥
अस्माकमिन्द्रः समृतेषुध्वजेष्वस्माकंयाऽइषवस्ता जयन्तु ।
अस्माकं वीराऽउत्तरे भवन्त्वस्माँ२ऽउदेवाऽअवता हवेषु ॥ ११ ॥
अमीषाञ्चित्तम्प्रति लोभयन्ती गृहाणाङ्गा न्यप्वे परेहि ।
अभिप्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥)

प्रथमायां त्रिरुक्तायामावेदिहरणम् ।

(रेखाकरणम् ।)

प्रतिप्रस्थाता स्फ्येन लिखत्याग्नेदिश्रोणेरुत्तरवेदेर्वा ।

(उत्तरवेदिप्रोक्षणम् ।)

उत्तरवेदिं प्राप्य अग्निमग्नीधे प्रदाय तदक्षिणतस्तिष्ठन्नुदङ्मुख उत्तरवेदिं प्रोक्षतीन्द्रघोष इति प्रतिमन्त्रं प्रतिदिशं यथालिङ्गम् ।

"ॐ इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु ।
ॐ प्रचेतास्त्वा रुद्रैः पश्चात्पातु ।
ॐ मनोजवास्त्वा पितृभिर्दक्षिणतः पातु ।
ॐ विश्वकर्मा त्वादित्यैरुत्तरतः पातु" (५।११) ।

(प्रोक्षणीशेषनिषेचनम् ।)

दक्षिणाग्नसहितं बर्हिर्वेदिशेषं निषिञ्चति, इदमहं तन्तं वारमुमित्यभिचरन् ।

हौत्रपद्धतिः ।

देवाघीर्देवाहविषा यजास्यग्ने बृहद्यजमाने वयोधा ३ म् ।(१)
निः होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत्सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्नो ३ म् ।
त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।

(१) ऋ०३।२९।८।

आध्वर्यवपद्धतिः ।

"ॐ इदमहं तमं वार्वहिर्द्धा यज्ञान्निःसृजामि" (५।११*) ।

(पञ्चगृहीताज्यस्य होमः ।)

जुहोतिस्थाने उपविश्य मध्ये च हिरण्यं निधाय नाभ्याः श्रोण्यꣳसेषु पञ्चगृहीतं जुहोत्यदणया दक्षिणेꣳसे श्रोण्याꣳश्रोण्यामꣳसे मध्ये च हिरण्यं पश्यन् सिꣳह्यसीति प्रतिमन्त्रम् ।

"ॐ सिꣳह्यसि स्वाहा" (५।१२) ।

इदꣳसिꣳह्यै० ।

"ॐसिꣳह्यस्यादित्यवनिः स्वाहा" ।

इदꣳसिꣳह्यै आदित्यवन्यै० ।

"ॐ सिꣳह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा" ।

इदꣳसिꣳह्यै ब्रह्मवन्यै क्षत्रवन्यै० ।

"ॐ सिꣳह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहा" ।

इदं सिꣳह्यै सुप्रजावन्यै रायस्पोषवन्यै० ।

"ॐसिꣳह्यस्यावह देवान्यजमानाय स्वाहा" ।

इदं सिꣳह्यै० ।

सर्वत्र एवमेव वा त्यागः ।

भूतेभ्यस्त्वेति स्रुचमुद्यच्छति ।

"ॐभूतेभ्यस्त्वा उद्यच्छामि" (५।१२)

(नाभेः पश्चिमे दक्षिणे उत्तरे च क्रमेण परिधिनिधानम् ।)

नाभिं पैतुदारवैः परिदधाति पूर्ववद्ध्रुवोऽसीति प्रतिमन्त्रम् ।

"ॐ ध्रुवोऽसि पृथिवीन्दूर्ठ०ह" । मध्यमम् ।

"ॐ ध्रुवक्षितस्यन्तरिक्षन्दूर्ठ०ह" । दक्षिणम् ।

हौत्रपद्धतिः ।

अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपो ३ म (१) ।

त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।

अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बो धिगोपो३म ।

---

(१) ऋ०२।९।१-२ "अवसाने मकारान्तं सर्वेष्वृग्गणेषु सपुरोऽनुवाक्येष्वि" (शां० श्रौ० १।१।२२) ति सूत्रात्सर्वत्रावसाने मकारान्तः प्रणवो भवति ।

कातीयपाशुकगर्भितशाङ्खायनसूत्रानुसारिसोमहौत्रप्रयोगेऽपि सर्वत्र मकारान्त एव प्रणवः ।

"प्रथमोत्तमयोस्त्रिवचनमिति" (शां०श्रौ१।१।१८) परिभाषितत्वात्प्रथमोत्तमयोस्त्रिवचनं सवत्र वेदितव्यम् ।

आध्वर्यवपद्धतिः ।

"ॐ अच्युतक्षिदसि दिवं दृꣳह" (५।१३) । उत्तरम् ।

(नाभेरुपरि संभारनिधानम् ।)

अग्नेः पुरीषमिति निवपति गुग्गुलुसुगन्धितेजनवृष्णेस्तुकाश्चोपरि-शीर्षण्या अभावेऽन्याः ।

"ॐ अग्नेः पुरीषमसि" (५।१३) ।

तेष्वग्निं निदधाति तूष्णीं उत्तरत उपयमनीरुपनिवपति ।

इत्यग्निप्रणयनम् ।

(हविर्धानप्रवर्तनं हविर्धानमानादि च ।)

अथ हविर्द्धानप्रवर्तनं हविर्द्धानमानादि च ।

हविर्द्धाने चात्वाले प्रक्षाल्य उत्तरवेद्याः पुरस्तात्स्थापिते, तयोर्मध्वर्युः प्रतिप्रस्थाता लघुशकटं गृहीत्वा, विहारं शालां च दक्षिणेनाध्वर्युः प्रतिप्रस्थाता चोत्तरेण विहारं शालां पश्चिमत आगत्य शकटयोर्मुखे सन्धाय आत्मानमभित अवर्त्य(वृत्य) तथैव प्रत्यावृत्य यथागतं शालापूर्वभागे वेदिमध्ये पृष्ठ्यामुभयतो द्वयरत्न्यन्तरे स्थापयतः । तत्र वर्षीयो दक्षिणं(१) तयोश्छदिरध्यस्यति भित्तिं वाऽभावे, अन्यत्रापि रराट्यां पुरस्तादासजत्यैषीकी(२) ऽ सर्वत उच्छ्रायीभ्यां परिवार्य

हौत्रपद्धतिः ।

त्वं दूतस्त्वमु नः परस्पास्त्वं धस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपो३म्"

ततः प्रदक्षिणमावृत्य तथैव प्रत्येत्य सव्यावृत्पूर्वस्थाने स्थित्वा उत्सृज्यते ।

इत्यग्निप्रणयनम् ।

---

(१) अत्र मानवश्रौतसूत्रे विशेषः—"हविर्धानयोः प्रथमकृतान् ग्रन्थीन् विस्रंस्य प्रक्षाल्याभ्यज्याभिनह्याभितः पृष्ठ्यामरत्निमात्रेऽवस्थापयन्ति । बहिर्वेदि चक्राण्यन्तर्वेदुपस्तम्भयन्ती" (२।२।२।१२-१३) ति ।

काठके—"स छदिष्कयोर्हविर्धानयोर्ग्रन्थीन् विवृत्य प्रक्षाल्याभ्यज्याभितः पृष्ठ्यामवस्थाप्येति ।

आपस्तम्बे च—"प्रक्षाल्य तयोः प्रथमग्रथितान् ग्रन्थीन् विस्रंस्य नवान् प्रज्ञातान् कृत्वाऽग्रेण प्राग्वंशमभितः पृष्ठ्यामव्यवनयन्परिश्रिते सच्छदिषी अवस्थापयती (११।६।३)ति ।

(२) इषिकामयीमिति शाखान्तरात् । रराटौ हविर्धानस्य पूर्वद्वारे उपरिष्टात्कदिकेति धूर्तस्वामिनः ।

आध्वर्यवपद्धतिः ।

छदिः(१) पश्चाच्च पुरस्ताच्च निदधाति ।

शालाद्वार्यस्य दक्षिणतस्तूष्णीं ब्रह्मास्ते ।

अध्वर्युर्गार्हपत्ये पूर्णाहुतिवदाज्यष्ठं० संस्कृत्य चतुर्गृहीतं गृहीत्वा शालाद्वार्ये समित्पूर्वकं जुहोति युञ्जत इति ।

"ॐ युञ्जते मनऽउत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।

वि होत्रा दधे वयुनाविदेकऽइन्महो देवस्य सवितुः परिष्टुतिः स्वाहा" (५।१४) ।

इदं सवित्रे न मम ।

स गार्हपत्येऽतः(२) ।

पुनः शालाद्वार्ये पूर्णाहुतिवदाज्यष्ठं०संस्कृत्य चतुर्गृहीत्वा पूर्वया द्वारा निष्क्रम्य अपरं दक्षिणं वर्त्मनि दक्षिणस्यानसो हिरण्यं निधायाऽभिजुहोतीदं विष्णुरिति समिद्वज् सशेषम् ।

दक्षिणस्य शकटस्य दक्षिणतस्तूष्णीं ब्रह्माऽऽस्ते ।

"ॐइदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् ।

समूढमस्य पाꣳसुरे स्वाहा" । (५।१५)

इदं विष्णवे० ।

अध्वर्युणा दक्षिणया द्वाराऽऽनीता (३)पत्नी पाणिभ्याꣳशेषं प्रति-

---

(१) छदिस्तुल्यं वा किलञ्जं रराट्या तेजनीत्यनर्थान्तरमिति पितृभूतिः ।

वाजपेयेऽत्र उच्छ्रायीविदारणेन कुद्दारं कुर्यात् (का० श्रौ०१४।१।१९) । तत एव सुगद्रव्याणि प्रवेशयेत् (का० श्रौ० १४।१।२७) ।

(२) अस्याग्नेर्गार्हपत्यत्वमुदयनीयातः (का० श्रौ०१०।९।११ वृ०) पूर्वमेव, उदयनीयामारभ्यतु आहवनीयत्वमेव भवति। नन्वेवं कौण्डपायिनामयनेऽ (का०श्रौ०२४।४।२४-२९) ग्निहोत्रदर्शपूर्णमासादौ हविःश्रपणमपि शालाद्वार्य एव स्यात्। चोदकेन तत्रापि शालाद्वार्यस्य गार्हपत्यत्वात्। सत्यं चोदकादेवं, अग्निहोत्रादिनामधेयात्तु नैयमिकाग्निहोत्रवन्मुख्य एव गार्हपत्ये श्रपणं प्रापितं तच्च चोदकाद्वलीय इत्युक्तम् । एतच्च ज्योतिष्टोमप्रकरणे पठितत्वात् ज्योतिष्टोमार्थं, प्रसङ्गादग्नीषोमीयेऽपि गार्हपत्यकार्यमगार्हपत्ये क्रियते तस्यापि ज्योतिष्टोमपरतन्त्रत्वात । अतः स्वतन्त्रेषु निरूढादिष्वेतन्न भवति अत एवाग्नीषोमीयोपभोगेऽपि निरूढादिषु वेदिरपि सोमवन्न भवति । आपस्तम्बेन च (श्रौ० ७।७।३) पशुबन्धेऽप्येवमुक्तम् । "एष पशुबन्धस्याहवनीयो यतः प्रणयति स गार्हपत्य" इति देवः ।

(३) "दक्षिणया द्वारा पत्नीं निष्क्रामयन्ती" (श० ब्रा० ३।१।३।१३) ति श्रुत्वादानीतेत्युक्तम् । अतश्च बाहुं गृहीत्वा शालाया दक्षिणद्वारेण पत्नी निष्काशनीया "पत्नि निष्क्रमस्वे" त्यध्येषणया, वा उभयथापि निर्जर्थोपपत्तेः । तथा "सꣳस्रवं पत्न्यै पाणावानयति साक्षस्य सन्तापमुपानक्ति देवश्रुताविं" (श० ब्रा० ३।१।३।१३) ति श्रुत-

आध्वर्यवपद्धतिः।

गृह्याक्षधुरावनक्ति दक्षिणेन हस्तेनोत्तानेनोभयत्रोदक्संस्थं परान्देवश्रुताविति।

"ॐदेवश्रुतौ देवेष्वा घोषतम्" (५।१७)।

दक्षिणं धुरमङ्क्त्वा सव्यहस्तेऽवस्थितमाज्यं दक्षिणहस्ते कृत्वोत्तरामनक्ति पूर्ववत्।

"ॐ देवश्रुतौ देवेष्वा घोषतम्" (५।१७)।

युगपत्तद्वचनत्वात् भेदे मन्त्रावृत्तिः सान्निपातित्वात्। स्रुक्स्थाल्यौ प्रतिगृह्य प्रतिप्रस्थातोत्तरस्येरावतीति पूर्ववत् चतुर्गृहीतं गृहीत्वोत्तरस्य दक्षिणे बर्मनि हिरण्यं निधाय जुहोति।

"ॐ इरावती धेनुमती हि भूतꣳ० सूयवसिनी मनवे दशस्या।

व्यस्कभ्ना रोदसी विष्णवे ते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा"(१) (५।१६)।

इदं विष्णवे०।

प्रतिप्रस्थात्रा नीयमाना दक्षिणद्वारेण शालां प्रविश्य पत्नी चापरेणाग्नीन्परीत्य पूर्वया द्वारा निष्क्रम्योत्तरस्यानक्ति पूर्ववत्। भेदे मन्त्रावृत्तिः।

अध्वर्युर्हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुवाचयति।

ॐ हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूहि।

हौत्रपद्धतिः।

(हविर्धानप्रवर्तनम्।)

अथ हविर्धानप्रवर्तनम्। एहि होतरित्यामन्त्रितो होताऽऽचम्य दक्षिणस्य हविर्धानस्योत्तरं वर्मोत्तरस्य च दक्षिणमन्तरेण तिष्ठन्।

ॐ हाविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूहीत्युक्ते—

"ॐ अपेतो जन्यं भयमन्यजन्यं च वृत्रहन्।

त्वात्। सन्तापमिति यस्मिन्प्रदेशे चक्रेणाक्षे घृष्यमाणः सन्तप्यते चक्रस्य धुरिकायाः सन्तापः। आपस्तम्बः—"द्विर्दक्षिणामक्षधुरां दक्षिणेन हस्तेनोत्तानेन प्राचीनं न चावृत्तमावर्तयती"ति (११।६।५-६)। अक्षधुरामक्षशल्यं प्राचीनं प्रागपवर्गमनक्ति न च निवर्तयति हस्तमिति धूर्तस्वामिनः।

(१) "उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतय" (श्रौ० १।२।७) इति कात्यायनपरिभाषया स्वाहाकारे प्राप्ते—संहितायां स्वाहान्तत्वेन पठिते मन्त्रे तु स्वाहाकारं नाकुर्यात्।।तथा हि पुरश्चर्यार्णवे मन्त्रप्रकाशवचनम्—

"नमोऽन्ते न नमो दद्यात् द्विठान्ते द्विठमेव च।
पूजायामाहुतौ चैव सर्वत्रायं विधिः शिवे" इति॥

शिवे इति सम्बोधनम्। द्विठः स्वाहाकार इति साम्प्रदायिका इत्यपि तत्रोक्तम्।

आध्वर्यवपद्धतिः ।

होत्रा त्रिरुक्तायामुद्गृह्णेव(१) वर्तनमुभयोः ।

प्राचीप्रेतमिति वाचयति यजमानम् ।

"ॐ प्राची प्रेतमध्वरङ्कल्पयन्तोऽ ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम्" (५।१७) । इति ब्रूहि ।

यजमानः—

"ॐ प्राची प्रेतमध्वरङ्कल्पयन्तोऽ ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम्" (५।१७) ।

स्वङ्गोष्ठमिति खर्जति ।

"ॐ स्वङ्गोष्ठमा वदतन्देवी दुर्येऽ आयुर्मा निर्वादिष्टम्प्रजाम्मा निर्वादिष्टमि"ति ब्रूहि ।

यजमानः—

"ॐ स्वङ्गोष्ठमा वदतन्देवी दुर्येऽ आयुर्मा निर्व्वादिष्टं प्रजाम्मा निर्वादिष्टम्" (५।१७) ।

हौत्रपद्धतिः ।

अप चक्रा अवृत्सत(२)" ।

इति दक्षिणेन प्रपदेन प्रत्यञ्चं लो(ष्ठ)गमपास्य ततो पाणिपादौ प्रक्षाल्याचम्य ततस्तिष्ठ(३)न्ननूच्य ।

"प्रेतां यज्ञस्य शम्भुवा युवामिदा वृणीमहे ।

अग्निं च हव्यवाहनो ३

म्प्रेतां यज्ञस्य शम्भुवा युवामिदा वृणीमहे ।

अग्निं च हव्यवाहनो ३

म्प्रेतां यज्ञस्य शम्भुवा युवामिदा वृणीमहे(४) ।

अग्निं च हव्यवाहनो३म(५) ।

द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम् ।

यज्ञं देवेषु यच्छतो३ (६) ।

(१) आपस्तम्बः "उद्गृह्णन्तः प्रवर्तयन्ती" (११।६।११) ति । काठके च—'त्रिरनूक्तेऽनुद्गृह्णन्तो वर्तयन्ती"ति । मानवे "उद्गृण्हन्तोऽ नुव्रजन्ती"(श्रौ० २।२।२।१९) ति

(२) सौत्रमन्त्रोऽयम् (शां० श्रौ० ५।१३।३।) ।

(३) "आसीनन्यायं बाढ्मृच्यम्" (शां० श्रौ० १।१।१५) अस्य प्रतिषेधार्थं पुनस्तिष्ठद्वचनम् ।

(४) अत्र विरमेत्यावदध्वर्येवं न गच्छन्ति, गच्छत्स्वध्वर्यवादिषु तिष्ठन्नेव शिष्टमर्धर्चमुक्त्वा दक्षिणस्य हविर्धानस्योत्तरचक्रप्रवाहिकासंलग्नोऽनुगच्छन् "द्यावा न पृथिवी" तयोरिद्धतवत्पयो" "यमे इव यतमाने" इत्येतास्तिस्रः पठेत् ।

(५)ऋ० २।४१।१९। (६) ऋ० २।४१।२० ।

आध्वर्यवपद्धतिः ।

(१) अत्र कालाहुतिः ।

अध्वर्युः पश्चादुत्तरवेदेस्त्रिषु प्रक्रमेषु मत्या वा नातिदूरे नातिसमीपे युगपत्स्थापिते नभ्यस्थे अभिमन्त्रयते अत्र रमेथामिति युगपत् ।

"ॐ अत्र रमेथां वर्ष्मन्पृथिव्याः" (५।१७) ।

द्वे अपि हविर्द्धाने उत्तरेण परिक्रम्य दक्षिणं हविर्द्धानमुपस्तभ्नाति विष्णोर्नुकमिति ।

"ॐ विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि ।

हौत्रपद्धतिः ।

तयोरिद्घृतवत्पयो विप्रा रिहन्ति धीतिभिः ।

गन्धर्वस्य ध्रुवे पदे३म्(२) ।

यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयन्तः" ।

विरमेत् ।

ततश्छदिष्याधीयमाने—

"आ सीदतं स्वमु लोकं विदाने स्वासस्थे भवतमिन्दवे नो३(३)म् ।

अधि द्वयोरदधा उक्थ्यं वचो यतस्रुचा मिथुना या सपर्यतः" ।

विरमेत् ।

ततः परिश्रीयमाणयोः(४) ।

"अरꣳयन्त इव ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वतो३म्(५)

विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे" ।

विरमेत् ।

ततो नभ्यस्थयोः(६) ।

"वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजतो३म्(७)

आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः ।

इहाद्य सोमपीतयो३म्"(८)।

---

(१) नैमित्तिकमिदम् । अतश्च वरुणायेति कालाहुतिरपि भवति । "यद्युत्सर्जेतामे-तद्वाचयेत्स्वङ्गोष्ठ (श० ब्रा० ३।९।३।१८) मि"त्यादि श्रुतत्वात् । यदि तादृशेन प्रयत्नेन प्रवर्तमाने अप्युत्सर्जेतां तत एतद्वक्ष्यमाणं वाचयेदित्यर्थः ।

(२) ऋ० १।२२।१४। (३) ऋ० १०।१३।२ ।

(४) रज्जुभिर्बध्यमानयोर्हविर्धानयोरित्यर्थः । (५) ऋ० १।८३।३ ।

(६) नाभिर्यस्मिन्फलके तन्नभ्यं तत्स्थयोः चक्रमध्यफलकाधारे स्थापितयोरित्यर्थः । तादृशयोर्हविर्द्धानयोः सतोरा वामुपस्थमित्यनुब्रूयात् ।

(७) ऋ० ९।८१।२ । (८) ऋ० २।४१।२१

आध्वर्यवपद्धतिः।

यो ऽअस्कभायदुत्तरर्ठ०सधस्थं ध्रुवचक्रमाणस्त्रेधोरुगायः" (५।१८)।
हविर्द्धानमण्डपदेशाद्दक्षिणतः समन्त्रं ब्रह्मास्तै।

(हविर्द्धाननिर्माणम् ।)

अथ मानकरणम्।

हविर्द्धानालयं दशहस्तं पूर्वपश्चिमद्वारं छदिस्त्रयं च, हविर्द्धानमण्डपाग्नेयकोणे स्थूणामुपनिहन्ति विष्णवे त्वेति।

"ॐ विष्णवे त्वा उपनिहन्मि" (५।१८)।

दिवोवेत्युत्तरयोर्हविर्द्धानमुपस्तभ्नाति प्रतिप्रस्थाता।

"ॐ दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरन्तरिक्षात्।
उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्यात्"(५।१९)।

मण्डपस्योत्तरतो हविर्द्धानयोः पश्चिमेन गत्वा ईशानकोणे स्थूणां पूर्ववदध्वर्युर्निहन्ति।

"ॐ विष्णवे त्वा उपनिहन्मि" (५।१९)।

ततः पश्चात्कोणयोः क्रमेण तथैव तूष्णीम्। यद्वा, उभे वा दक्षिणतः। प्रथमं मन्त्रेण इतरतस्ततस्तूष्णीं चतस्रोऽपि प्रादक्षिण्येनोपनिहताः स्युः। यदु च मानुष इति श्रुतेः (३।५।३।२१)।

दौग्रपद्धतिः।

कर्मविपर्यासे यथाकर्मेति(१)।

"परित्वा गिर्वणो गिर इमा भवन्तु विश्वतः।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयोऽम्।
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयोऽम्।
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयोऽम्"(२)।

इति परिधाय, यत्र तिष्ठन्प्रथमामन्ववोचत्तत्र स्थित्वोत्सृज्यते।

इति हविर्द्धानम्।

---

(१) अत्र केषाञ्चिदध्वर्यूणां प्रथमं नभ्यस्थकरणं ततो मध्यमस्य छदिष आरोपणं, ततो रज्जुभिर्बन्धनम्। तत्र कर्मविपर्यासे यथाकर्म कुर्यात्।

"आवामुपस्थ" (ऋ० २।४१।२१।) मिति पूर्वा "धिद्वयो" (ऋ० १।८३।३) रित्युत्तरा, ततो "विश्वा रूपाणी"ति (ऋ० ५।८१।२) ततः "परि त्वा गिर्वण" (ऋ० १।१०।१२) इति परिधानीया। (२) ऋ० १।१०।१२

आध्वर्यवपद्धतिः ।

प्रतद्विष्णुरिति वाचयति यजमानं मध्यमं छदिरालभ्य(१) ।

मध्यमं छदिरालभस्व ।

"ॐ प्र तद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।

यस्योरुषु त्रिषु विक्रमणेष्वधि क्षियन्ति भुवनानि विश्वा"(५।२०)।

इति ब्रूहि ।

यजमानः मध्यमं छदिरालभ्य—

"ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।

यस्योरुषु त्रिषु विक्रमणेष्वधि क्षियन्ति भुवनानि विश्वा"(५।२०)।

उत्तरे च द्वे वाचने इति कर्कः ।

विष्णोरराटमिति रराट्यामालभ्य वाचयति ।

रराट्यामालभस्व ।

"ॐ विष्णोरराटमसी"ति ब्रूहि ।

यजमानो रराट्यामालभ्य ।

"ॐ विष्णो रराटमसि" (५।२१) ।

भालम्भनस्य युगपत्कर्तुमशक्यत्वात् भेदेन प्रत्येकं रराट्योरुच्छ्राय्योश्च वाचनप्रैषालम्भनानि भवन्तीति कर्कः ।

अध्वर्युः विष्णोः स्नप्त्रे स्थ इत्युच्छ्राय्यावालभ्य वाचयति ।

उच्छ्राय्यावालभस्व ।

"ॐ विष्णोः स्नप्त्रे स्थ" इति ब्रूहि ।

यजमानः उच्छ्राय्यावालभ्य(२) ।

"ॐ विष्णोः स्नप्त्रे स्थः" (५।२१) ।

उदगग्राणि त्रीणि छदींषि पश्चाच्छृतेः । अध्वर्युस्तूष्णीं करोति ।

द्वार्याः परिसीव्यति लस्पूजनिप्रतिहृतया रज्वा विष्णोः स्यूरसीति । विष्णोर्ध्रुवोसीति ग्रन्थिं करोति । उपक्रान्ते प्रमुञ्चति ।

तदित्थम् । पूर्वद्वारस्य दक्षिणद्वार्यायां दर्भमुष्टिं निधाय तत्र वरुणसूच्या रज्जुमुपगूहति ।

---

(१) ननु च स्पृशतेः परो ल्यप् श्रूयते न स्पर्शयतेः । तच्च स्वयमेवाध्वर्युः स्पृष्ट्वा वाचयेदित्यवगम्यते । न मन्त्रलिङ्गविरोधात् । मन्त्रोह्यालब्धस्याभिधायकः तं च यजमानो ब्रवीति अध्वर्युस्तु केवलं प्रयुङ्क्ते । अध्वर्युणाऽऽलब्धे यजमानो मन्त्रो न समर्थः स्यात् । तस्मात्स्पर्शयित्वा यजमानं वाचयतीत्ययमर्थः । एतेन सर्वे एवं जातीयका "अथैवमभिपद्य वाचयती"त्यादयो निर्देशा व्याख्याता इति हरिस्वामी ।

(२) अनेकयजमानके उपस्पर्शनमेकस्य वाचनं सर्वेषामिति सर्वत्र ज्ञेयम् ।

आध्वर्यवपद्धतिः ।

"ॐ विष्णोः स्यूरसि" (५।२१) ।

ततस्तयैवरज्वा प्रादक्षिण्येन सर्वास्थूणा अवशिष्टं द्वार्यान्त्रयं च परिषीव्य पूर्वद्वारदक्षिणपक्षद्वार्यायां ग्रन्थि कृत्वा तत्रैवोपक्रान्तेऽग्रं प्रतिमुञ्चति ।

"ॐ विष्णोर्ध्रुवोऽसि" (५।२१) ।

उत्तरपूर्वस्यां द्वार्यायां परिषीवणसमाप्तिरिति सम्प्रदायः ।

प्राग्वद्दर्भशर्ङ्ग० हविर्द्धानं(१) निष्ठाप्य वैष्णवमसीत्यालभते ।

"ॐ वैष्णवमसि विष्णवे त्वा आलभे" (५।२१)

भोजनभक्षणे चास्मिन्न(२)कुर्युः । अद्वारेण सदोहविर्द्धाने प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा इति । पृष्ठ्यामुभयतो द्वार्यं ।

(इति हविर्द्धाननिर्माणम् ।)

(उपरवसंस्कारः ।)

अथोपरवसंस्कारः । तत्रोपकल्पनम् । अग्निः, दर्भमुष्टिः, यवाः, उदकम्, मृत्तिका, अधिषवणफलके, आनडुहं चर्म, सोमकण्डनार्थं प्रस्तरः, पञ्च ग्रावाणः, दक्षिणस्यानसोऽधः प्रउगं खनत्युपरवान् ।

तुर्ये प्राङ्मध्यरेखायां मध्यतश्चतुरस्रके ।
द्विप्रादेशमिते क्षेत्रे कोणेष्वूपरवान्विदुः ॥
दक्षिणतः समन्त्रं ब्रह्माऽऽस्ते ।

अध्वर्युः प्राङ्मुख उपविश्य अभ्यादिकरोत्यवटवदा परिलेखनाच्चतुरः । देवस्य त्वेत्यग्निमादाय ।

"ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यांम्पूष्णो हस्ताभ्याम् । आददे नार्यसि" (५।२२) ।

अवटं परिलिखतीदमहमिति ।

"ॐइदमहर्ठं० रक्षसां ग्रीवाऽ अपिकृन्तामि" (५।२२)

उदकोपस्पर्शः । अद्भणया व्याधारणवत् ।

अत्र पक्षे प्रथमं दक्षिणपूर्वस्य तत उत्तरापरस्य ततो दक्षिणापरस्य

---

(१) अत्र कठसूत्रम् । द्विपुरुषाया पञ्चम्या हविर्धानं विदध्यादनः सम्मितं वैव स्याद्द्विः प्रादेशया पञ्चाङ्गयोपरवान्विदध्यादुद्विप्रादेशापरेषु पृष्ठ्याप्रादेशं द्वैधं संभुज्यार्धप्रादेशेन पारलिखेद्दशपदया पञ्चाङ्गयोत्तरवेदि विदध्याच्चतुः शम्या पञ्चाङ्गयाग्नीध्रीयं विदध्यात्रिः पदया पञ्चाङ्गया धिष्ण्यान्विदध्यादष्टादश शम्यापञ्चाङ्गया सदो विदध्यादिति ।

(२) तथातिक्रमे निन्दार्थवादश्च "स यो ह तत्राश्नीयाद्वा भक्षयेद्वा मूर्धास्य विपतेदि"ति ।

आध्वर्यवपद्धतिः ।

तत उत्तरपूर्वस्येति(१) क्रमः ।

उत्तरापरं वा प्रथमम् । अत्र पक्षे उत्तरापरदक्षिणपूर्वदक्षिणापरोत्तरपूर्वाणामिति क्रमः(२) ।

सम्यग्वा । अत्र पक्षे दक्षिणपूर्वदक्षिणापरोत्तरापरोत्तरपूर्वाणामिति क्रमः(३) ।

सर्वत्रोत्तरपूर्वं त्वन्त्यम् ।

प्रादेशमात्रांस्तदन्तरान् ।

बृहन्नसीति यथापरिलिखितं खनति । भेदे मन्त्रावृत्तिः ।


"ॐ बृहन्नसि बृहद्वा बृहतीमिन्द्राय व्वाचं व्वद ।

रक्षोहणं व्वलगहनं व्वैष्णवीम्" (५।२२—२३) ।

इदमहमित्युत्किरति यथाख्यातं प्रतिमन्त्रम् ।

"ॐ इदमहं तं व्वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखान" (५।२३) ।

इति प्रथमम् ।



आध्वर्यवपद्धतिः ।

"ॐ इदमहं तं व्वलगमुत्किरामि यम्मे समानो यमसमानो निचखान" (५।२३)।

इति द्वितीयम् ।

"ॐ इदमहं तं व्वलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखान" (५।२३)।

इति तृतीयम् ।

"ॐ इदमहं तं व्वलगमुत्किरामि यम्मे सजातो यमसजातो निचखान" (५।२३)।

इति चतुर्थम् ।

उत्कृत्याङ्किरामीति पश्चात्सर्वभ्यः प्रादक्षिण्येन किरति पूर्वस्यामुत्तरस्यां वा दिशि ।

"ॐ उत्कृत्याङ्किरामि" (५।२३)।

ततस्तूष्णीं खननोत्किरणाभ्यां बाहुमात्रानधः सम्पाद्य अदृणया सम्भिन्द्यात(१), अशक्तौ सम्यक् ।

अत्र पक्षे पूर्वयोः परस्परमसम्भेदनमिति सम्प्रदायः ।

स्वराडित्यवमर्शयति यजमानं यथाखातं प्रतिमन्त्रम् । उपरवानवमृशस्व ।

यजमानः खातक्रमेणावमृशति(२) चतुर्भिर्मन्त्रैः ।

"ॐ स्वराडसि सपत्नहा ।

ॐ सत्रराडस्यभिमातिहा ।

ॐ जनराडसि रक्षोहा ।

ॐ सर्वराडस्यमित्रहा" (५।२४)।

अवटयोरन्तर्हस्तौ प्रक्षिप्य परस्परमध्वर्युयजमानौ सम्मृशेते पूर्वदक्षिणेऽध्वर्युरपरोत्तरे यजमानः ।

अध्वर्युः पृच्छति यजमान किमत्र इति ।

भद्रमि(३)त्याह यजमानः ।

---

(१) अत्राहापस्तम्बः—"अधस्तात्संतृण्णा भवन्ति उपरिष्टादसंभिन्ना" इति (११।११।५) काठके च "बाहुमात्रान् खनन्त्यसम्भिन्दन्तोऽधस्तात्संभिन्दन्ति ।

(२) अनेकयजमानके चैक एवावमृशति ।

(३) अत्रेयं मीमांसा—

भद्रं तन्नौ सहेत्येतत्कस्मिन् स्वामिनि युज्यते ।
द्वित्वश्रुत्या द्वयोरेतदध्वर्युयजमानयोः ।
(जै० न्या० मा० ३।८।२२)

आध्वर्यवपद्धतिः ।

तत्रौ सहेत्यध्वर्युरुपांशु(१) ।

पुनर्दक्षिणापरेऽध्वर्युः पूर्वोत्तरे यजमानः ।

यजमानः पृच्छति, अध्वर्यो किमत्र इति ।

अध्वर्युणा भद्रम्, इति प्रोक्ते तन्म इति यजमानो ब्रूयात् ।

ॐ तन्मे अस्तु ।

अध्वर्युः (२)प्रोक्षत्येनान् रक्षोहण इत्याग्नेयादिक्रमेण । भेदे मन्त्रावृत्तिः सान्निपातित्वात् (३) ।

"ॐ रक्षोहणो वो व्वलगहनः प्रोक्षामि व्वैष्णवान्" (५।२२) ।

अवनयनावस्तरणे चावटवद्रक्षोहणोरक्षोहण इति । खातक्रमेण प्रत्येकमुदकासेकः ।

"ॐ रक्षोहणो वो व्वलगहनोऽवनयामि व्वैष्णवान्" (५।२५) ।

तथैव दर्भैस्तरणम् ।

"ॐ रक्षोहणो(४) वो व्वलगहनोऽवस्तृणामि व्वैष्णवान्" (५।२५) ।

तनूनुपरि कुशान् कृत्वा अधिषवणे फलके द्व्यङ्गुलान्तरे वैकङ्कते(५) प्रक्षालिते प्राची अरत्निमात्रे सन्तृण्णेवोपदधाति,

पर्यूहति च रक्षोहणौ रक्षोहणाविति ।

तत्राग्निष्टोमे असन्तृण्णे (६)एव, अतो भेदादुभयत्र मन्त्रः । उक्थ्यादौ तु सन्तृण्णत्वेन मन्त्रः । सन्तृण्णे कीलकैः परस्परं संधिते इत्यर्थः ।

---

(१) प्रश्नप्रतिवचनसम्बन्धादुच्चैः प्राप्ते वचनादुपांशुत्वमुच्यते । अथवा वागन्त पक्षेऽप्युपांशुत्वप्राप्त्यर्थमुपांशित्युक्तम् ।

अयं च चोदितार्थाभिधायी, अनेकयजमानके "तन्नः सहे"त्येवमूह्यते ।

(२) प्रोक्षणमुक्तं परिशिष्टे—

"उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम् ।
तिरश्चावोक्षणं प्रोक्तं नीचेनाभ्युक्षणं स्मृतम्" इति ।

(३) नन्वनड्युद्याजने (का० श्रौ० ७।९।११) अक्षोपाञ्जने (का०श्रौ० ८।३।२८) चायं न्यायो वर्णितः । सत्यं—तथापि प्रत्युदाहरणमुच्यमानमादर्शसम्मार्जनवन्निर्मलं भवतीति ।

(४) अत्रेयं मीमांसा—

तन्त्रेणोपरवे मन्त्रो भिद्यते वा, बहूक्तितः ।
तन्त्रं, बहूक्तिः पूजार्था भिन्नोऽसौ खेयभेदतः ।
(जै० न्या० मा० ११।४।२६) ।

(५) श्येनयागे शवनभ्ये अधिषवणफलके भवतः (का० श्रौ० २२।३।१२) ।

(६) अत्रार्थं विचारः—

सन्तृण्णेहीर्घसोमे तत्प्रकृतौ विकृतावुत ।

आध्वर्यवप्रवृत्तिः ।

"ॐ रक्षोहणौ वां व्वलगहनाऽउपदधामि व्वैष्णवी" (५।२५) ।

चात्वालमृद्भिः पर्यूहणम् ।

"ॐ रक्षोहणौ वां व्वलगहनौ पर्यूहामि व्वैष्णवी" (५।२५) ।

तयोरानडुहं (१)चर्माधिषवणं परिकृत्तꣳ(२) सर्वरोहितं निदधाति व्वैष्णवमसीति ।

"ॐ व्वैष्णवमसि" (५।२५) ।

तस्मिन् ग्राव्णः पञ्च व्वैष्णवा स्थेति । भेदे मन्त्रावृत्तिः ।

"ॐ व्वैष्णवा स्थ" (५।२५) ।

खरं पञ्चचत्वारिंशदङ्गुलावकाशे उपरवाणां पुरस्तात् करोति, उद्धतावेक्षते सिकतोपकीर्णं चतुरस्रं चतुरङ्गुलोच्छ्रयमर्थपरिमाणम् । अत्र संस्कारद्वयमेव ।

इति हविर्द्धानसम्बन्धिकरणम् ।

(औदुम्बरीमानम् ।)

अथ सदःसम्बन्ध औदुम्बरीकरणम् । अन्तःपात्यात् षट् प्रक्रमान् प्राङ् यात्वा दक्षिणा सप्तमं महान्तं त्रिपदप्रक्रमं मीत्वा, तत्रौदुम्बरीं(३)

दीर्घस्य सोम इत्युक्ते प्रकृतावस्तु तदनम् ।
सामानाधिकरण्यस्य षष्ठीतो बलवत्वतः ।
दैर्घ्ययुक्तोक्तस्थ्यसंस्थादावुत्कर्षोऽन्यत्र बाधनात् ।
(जै० न्या० मा०३।३।३९-४०) ।

(१) प्राग्ग्रीवमुत्तरलोमेति परिभाषायामुक्तमेव, "चर्माण्युत्तरलोमानि प्राग्ग्रीवाणी"(का० श्रौ० १।१०।४) ति ।

(२) सर्वरोहितमिति वचनादृगोचम । गोविषयो हि रक्तो वर्णो रोहित इत्युच्यते मन्त्रवर्णाच्च । "अंशुं दुहन्तो अध्यासते गवी" (ऋ० सं० १०।९४।९।)ति ।

(३) औदुम्बरी निखननप्रदेशादूर्ध्वं यजमानमात्री कार्या । निखननार्हप्रदेशस्तु ततोऽधिकः ।

तदुक्तमापस्तम्बेन—"ऊर्ध्वं निखाताद्यजमानसम्मिते" (११।१०।२) ति ।युक्तं चैतत् । यदि चापरेण सह यजमानप्रमाणा क्रियते तदा सदसो नीचतया आभवे श्रुत"मुत्थिता ह्युपसर्पन्ती" त्येतद्विरुध्यते । औदुम्बरीति सदसो मध्यस्थूणा विशाखा भवति । "उदरमेवास्य सद" इति "तस्मध्य औदुम्बरीं मिनोती"(श०ब्रा०३।६।१।२) ति च प्रकृत्य "अथ य एष मध्यमः शङ्कुर्भवति वेदेर्जघनार्धे" (श०ब्रा०१।६।१।३) इत्यादि श्रुतत्वात् ।

मानवे—उदग्वंशं सदोऽन्तर्मायु मिनोति । औदुम्बरी वर्षिष्ठा स्थूणानां द्वयोर्यस्योऽन्या अन्त्या द्वयिष्ठाः (२।२।३।२२—२३) इति ।

आज्ययवपद्धतिः ।

मिनोति यजमानमात्रीम् । तत्पुरस्ताद्यूपवच्छ्रिते ।

दक्षिणतः समन्त्रं ब्रह्मास्ते ।

(१)अभ्यादि करात्याव(ट)स्तरणात् ।

देवस्य त्वेत्यभ्रिमादाय ।

"ॐदेवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णो हस्ताभ्याम् । आददे नायसि" (५।२६) ।

अवटं परिलिखतीदमहमिति ।

"ॐइदमहर्ठं० रक्षसाङ्ग्रीवा अपि कृन्तामि" (५।२६) ।

उदकोपस्पर्शः । तूष्णीमभ्या खात्वा प्राचः पार्श्वानुद्यूपति । पुरःस्थितायामौदुम्बर्यां कुशमुष्टिस्थापनम् । यवोऽसीत्यप्सु यवानोप्य ।

"ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीः" (५।२६) ।

तेन प्रोक्षत्यग्रमध्यमूलानि दिवे त्वेति प्रतिमन्त्रम् । प्रोक्षामीति सर्वत्र साकाङ्क्षत्वात् ।

"ॐदिवे त्वा प्रोक्षामि" ।

अग्रम् ।

"ॐअन्तरिक्षाय त्वा प्रोक्षामि" ।

मध्यम् ।

"ॐपृथिव्यै त्वा प्रोक्षामि" ।

मूलम् ।

अवटे शेषमासिञ्चति शुन्धन्तामिति ।

"ॐशुन्धन्तांल्लोकाः पितृषदनाः" (५।२६) ।

उदकोपस्पर्शः । अवटोपरि बर्हींषि प्राञ्चयुदञ्चि च प्रास्यति पितृषदनमसीति ।

"ॐपितृषदनमसि" (५।२६) ।

उदकोपस्पर्शः ।

---

(१) अभ्यादानादेः सर्वस्यात्र पुनः श्रवणादभ्यादानाद्यवटमध्ये प्रागुदग्बर्हिःप्रासनपर्यन्तं सर्व कर्म कुर्यात् । तथा हि श्रुतिः—

"तदवटं परिलिखती" (श० ब्रा० ३।६।१।३) ति प्रकृत्य "सोऽभ्रिमादत्ते देवस्य त्वेति(४) । अथावटं परिलिखतीदमहमिति(५) । अथ खनति प्राञ्चमि(६)ति । अथ यवमत्यः प्रोक्षण्यो भवन्ति(७) । स यवानावपति यवोऽसीति (११) । स प्रोक्षति (१२) । अथ याः प्राक्षण्यः परिशिष्यन्ते (१३) । अथ बर्हींष्यृषि (१४)" । इत्यादि ।

औदुम्बरीमुद्दिवमित्युच्छ्रयति(१) सहोद्गात्रा ।

'ॐउद्दिवꣳ स्तभानान्तरिक्षं पृण दूर्ठंहस्व पृथिव्याम्" (५।२७)।

द्युतान इति मिनोति(२) पञ्चमांशादधिकाम् ।

"ॐद्युतानस्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण धर्मणा"(५।२७)।

ब्रह्मवनित्वेति पाꣳशुभिः पर्यूहति ।

"ॐब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि" (५।२७)।

ब्रह्मदूर्ठंहेति मैत्रावरुणदण्डेन समन्तं त्रिः पर्यूहति । सकृन्मन्त्रेण त्रिस्तूष्णीम् ।

"ॐब्रह्म दूर्ठंह क्षत्रं दूर्ठंहायुर्दूर्ठंह प्रजान्दूर्ठंह" (५।२७)।

समं(मां) भूमि(र्मि)कृत्वाद्भिरुपलिप्य उपसिच्य यजमानं ध्रुवा' स्रीति वाचयत्यौदुम्बरीमालभ्य ।

औदुम्बरीमालभस्व ।

"ॐध्रुवासि द्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया भूयादि"ति ब्रूहि ।

यजमानः–औदुम्बरीमालभ्य ।

"ॐध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया भूयात्"(५।२८)।

औद्गात्रपद्धतिः ।

अथोद्गाता औदुम्बरीमुच्छ्रयिष्यन देवयजनं पूर्वेण गत्वा(३)आप्रानेन तीर्शेन प्रविशेत् यद्युद्गातुर्गृहं देवयजनस्य दक्षिणस्यां दिशि स्यात् । यदि देवयजनस्य प्राच्यामुदीच्यां प्रतीच्यां वा उद्गातुर्गृहं स्यात्तदा देवयजनमुत्तरेण गत्वा आप्रानेन तीर्शेन प्रविशेत् ।

सदसः पूर्वद्वारे खातावन्तरेण प्रविश्य प्रागग्रामौदुम्बरीं पूर्वेण गत्वा दक्षिणत उदङ्मुखस्तिष्ठति ।

अध्वर्युणा सहोच्छ्रयेदक्षिणोत्तराभ्यां पाणिभ्यामौदुम्बरीं गृहीत्वा ।

'द्युतानस्त्वा मारुत उच्छ्रयतूद्दिवꣳ स्तभानान्तरिक्षं पृण दूर्ꣳह पृथिवीमि'ति

औदुम्बरीं खाते प्रक्षिपेत् ।

'आयेाष्ट्वा सदने सादयाम्यवतश्छायायाꣳ समुद्रस्य हृदय' इति निधाय जपेत् ॥

---

(१) "प्राचीनकर्णाꣳ सहोद्गात्रोच्छ्रये" (११।९।१३) दित्यापस्तम्बः ।

(२) "प्राक्कर्णीमवदधाती" (२।२।३।१६) ति मानवसूत्रे विशेषः ।

(३) अन्तरेण चत्वालोत्करौ सञ्चरः सर्वत्रानादेशे तदाप्नानं तीर्शम् (द्रा०श्रौ०२।१।७।)।

प्रजया भूयादिति पशुभिरिति वा संसृज्य ब्रूयात्। प्रजया पशुभिरिति यावत्।

अध्वर्युः पूर्णाहुतवदाज्यशेषं संस्कृत्य औदुम्बरीकर्णे हिरण्यं निधाय तत्र (१)स्रुवेण विशाखे जुहोति घृतेन द्यावापृथिवी इति।

(२) भूमिप्राप्ते स्वाहा करोति सर्वत्र मन्त्रवत्सु (३)जुहोत्युपदेशादनाम्नातप्रतिषेधाच्च।

औद्गात्रपद्धतिः।

'नमः समुद्राय नमः समुद्रस्य चक्षसे मा मा यून्वाहासीदर्गस्यूर्जोदग ऊर्जम्मेधेह्यूर्जं मेधेधेह्यन्नं मे धेह्यन्नम्मे धेहीति यावदध्वर्युरैन्द्रमसीति छदिभिरवच्छादयति तावदौदुम्बरीं न विसृजेत्।

अध्वर्युणा होमे कृते तस्यैव प्रकारेण (उद्गाता) विशाखयोर्मध्ये स्रुवेण जुहुयात्।

'घृतेन द्यावापृथिवी आप्रीणाथाꣳ स्वाहे'ति पूर्वामाहुतिं यथा भूमिमाज्यं प्राप्नोति तथा जुहुयात्।

द्यावापृथिवीभ्यामिदं न मम।

प्रजातये स्वाहेत्युत्तराम्।

प्रजापतय इदं न मम।

विशाखस्याधस्तादौदुम्बरीं हस्तद्वयेन परिगृह्य जपेत्।

'दिवि देवां दूर्ठ०ह मयि प्रजामि'ति।

मध्ये परिगृह्य जपेत्।

'अन्तरिक्षे वयाꣳसि दूर्ठ०ह मयि पशूनि'ति।

---

(१) स्रुवेणेति जुह्वा निवृत्त्यर्थम्। अतश्चात्र स्रुवस्यैव सम्मार्गः। "अथ स्रुवेणोपहत्याज्यं विष्टपमभिजुहोती" (श०ब्रा०३।६।१।२०) ति श्रुतेः। विष्टं निविष्टं उपरिस्थापितं बलकादि पाति रक्षति अधःपतनाद्वारयतीति विष्टपं विशाखं तदभिजुहोतीत्यर्थं इति हरिस्वामी।

मानवे त्वशेषः—"अन्तरा कर्णौ हिरण्यं निधाय घृतेन द्यावापृथिवी आपृणेत्यभिजुहोति। आमूलादभिस्रावयती" (२।२।३।२०-२१) ति च।

आपस्तम्बः—"तस्या विशाखे हिरण्यं निधाय घृतेन द्यावापृथिवी आपृणेथामिति स्रुवेण जुहुदान्तमौदुम्बरीमन्ववस्रावयत्येषा सदसः स्थूणानां वर्षिष्ठे"(११।१०।४-५)ति।

(२) भूमिप्राप्ते स्वाहा करोतीति शाखान्तरात्।

(३) वषट्कारेण वै स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते। तत्र वषट्कारस्य यजतौ नियतत्वात्परिशेषात्स्वाहाकारस्य जुहोतौ निवेशः। नियतो हि वषट्कारो यजतौ "ता वा एता पञ्च व्याहृतयो भवन्त्योश्रावयेत्यादेः (श०ब्रा१।९।२।१६) याज्या या अधिवषट् करोतीति श्रुतेश्च।

आध्वर्यवपद्धतिः ।

"ॐघृतेन द्यावापृथिवी पूर्येथार्ठ०स्वाहा" (५।२८)[1]।

इदं द्यावापृथिवीभ्याम् ।

इत्यौदुम्बरीमानम् ।

(सदोनिर्माणम् ।)

अथ सदोमानम्(१) । (२)नाभिदघ्नर्ठ०सदः । मत्या वा । उद्ग्वर्ठ०शम् । अष्टादशारत्न्येकविर्ठ०शतिश्चतुर्विर्ठ०शतिर्वा दीर्घ नव तिर्यक् दघ्न्यस्य अर्द्धायामो वा ।

औदुम्बरीं मध्ये पृष्ठ्यामेके ।

इन्द्रस्य छदिरिति दक्षिणा त्रिवर्गस्य मध्यमं छदिरारोप्य ।

"ॐ इन्द्रस्य छदिरसि विश्वजनस्य च्छाया" (५।२८) ।

औद्गात्रपद्धतिः ।

मूले परिगृह्य जपेत् ।

'पृथिव्यामध्योषधीर्द्वर्ठ०ह मयि सजातामि'ति ।

छदिषा छद्यमानकाले जपेत् ।

'दिव्यं छद्मार्ँसि सन्ततिनाम विश्वजनस्य छाया नमस्तेऽस्तु मा माहिर्ठ०सीः' ।

---

(१) नवके लक्षणं कुर्याच्छ्रोणि कुर्याच्त्रिषु त्रिषु ।
उन्नतो नवकः पाशः सदसोमानमुच्यते ॥

(२) नाभिप्रमाणं यस्य तन्नाभिदघ्नं = नाभिमात्रम् । "प्रमाणे द्वयसज्दघ्नञ्मात्रचः" (पा०५।२।३७) इति प्रमाणे दघ्नच् प्रत्ययः । नाभिप्रमाणं सदः प्रान्तेषूच्चं भवति शाखान्तरात् । मध्ये तूच्चमेव ; औदुम्बर्या मध्यस्थूणाया यजमानमात्रोत्वोपदेशात् ।

तथा चाह पितृभूतिः—सदसो यन्मध्य उच्चैस्त्वं तदौदुम्बरीप्रमाणमेव, दृष्टार्थत्वादौदुम्बर्युच्छ्रयणस्येति । अन्यथा ह्युत्थितो ह्यवसर्पति यदुद्गाताऽऽभवे इति विरुध्येत अत्रेयं मीमांसा—

वृष्टिकामः सदो नीचैरिति कामोऽस्ति वा न वा ।
विद्यते स्पर्शवत्कामश्चेतनस्थस्ततो न हि ॥
(जै० न्या० मा० १०।२।२४)

वृष्टिकामी सदो नीचैर्मिनुयादिति कामना ।
अध्वर्योः स्वामिनो वाऽऽद्यो वाक्यान्मातुस्तदोच्यते ॥
परस्मैपदतोऽध्वर्युव्यापारस्य परार्थता ।
प्रतीताऽतो वाक्यबाधे तपोवत्स्वामिनोऽस्तु तत् ॥
(जै० न्या०मा० ३।८।९-१०)

आध्वर्यवप्रकृतिः ।

औदुम्बरीं विसृज्य प्रवेशमार्गेण निष्क्रामेत् ।

अपरपूर्वे च छदिषी मन्त्रेण त्रिवर्गौ चोत्तरतः पूर्ववत् क्रमेण समन्त्रौ एवं च नवकृत्वो मन्त्रश्छदिषां तावत्वात् ।

पूर्वदक्षिणादिक्रमेण षड्भिः कटैः परित्वेति परिवार्य ।

"ॐ परि त्वा गिर्वणो गिरऽइमा भवन्तु विश्वतः ।

वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः" । (५।२९) ।

प्रतिकटं मन्त्रावृत्तिः ।

पश्चिमपूर्वोभयद्वारम् ।

हविर्द्धानवत्परिषीवणग्रन्थ्यभिमर्शनान्यैन्द्रैः । परिषीवणम् ।

"ॐ इन्द्रस्य स्यूरसि" (५।३०) ।

ग्रन्थिकरणम् ।

"ॐइन्द्रस्य ध्रुवोऽसि" (५।३०) ।

अभिमर्शनम् ।

"ॐ ऐन्द्रमसि" ।

इति सदोमानादिकरणान्तम ।

(धिष्ण्यनिवपनम् ।)

अथाग्नीध्रमण्डपधिष्ण्यनिर्मितिः ।

हविर्द्धानापरान्तमुत्तरेणाग्नीध्रमग्न्यागारद्वारमन्तर्वेद्यर्धं भूयः सर्वं वा पूर्वदक्षिणोभयद्वारं निष्ठाप्य वैश्वदेवमसीत्यालभते ।

"ॐ वैश्वदेवमसि" (५।३०) ।

ततो धिष्ण्यान्निवपति सर्वत्र प्राङ्मुखः । पञ्च भूसंस्कारान्कृत्वा पुनरुद्धतावोक्षिते पुरीषं निवपति यजमाने स्फ्येनान्वारब्ध उदङ्मुख उपविश्य विभूरसीति प्रतिमन्त्रम् ।

तत्रा(१)ग्नीध्रीयं पूर्वं होतृधिष्ण्यवर्जमुदङ्मुखः । सिकताश्चोपरि सर्वत्र निवपति । मन्त्रे रौद्रेणेति सर्वत्रानुषज्यति (२) ।

आग्नीध्रीये दक्षिणतः समन्त्रं ब्रह्मास्ते । ततश्च सदसि स्वस्थाने ।

"ॐ विभूरसि प्रवाहणो रौद्रेणानीकेन पाहि(३) माऽग्ने पिपृहि

---

(१) सदो मध्यमरेखायां तत्रोदीचीं निशामय ।
तस्याः प्राञ्चं पदं त्यक्त्वा ततो धिष्ण्यानि कारयेत् ॥

(२) स च मन्त्रः शाखान्तरादेकवचनान्तपदघटितः ।

(३) अयं च शाखान्तरीय एकवचनान्तः । स्वशाखीयस्य बहुवचनान्तस्य (५।३४) तु धिष्ण्योपस्थाने विनियोग आम्नातः—"अग्नयः सगरानिति धिष्ण्या (का० श्रौ०९।८।२३) नि"ति ।

आध्वर्यवपद्धतिः।

माऽग्ने गोपाय मा नमस्ते ऽअस्तु मा मा हिर्ठ०सीः" (५।३१)।

(१)सिकताप्रकिरणमन्ते प्राङ्मुखेन षट् सदसि धिष्ण्याः। तत्र किंचिद्विशेषः।

प्रत्यङ्मुखो द्वारमपरेण होतुः। पुरीष(सिकता)निवापः पूर्ववत्सर्वम्।

"ॐ वह्निरसि हव्यवाहनो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्ते ऽअस्तु मा मा हिर्ठ०सीः" (५।३१)।

तत आग्नीध्रीयमुत्तरेणोत्तरवेदिं पूर्वेण हविर्द्धानं दक्षिणेनागत्य पूर्वद्वारेण सदः प्रविश्य दक्षिणपूर्वेणौदुम्बरीं मैत्रावरुणस्य धिष्ण्यम्।

"ॐ श्वात्रोऽसि प्रचेता रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्ते ऽअस्तु मा मा हिर्ठ०सीः" (५।३१)।

ततो यथागतं सदसि प्रत्यागत्य होतृधिष्ण्यमुत्तरेण चतुरः समान्तरान् ब्राह्मणाच्छंऽसि-पोतृ-नेष्ट्रच्छावाकानां पूर्ववत्सर्वम्।

"ॐ तुथोऽसि विश्ववेदा रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्ते ऽअस्तु मा माहिर्ठ० सीः" (५।३१) (२)।

"ॐ उशिगसि कवी रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्तेऽ अस्तु मा मा हिर्ठ०सीः" (५।३२) (३)।

"ॐ अङ्घारिरसि बम्भारी रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्तेऽ अस्तु मा माहिर्ठ०सीः" (५।३२)। (४)।

"ॐ अवस्यूरसि दुवस्वान् रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्तेऽ अस्तु मा माहिर्ठ०सीः" (५।३२)। (५)।

तत आग्नीध्रीयादुत्तरेण पूर्वेणोत्तरवेदिं च गत्वा आग्नीध्राद्दक्षिणठं० सम्प्रति वेद्यन्ते दक्षिणामुखो मार्जालीयं निवपति।

"ॐ शुन्ध्यूरसि मार्जालीयो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्ते ऽअस्तु मा माहिर्ठ०सीः" (५।३२)।

यथेतमेत्य सदोद्वारं पूर्वेण तत्तन्मुखस्तिष्ठन्ननुदिशत्याहवनीय—बर्हिष्पवमानदेश-चात्वाल-शामित्रौदुम्बरी-ब्रह्मासन-शालाद्वार्य-प्राजहितोत्करान्-सम्राडसीति प्रतिमन्त्रं क्रमेण प्राङ्मुखः सम्राट् (इति)। आहवनीयम्—

---

(१) अत्र भूसंस्काराः पुरीषनिवापः सिक्तोपकिरणं चेत्येते पदार्थाः सर्वधिष्ण्येष्वेकस्यामेव दिश्युपविष्टेन कर्तव्याः। आग्नीध्रीये उदङ्मुखेन होत्रीये प्रत्यङ्मुखेन मार्जालीये दक्षिणामुखेन शेषेषूदङ्मुखेनेति।

(२) इति ब्राह्मणाच्छंसिनः। (३) इति ब्राह्मणाच्छंसिन उत्तरतः पोतुः।

(४) इति तत उत्तरं नेष्टुः। (५) इति नेष्टुरुत्तरमच्छावाकस्य।

आध्वर्यवपद्धतिः ।

"ॐ सम्राडसि कृशानू रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्ते ऽअस्तु मा माहिर्ठ०सीः" (५।३२) ।

(१)बहिष्पवमानदेशम्—

"ॐ परिषद्योऽसि पवमानो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माग्ने गोपाय मा नमस्तेऽ अस्तु मा माहिर्ठ०सीः" (५।३२) ।

चात्वालम्—

"ॐ नभोऽसि प्रतक्वा रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्ते ऽअस्तु मा माहिर्ठ०सीः" (५।३२) ।

शामित्रम्—

"ॐ मृष्टोऽसि हव्यसूदनो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्तेऽ अस्तु मा माहिर्ठ०सीः" (५।३२) ।

औदुम्बरीम्—

"ॐ ऋतधामासि स्वर्ज्योती रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माग्ने गोपाय मा नमस्ते ऽअस्तु मा माहिर्ठ०सीः" (५।३२) ।

ब्रह्मासनम्—

तच्च प्रशास्तृधिष्ण्यनैर्ऋत्यामिति बहवः ।

दक्षिणतो महावेदेर्बहिरिति रामः ।

शालामुखीयाद्दक्षिणत इति महादेवयाज्ञिकाः ।

"ॐ समुद्रोऽसि विश्वव्यचा रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्तेऽ अस्तु मा माहिर्ठ०सीः" (५।३३) ।

शालाद्वार्यम्—

"ॐ अजोस्येकपाद्रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माग्ने गोपाय मा नमस्ते ऽअस्तु मा माहिर्ठ०सीः" (५।३३) ।

(२)प्राजहितम्—

"ॐ अहिरसि बुध्न्यो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्ते ऽअस्तु मा माहिर्ठ०सीः" (५।३३) ।

उत्करम्—

"ॐ समुद्राऽसि विश्ववेदा ऊनातिरिक्तस्य प्रतिष्ठा रौद्रेणानीकेन पाहि माऽग्ने पिपृहि माऽग्ने गोपाय मा नमस्ते ऽअस्तु मा माहिर्ठ०सीः"

इति सदोमानादिधिष्ण्यानुदेशनान्तम् ।

इति विहाराकृतिः ।

---

(१) चात्वालस्य दक्षिणतोऽन्तर्वेदि बहिष्पवमानदेशः ।

(२) प्राजहितमिति आधस्य गार्हपत्यस्य यौगिकं नाम ।

आध्वर्यवपद्धतिः ।

(अग्नीषोमीयः पशुः ।)

अथाग्नीषोमीयः (१)पशुः ।

उत्करे द्विर्महावेदेर्दक्षिणतो बहिश्च द्विरिति चतुरासनम् ।

उत्करे वाचस्पतिप्रैषः ।

वेदैर्बर्हिः समन्त्रं ब्रह्मोपवेशनम् ।

यजमान वाचं यच्छेति प्रैषः ।

तस्य वाग्यमनम् ।

आहवनीयशालाद्वार्यदक्षिणाग्नीनां परिस्तरणम् ।

शालाद्वार्यस्य पश्चादुत्तरतो वा पात्रासादनम् ।

अग्निहोत्रहवणी-वज्रं—एते आसन्ने एव । शम्या, दृषदुपलम्, पवित्रे पूर्वे एव, आज्यस्थाली, कुशमुष्टिः, अभ्रिः, महान्त्यन्यानि सन्नहनावच्छादनानि ।

(२)(पत्ते—योक्त्रम्,

स्रुवः, जुहूपभृत्, आतिथ्यायां स्तृतानि सन्नहनावच्छादनानि ।) परिधयो विधृत्यौ च, आज्यम्, होतृषदनम्, वपाश्रपण्यौ, शूलम्, उखासिः, वसाहोमहवनी, प्राशित्रहरणे, इडापात्री, अन्तर्धानकटश्च ।

उपकल्पनीयानि—इध्मा, महावेदेस्तरणार्थं शकटबर्हिः,

(३)(आतिथ्यसन्नहनेनातिथ्यप्रस्तरोपसन्नद्धमातिथ्यबर्हिः)

दधिपृषदाज्यपात्रद्वयम्, एकं संयोजनार्थमपरं ग्रहणार्थम्, प्लक्षशाखा

---

(१) अत्रैता मीमांसा द्रष्टव्याः ।

अग्नीषोमीयकः कोऽपि छाग एवोत चोदिते ।
अविशेषेण कोऽपि स्याच्छागो मन्त्रो विशेषणात् ।
(जै०न्या०मा० ६।८।११) ।

पशुरालम्य इत्यत्र पश्वैक्ये यजनाङ्गता ।
नास्त्यस्ति वाऽऽद्यः स्वपदे श्रुत्या पश्वङ्गतागतेः ।
आदौ स्वप्रत्ययोपात्त आसन्नतरकारके ।
योगः क्रतौ पशौ चेति क्रमे यागाङ्गतोचिता ॥
(ज० न्या० मा० ४।१।१२-१३)

न पुंल्लिङ्गे विवक्षा वा विवक्षाऽनुपयोगतः ।
आद्योऽनुष्ठित्यपेक्षत्वात्सङ्ख्यावत्तद्विवक्ष्यताम् ।
(जै० न्या० मा० ४।१।१४) ।

(२) रेखान्तर्गतः पाठः "ख" पुस्तके नास्ति ।

(३) रेखान्तर्गतः पाठः "क" पुस्तके नास्ति ।

आध्वर्यवपद्धतिः ।

यूपः,

प्रथमशकलं चषालं स्वरुश्चेतियूपचतुष्टयम् ।

यवाः, आपः, अवटकुशाः, अवटार्थमाज्यम् , यूपाञ्जनीयञ्चेति । दीक्षितदण्डो मैत्रावरुणाद्गृहीत्वा, त्रिगुणरशना ।

पक्षे उपाकरणतृणम् ।

शकलं कुशतरुणावरणिद्वयं चेति मन्थनचतुष्टयम् ।

द्विगुणरशना, पशुः, शमिता ।

पक्षे परिपशव्याज्यम् ।

पान्नेजन्य आपः, हिरण्यशकलानि षट् ।

द्विपशुपक्षे—

शूलोखासिवपाश्रपणीद्विगुणरशनापशूनां द्वयं द्वयम्। हिरण्यशकलानि (१)द्वादशेति विशेषः ।

वाग्यमनमध्वर्योः ।

पूर्वेद्युः सर्वसंस्कृताभिर्मदन्तीप्रोक्षणीभिः पात्रप्रोक्षणम् ।

"ॐ दैव्याय कर्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामि" (१।१३) ।

अन्तःपात्ये प्रोक्षणीनिधानम् ।

वाग्विसर्ग उभयोः ।

कुक्कुटाहननम् ।

"ॐ कुक्कुटोऽसि मधुजिह्व इषमूर्जमा वद त्वया व्वयर्ठ० संधातर्ठ० संधातं जेष्म" (१।१६) ।

अध्वर्योराज्यनिर्वापः । वेदवन्धः । महावेदिखननम् ।

(२) उत्तरपरिग्रहः सप्रैषः ।

---

(१) हिरण्यशकलप्रमाणं परिशिष्टे—

हिरण्यशकलार्थं तु हिरण्यं यस्य नोच्यते ।
कृष्णलेनैव तद्व्याख्या यज्ञे सिद्ध्यति याज्ञिकी ॥
कृष्णलं त्रियवं मानं ताम्रायसमतः परम् ।
सुवर्णार्धं च माषार्णासुवर्णाश्च त्रिसप्ततिः ।

(श्लो०शु०२७-२८।)

(२) अत्र सूत्रम्—परिस्तरण-पात्रसर्ठ०सादन-प्रोक्षणाज्यनिर्वपणानि कृत्वोत्तरपरिग्रहादिकरोति । (का०श्रौ० ८।६।२५) ति । अस्यार्थः—आहवनीयशालाद्वार्यदक्षिणाग्नीनां परिस्तरणं पाशुकानां पात्राणामासादनं तेषामेव प्रोक्षणं पाशुकस्यैवाज्यस्य च निर्वपणम् । अत्रानुक्तमप्याज्यनिर्वापात्पूर्वं कुक्कुटाहननं, आज्यनिर्वापानन्तरं च वेदकरणं भवत्येव, ततो महावेदेरुत्तरपरिग्रहादि भवति । महावेदेः सम्मार्जनान्तं प्राक्कृत-

आध्वर्यवपद्धतिः ।

"ॐ ब्रह्मन्नुत्तरं प्रतिग्रहं परिगृहीष्यामि" ।

"ॐ बृहस्पते परिगृहाण वेदिर्ठं० सुगावो देवाः सदनानि सन्त्वस्यां बर्हिः प्रथताꣳ साध्वन्तर्हिꣳस्ना पृथिवी देवी देव्यस्तु [उपांशु-] देवतावर्धय त्वं नाकस्य पृष्ठे यजमानो अस्तु । सप्तऋषीणाꣳसुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि ।

ॐ परिगृहाणेति ब्रह्मानुज्ञातः—

"ॐ सुषमाचासि शिवाचासि ।

ॐ स्योनाचासि सुषदाचासि ।

ॐ ऊर्जस्वतीचासि पयस्वती च" (१।२७) ।

अन्तःपात्यसहितमनुमार्जनम् ।

"ॐ पुराक्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम् ।

यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासो ऽअनुदिश्य यजन्ते" (१।२८) ।

बर्हिरन्तं प्रेषति ।

प्रोक्षणीरासादयेध्मं बर्हिरुपसादय । (१)(आप्राणीताः प्रोक्षण्यः । प्राक्षणीपात्रे यदि स्युस्तर्हि ताः पात्रान्तरे कृत्वा तत्र पूर्वदिनसꣳस्कृतप्राणीताप्रोक्षणीनां निधानम् ।)

अन्तःपात्ये प्रोक्षणीनां सादनम् । न स्फ्योदक्प्रहारः । पाण्योरवनेजनम् । अन्तःपात्ये इध्मशकटबर्हिषोरासादनम् । अनुज्ञातोऽप्राणीतेनेध्मं

मधुना खननस्यावसरस्तन्निषेधाभावात्खननादि करोतीत्यर्थः । उत्तरपरिग्रहस्यादौ यत्खननं तदादि करोतीत्यर्थः ।

ननु कथमेतज् ज्ञायते परिस्तरणपात्रासादनादि सर्वं पाशुकमिति ।

उच्यते, धिष्ण्यनिर्वपनानन्तरमग्नीषोमीयस्य पशोः प्रक्रमस्य श्रुतत्वात् "सोऽपराह्णे वेदिर्ठं० स्तीर्त्वे" (श०ब्रा०३।६।३।४) त्युपक्रम्याज्यमधिश्रयति स्रुचः सम्मार्ष्टीति । प्रागाज्याधिश्रयणात्पूर्वाह्ण एव कृतमिति गम्यते महावेदेरपि (कर्म) खननात्प्राक् पूर्वेद्युरेव कृतं इदानीं खननाथेव कर्तव्यम् ।

नन्वश्रुतत्वाद्वेदिसंस्काराणामपूर्वत्वाच्च सोमे दार्शपौर्णमासिका वेदिसंस्करा इह नैव प्राप्नुवन्तीति । सत्यमपूर्वः सोमः । तथापि तु वेदिशब्दस्य तु संस्कारवचनत्वाद्वेदिशब्देनाक्षिप्ता इति कृत्वा क्रियन्ते । ननु चोदकेन प्रापिता इति कथं पुनः संस्कारवचनो वेदिशब्द इति । लोके कस्मिँश्चिद्द्रव्ये वेदिशब्दस्याप्रसिद्धत्वादेव संस्कारसम्बन्धस्य श्रुतत्वाद्रूपवत्संस्कारवचन इति गम्यते । तेन "सोपराह्ण" इत्यपराह्णे स्तरणस्य विधानात् स्तरणात्प्राग्वेदिसंस्कारास्ते पूर्वाह्ण एव कर्तव्या इत्यभिप्रायेणोक्तमुत्तरपरिग्रहादि करोतीति ।

(१) रेखान्तर्गतः पाठः ख पुस्तके नास्ति ।

आध्वर्यवपद्धतिः ।

प्राक्षति, सप्राणीतेन वेदेः । अनुज्ञातः सप्राणीतेन शकटबर्हिः ।

पयस्यापक्षे बर्हिरसि स्रुगूभ्यान्त्वेति ।

वशापक्षे बर्हिरसि त्वा जुष्टमित्येव ।

साग्नौ वशा नित्या ।

प्रणीतानां निःशेषो मूलावसेकः ।

अप्राणीतानां तु सशेषः ।

ताः सपवित्रा अग्निहोत्रहवण्यां कृत्वाऽन्तःपात्ये पञ्चर्श निदधाति । सुगुप्तं इध्मं निधायाग्नीषोमीयाय अपराह्णे शकटबर्हिविस्रꣳस्य सन्नहनं विस्रꣳस्य दाक्षणस्यां महावेदिश्रोणौ निधाय बृहदन्यैरवच्छाद्यापन्नꣳस्तृणं निरस्यत् ।

ऊर्णम्रदसमित्युपपत्या मन्त्रावृत्या वेदिꣳस्तृणाति शकटबर्हिषोत्तरवेदिखरोपरवधिष्ण्यवर्जम् ।

ब्रह्मा स्तीर्णायां यथेतमेत्यास्ते दक्षिणतः शालाद्वार्यस्य ।

सप्रवर्ग्ये प्रवर्ग्योत्सादनपयःशेषमिश्रं द्वारापिधानपूर्वं व्रतप्रदानम् । अप्रवर्ग्ये केवलं दैवीन्धियमित्यादि ।

अर्धव्रते प्रत्ते(१) ।

---

(१) अर्द्धव्रते प्रत्ते प्रविश्य प्रणयनीयाधानम् (का० श्रौ० ८।६।३०) । वेदिस्तरणानन्तरं पत्नीयजमानाभ्यामर्धव्रते प्रत्ते सति प्रविश्य पत्नीशालां पत्नीशालाद्वार्येव प्रणयनीयस्येध्मस्याधानं कर्तव्यम् । "सोऽपराह्णे वेदिꣳस्तीर्त्वेत्यादि (श०ब्रा०३।६।३।४) श्रुतेः। अपराह्णे स्तीर्त्वेति ब्रुवन्स्तरणात्प्राचः पदार्थान् पूर्वतरमेव कृतान्दर्शयति । अर्द्धव्रतं प्रदायेति ब्रुवन् पूर्वार्द्धेऽप्यर्धव्रतमेव प्रत्तं दर्शयति । सम्प्रपद्यन्ते समुदिताः प्रपद्यन्तेऽग्नीषोमप्रणयनाय, तदर्थमेवेध्माधानादि कुर्वन्तीति ।

एतच्चेध्माधानमाग्नीध्रीयप्रणयनार्थम् । अयमपीध्मोऽपरिमितकाष्ठकस्त्रियूनवद्धः स्यात्। अपरिमितं प्रणयनीयं त्रियून (का० श्रौ० सू० १।३।२१) मित्युक्तत्वात् ।

प्रविश्येति प्रवेशनेन निष्क्रमणं लक्ष्यते तच्च शाखाछेदनार्थम् । यतोऽत्रो आम्नायते परिवाप्यायै दोहन (का० श्रौ० ८।९।२४) मिति । अत्र च साम्नाय्यधर्मप्रवृत्त्या शाखाछेदनवत्सापाकरणादिकमपराह्णे प्रकृतिवत्प्राप्नोति तस्य चावसरो न ज्ञायते तेन प्रवेशनेन लक्षितस्य निष्क्रमणस्याज्ञातप्रयोजनस्यैतत्प्रयोजनं कल्प्यते यच्छाखाछेदनार्थमेतन्निष्क्रमणमिति । तेनात्र शाखाछेदः प्रगुणितकरणं, तत्र सप्रवर्ग्ये चतुर्णां दोहानां वत्सापाकरणम् । तत्र प्रथमतृतीयचतुर्थवत्सापाकरणे इन्द्राय सरस्वतिवते भागमिति गोऽवपर्शनमन्त्रे विशेषः । द्वितीये त्विन्द्राय भागमिति दधिघर्मस्य । अप्रवर्ग्ये तु त्रय एव दोहाः तत्र दधिघर्मो न भवति । ततः शाखापरिवासन्मुपवेषकरणशाखोदूगूहनं चेति एतावत्कृत्वा शालां प्रविश्य प्रणयनीयाधानमिति ।

मानवश्रौतसूत्रे च स्तरणानन्तरं अर्द्धव्रते प्रदायोत्तरत आहवनीयस्येध्मावहिरुप-

आध्वर्यवपद्धतिः ।

(पलाशशाखाछेदनादिदोहधर्माः ।)'

निष्क्रम्य (१)पर्णशाखां छिनत्ति शामित्रीं वेषेत्वेत्यूर्जेत्वेति वा, छिन द्मीति वाभयोः साकाङ्क्षत्वात् ।

सादयतीं (२।२।४।१३) ति । काठके च-वत्सापाकरणस्य कालान्तरमुक्तम् 'वत्सानपाकृत्य प्रवर्ग्यवति पात्राण्युद्वास्याग्निकर्मणाग्निं प्रणीये'ति । उपसत्समासानन्तरं प्राक् प्रवर्ग्योत्सादनादित्यर्थः । मानवे च "उत्तमायामुपसदि पौर्वाह्णिकीं कृत्वा शाखामच्छेत्यर्धव्रते प्रदाय सद्यः कुर्यादापराह्णिकी (२।२।२।१) मिति । आपस्तम्बे चोत्तरपरिग्रहानन्तरमुक्तम् "उत्तरं परिग्रहं परिगृह्यात्यत्र प्रतिप्रस्थाता शाखामाहृत्य मन्त्रावरुण्यायाः पयस्यायाः वत्सानपाकरोति प्रोक्ष्य बर्हिस्त्रिर्वेदिं प्रोक्षति नाप्रोक्षितामभिचरन्त्यथैनां बर्हिषा बहुलं प्राचीनं स्तीत्वें (११।५।११) ति ।

प्रतिप्रस्थातुः सवनीयनिर्वापविधानान्तस्यैव शाखाहरणं वत्सापाकरणं च युक्तम् । एवं कात्यायनेनाग्नीदैन्द्रमेकादशकपालं निर्वपती (श्रौ० ९।१।१९) त्यादिनाग्नीध्रस्य पुरोडाशधानाकरम्भदधिपयस्यारूपसवनीयकरणविधानात्तत्करणरूपं शाखाछेदन—वत्सापाकरण—दोहादिकं तेनैव कर्तव्यम् । सवनीयानामलङ्करणान्तस्याङ्गकलापस्य तत्कर्तृकत्व विधानात् ।

सूत्रान्तरेषु शाखाछेदनादेः कालान्तरे दृष्टत्वात् भाष्यकार (पद्धतिकारैः) स्यं कालः किं मूलं दृष्ट्वा कल्पित इति न ज्ञायते न च प्रविश्येत्यस्यान्यथानुपपत्या कल्पयितुं शक्यते अस्यान्यथैवोपपत्तेः "नादीक्षितो व्रतयन्तं पश्यती"ति निषेधाद् व्रतकरणान्तरं प्रविश्येत्यस्य सार्थकत्वात् तेन प्रविश्येत्यनेनैवं ज्ञायते नादीक्षितो व्रतयन्तं पश्यतीति न च शाखाछेदनाद्यध्वर्युकर्तृकं तस्याग्नीत्कर्तृकत्वात् येन प्रविश्यप्रणयनीयाधानं मित्यनेन शाखाछेदनार्थं निष्क्रान्तस्य प्रवेशेन न समानकर्तृकमिध्माधानं विधीयते । न चेदमेककर्तृकं प्रवेशनं येनैककर्तृकं शाखाछेदनार्थं निष्क्रमणमनेन लक्ष्यते श्रुतौ "अर्धव्रतं प्रदाय संप्रयन्त' इति बहुवचनदर्शनात् । तेन एतत्प्रवेशनं बहुकर्तृकं नैकस्य निष्क्रमणं ज्ञापयति प्रवेशनमग्नीषोमप्रणयनार्थं युक्तमेव तत्र बहूनामुपयोगात् अतः प्रवेशनेन शाखाछेदनार्थनिष्क्रमणं लक्ष्यत इति यत्किंचिदेव । तेन प्रागुक्तसूत्रान्तरोक्तकालेषु शाखाछेदनादि कर्तव्यमिति युक्तं स्वशाखायां कालस्यानुक्तत्वात् । तेन प्रातः प्रथमोपसदोऽनन्तरं वा उपसत्समासानन्तरं वा उत्तरपरिग्रहानन्तरं वा बर्हिः प्रोक्षणात्प्रागाग्नीध्रेण शाखाछेदनादिकं वत्सापाकरणान्तं कर्तव्यमिति देवः ।

(१) अत्र पर्णशाखा "बहुलपलाशामशुष्काग्रां प्रागुदीचीमन्यतमां वे" (का०श्रौ० ४।२।४) ति सूत्रोक्ता ग्राह्या । तदभावे—

प्रागुदीच्यादिका शाखा बहुपर्णादियोगिनी ।
नास्ति चेत्तत्र पर्णादिगुणान् हित्वा दिगादरः ।

(त्रि०सं०।२।५९) इति ।

अत्र मीमांसा—

प्राचीमाहरतीत्यत्र दिक् शाखा वाऽस्तु दिक्श्रुतेः ।
आहार्यत्वं दिशो नास्ति शाखा तेनोपलक्ष्यते ॥

(जै०न्या०मा०४।२।३) ।

आध्वर्यवपद्धतिः ।

"ॐइषे त्वा छिनद्मि(१)" (१।१) । सन्नमयामीति घोत्तरे ।

"ॐ ऊर्ज्जे त्वा सन्नमयामि" । (१।१)

मातृभिर्वत्सानसंसृज्य वत्सर्ठं० शोखयोपस्पृशति वायव इति· षट्कृत्वः ।

"ॐवायवस्थ" (१।१)

देवो व इति मातृणामेकां व्याकृत्य ।

"ॐदेवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण ऽआप्यायध्वमघ्न्या इन्द्राय सरस्वतिवते भागमप्रजावतीरनमीवाऽअयक्ष्मा मा वस्तेनऽईशत माऽघशर्ठ०सो द्रुघाऽअस्मिन गोपतौ स्यात बह्वीः" (१।१।) ।

ततोऽन्यासां पञ्चानां तूष्णीं पृथक्करणम् । इत्येकस्यापाकरणम् । एवमेव(२) त्रयाणामपाकरणम् ।

तत्र सप्रवर्ग्ये सोमे द्वितीयोपाकरणे इन्द्राय भागमिति विशेषः । एवं चतुर्णां षड्वर्गाणां क्रमेण वायवस्थेत्यादिमन्त्रावृत्याऽपाकरणम् ।

अप्रवर्ग्ये इन्द्राय सरस्वतिवत इत्येव त्रयाणामेवोपाकरणं न चतुर्णाम्।

(उपवेशकरणादि ।)

अग्रतः प्रादेशमितां शाखां(३) परिवास्य मूलादुपवेषं करोत्यरत्नि· मात्रम् ।

---

(१) अत्रेयं मीमांसा द्रष्टव्या—

इषे त्वादिर्मन्त्र एको भिन्नो वैकः क्रियापदे ।
असत्यर्थास्मारकत्वादेकादृष्टस्य कल्पनात् ।
छेदने मार्जने चंतौ विनियुक्तौ क्रियापदे ।
अध्याहृते स्मारकत्वान्मन्त्रभेदोऽर्थभेदतः ।
(जै०न्या०मा०२।१।३२-३३) ।

(२) अत्र त्रिकाण्डमण्डने विशेषः—

गवां साम्नाय्यदोग्ध्रीणां षडादीनामसम्भवे ।
द्विर्दुह्यन्तेऽत्र गास्तिस्त्र एकां षट्कृत्व एव वा
(२।९३) । इति ।

(३) अत्र मीमांसा—

शाखां छित्वोपवेषं च मूले कुर्वीत शाखया ।
नुदेद्वत्सान्कपालानि स्थापयेदुपवेषतः ।
द्वयं प्रयोजकं छित्तेर्वत्सापाकृतिरेव वा ।
आद्योऽग्रमूलयोरत्र विभज्य विनियोगतः ।
उपवेषं करोतीति साकाङ्क्षोऽन्यार्थमूलतः ।
पूयतेऽतोऽनुनिष्पादो स तस्माद्युज्यतेऽन्तिमः ।
(जै० न्या० मा० ४।२।४-६) ।

आध्वर्यवपद्धतिः ।

ॐ वेषोऽस्युपवेषो द्विषतो ग्रीवा उपवेविद्धि व्वेशाँ अग्ने सुभग धारयेह ।

ऋद्धाः कर्मण्या अनपायिनो यथाऽसन्निति ।

वसोः पवित्रमिति पवित्रमस्यां बध्नाति कुशौ त्रिवृद्वा ।

"ॐ व्वसोः पवित्रमसि" (१।२) ।

यजमानस्य पशून्पाहीत्यग्न्यगारस्यान्यतरस्य पुरस्ताच्छाखामुपगृहति ।

"ॐ यजमानस्य पशून्पाहि" (१।।१) ।

(अग्नीषोमप्रणयनम्)

अथाग्नीषोमप्रणयनम् ।

ब्रह्मा स्वासनादुत्थाय पूर्वेणोत्तरवेदिमाग्नीध्रीयꣳसदश्चोत्तरेण पूर्वेण शालाद्वार्यमागत्य तद्दक्षिणतस्तूष्णीमुपविशति ।

तदुत्तरतो यजमानश्च ।

अध्वर्युः प्रविश्य प्रणयनीयाधानꣳ शालाद्वार्ये ।

इषे त्वेत्याज्यमधिश्रयति(१)शालाद्वार्ये ।

अग्नीदिति देवः ।

अध्वर्युरिति कर्कः ।

"ॐइषे त्वा" (१।१२) अधिश्रयामि । पर्यग्निकरणम् ।

"ॐअन्तरित ॰रक्षाऽन्तरिता अरातय" (का० श्रौ०२।५।२२) ।

उदकोपस्पर्शः ।

औद्गात्रपद्धतिः ।

अग्नीषोमप्रणयनकाले प्रस्तोता अनुव्रजन्नग्निर्मूर्द्धेत्यग्नेर्व्रतं त्रिर्गायेत् । तदनन्तरमेव अनुव्रजन्त्सन्ते पयाꣳसि इति सोम तं त्रिर्गायेत् ।

सोमऋषिः त्रिष्टुप्छन्दः सोमोदेवता ।

सोमं पूर्वं नयन्ति चेत्सोमव्रतं प्रथमं गायेत्पश्चादग्नेर्व्रतम् ।

हौत्रपद्धतिः ।

(अथाग्नीषोमप्रणयनम् ।)

मितेषु यज्ञागारेषु अग्नीषोमौ प्रणयन्ति । तत्प्रभृत्यानूवन्ध्यायाः संस्थानादन्तरेण चात्वालोत्करौ तीर्थम् । तेन प्रपद्योत्तरेणाग्नीध्रीयं धिष्ण्यं सदश्च गत्वोत्तरेणाध्वर्यू यज्ञपात्राणि च पूर्वया द्वारा शालां

(१) अत्रसूत्रम् । आज्याधिश्रयणस्रुक्संमार्जनोद्वासनावेक्षणानि कृत्वा (का०श्रौ० ८।६।२९) इति ।

आध्वर्यवपद्धतिः ।

अन्तःपात्ये प्रोक्षणीप्रैषासादने—

"ॐप्रोक्षणीरासादय, बर्हिरुपसादय, स्रुचौ समृद्धि, पत्नीꣳसन्न-ह्याज्येनोदेहि" इति प्रैषः ।

पत्नेः—पत्नी (शब्दाभावः) सन्नहनाभावः ।

स्फ्योदक्प्रहारः ।

न पाण्योरवनेजनं कृतत्वात् ।

अन्तःपात्ये स्फ्यातिश्यर्वाहः प्रस्तरपरिधिविधृतीनामासादनम् ।

वेदाग्रनिष्पत्तिः ।

स्रवसम्मार्गः, तद्वदसेः, जुह्वाः, तूष्णीं वसाहोमहवन्याः, उपभृतः, प्राशित्रहरणे, इडापात्रा च सम्मृज्य सम्मार्जनानां यत्नेन रक्षणम् ।

पत्नेः पत्नीसन्नहनम् ।

आज्येोद्वासनम् ।

"ॐऊर्जे त्वा" (२।३०) उद्वासयामि ।

पत्न्याज्यावेक्षणम् ।

"ॐअदब्धेन त्वा चक्षुषाऽवपश्यामि ।

अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्ने धाम्ने मे भव यजुषे यजुषे"(२।३०) ।

आज्यमन्तःपात्ये करोत्यपरं प्रोक्षणीभ्यः । शालाद्वार्यमपरेणास्ते(१) यजमान उपस्थे सोमं कृत्वा ।

अध्वर्युः शालाद्वार्यमपरेण सोमक्रयणीपदं परिकिरति सर्वम् ।

चतुर्द्धैके आहवनीयस्यापयमनीष्वाग्नीध्रीयस्यान्तेवासांश्चने च ।

आज्यप्रोक्षणीरन्तः(२)पात्यदेश उत्पूय सवितुस्त्वेति सवितुर्व इति।

"ॐसवितुस्त्वा प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मि-भिः"(१।३१) । "ॐसवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः" (१।३१) ।

आज्यमवेक्षते तेजोऽसीति यजमानो वा ।

ईक्षणान्ते नानाऽज्यकरणम् ।

आज्ये दधिप्रक्षेपः । विपरीतं वा ।

---

(१) अनेकयजमानके एक एवोपविशेत । "उपस्थे सोमं कृत्वे" ति क्त्वाप्रत्यय आनन्तर्यमात्रे । पदार्थानां भिन्नकर्तृकत्वात प्रणयनीयाधानानन्तरमाज्याधिश्रयणा-(शा० ब्रा०३।६।३।४) देरेव श्रुतत्वात्

(२) उत्पवनस्यान्तःपात्यदेशनियमः शाखान्तरात् ।

आध्वर्यवप्रकृतिः ।

स्रुवेणाज्यग्रहणं चतुर्जुह्वां धामनामेति सकृन्मन्त्रः । उपभृति चतुर्गृहीतम् ।

ततः पृषदाज्यं (आज्यं) दधिमिश्रं पञ्चगृहीतं ज्योतिरसीति समिद्न्तेन पृषदाज्यपात्रे सकृन्मन्त्रेण चतुस्तूष्णीं न ध्रुवा ।

"ॐ ज्योतिरसि विश्वरूपं विश्वेषां देवानाꣳसमित्" ।

ऋत्विजो धारयन्त्याज्यानि । अपिव्रताश्चान्वारभन्ते(१) यजमानं; वाससाच्छादय(२)त्येनान् । चरत्सु नादियेत(३) ।

(वैसर्जनहोमः ।)

अध्वर्युः शालाद्वार्ये पूर्णाहुति(४)वदाज्यर्थं सꣳस्कृत्य प्रदीप्तमिध्मं त्वर्थं०सोमेति (५)प्रचरण्यामिजुहोति शालाद्वार्ये सकृद्गृहीतर्थं० समिद्वर्जम् ।

पालाशी स्रुक् प्रचरणीति देवः ।

अग्निहोत्रहवणीति कर्कः ।

'ॐ त्वर्थं० सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः उरु यन्तासि वरूथꣳस्वाहा"(५।३५) ।

इदर्थं० सोमाय० ।

पुनस्तथैव जुषाणो अप्तुरिति द्वितीयाम् ।

---

(१) अनेकयजमानके सर्वेषां यथास्वमपिव्रतान्वारम्भः । अपिव्रतास्ते उच्यन्ते येषां येषां यजमानव्रते अपित्वमस्ति । दायत्वेनाविभक्ता इति पितृभूतिः । अपिव्रता गोत्रजा इति कर्कः । अपोति संपर्गं । व्रतमिति कर्म नाम । संसृष्टं साधारणं कर्म येषां ते अपिव्रता अविभक्तदायादास्ते ह्येकेनापि कृष्यादिकर्म कृतं सर्वे उपजीवन्तीति हरिस्वामिनः । व्रतं भोजनं यजमानेन सह प्राप्तभोजनः स्यात् बन्धुवर्गः स्यादिति माधवः ।

(२) वस्त्रेणाच्छादनं शाखान्तरात् । अनेकयजमानके सर्वेषां छादनम् । "प्राग्दशेन वाससाऽमात्यं यजमानं च प्रच्छादयन्ति पुमांसो यजमानमन्वारभन्ते स्त्रियः पत्नीमि"ति (२।२।४।२३)मानवश्रौतसूत्रे विशेषः ।

(३) अतश्चापचारे प्रायश्चित्ताभावः ।

(४) पूर्णाहुतिविधानम्—"निरूप्याज्यं गार्हपत्येऽधिश्रित्य स्रुक्स्रुवं च सम्मृज्योद्वास्योत्पूयावेक्ष्य गृहीत्वाऽन्वारब्धवदर्थं० सर्वत्र स्वाहेति" (का०श्रौ०४।१०।५) ।

(५) अस्या आसादनादि सहैव कर्तव्यम् । प्रचरणी वसाहोमहवनोतः पृथग् भवति यतोऽनूबन्ध्यायां गर्भसद्भावे प्रतिप्रस्याता वशावदानकाले "प्रचरण्यां मेधमवधतो" त्यत्र वसाहोमहवन्यां व्यावृतायां प्रचरणी दृश्यते । तथा च मानवश्रौतकल्पे—"प्राग्दशे पाशुकानि पात्राणि प्रयुनक्ति स्रुवादक्षिणां स्रुचं प्रचरणीं तस्याः प्रथमं तूष्णीं सम्मार्जने" (२।२।४।१५) मिति ।

आध्वर्यवपद्धतिः।

"ॐ जुषाणोऽअप्तुराज्यस्य व्येतु स्वाहा"(५।३५)।

इदमप्तवे(१)।

अध्वर्युः सोपयमनीकमाज्यमुद्यम्य अग्नये प्रह्रियमाणायानुवाचयति।

अग्नये प्रह्रियमाणायानुब्रू३हि।

सोमाय प्रणीयमानायेति(२)वा।

अध्वर्युपुरुषा आहवनीयं गच्छन्त्यादाय ग्रावद्रोणकलशसोमपात्राणी(३)ध्मचतुष्टयञ्च सन्नद्धं, वपापवण्यौ, रशने, शकलवृषणमरणी

हौत्रपद्धतिः।

प्रपद्य शालामुखीयस्य पश्चादुपविश्य आचम्य,

अग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रू३ही(४)त्युक्ते—

"ॐ(५)सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै।

---

(१) अयमेव होमो वैसर्जनहोम इत्युच्यते। अत्रेयं मीमांसा—

वैसर्जनाख्यहोमीयवाससो ग्रहणस्मृतिः।
प्रमा न वा श्रुत्यबाधात्प्रमा स्यादृष्टकादिवत्।
दृष्टलोभैकमूलत्वसम्भवे श्रुत्यकल्पनात्।
सर्ववेष्टनवद्बाधहीनाऽप्येषा न हि प्रमा॥

(जै० न्या०१।३।३।)

(२) शाखान्तरे (शां० श्रौ०२।१४।७) त्वग्नीषोमाभ्यां प्रणीयमानाभ्यामित्येवंविधः प्रैष उक्तोऽस्ति।

(३) कठसूत्रे एतेषां सर्वेषामग्नीषोमीयपात्रैः सहासादनं प्रोक्षणं नयनं च विहितमस्ति। स्वसूत्रे (का०श्रौ०८।७।९) द्रोणकलशस्य पृथगुपादानं श्रुत्या (श०ब्रा०३।६।३।१०) नुकरणमात्रम्।

इध्मं—विंशतिकाष्ठकं परिध्यादि चतुष्टयं च सन्नद्धं सम्यग्बद्धं, चतुर्धं च प्रागुक्तम्। आश्वत्थालः प्रस्तरः ऐक्षव्यौ विधृती बर्हिश्चैतदेवाग्नीषोमीयोपसत्स्वपि चतुष्टय (का०श्रौ०८।१।११) मिति। तदेवेह नेयं, वपाश्रपण्यौ वपा श्रप्यते याभ्यां ते वपाश्रपण्यौ काश्मर्यमय्यौ विशाखाविशाखे। द्वे रशने द्विगुणरशना पञ्चार्था, यूपार्था, त्रिगुणरशना च, शकल एकः। वृषणौ द्वे दर्भतृणे। अरणी द्वे अधरारणिरुत्तरारणिश्चेति मन्थनचतुष्टयम्। मानव श्रौतसूत्रेऽग्नीषोमीयमजं (२।२।४।२६) चेति पठ्यते। एतानि सर्वाण्यादायाहवनीयं प्रति गच्छन्ति ब्रह्मयजमानाध्वर्व्वादयो बहवः। आज्यानि च यैः पूर्वं धृतानि त एव नयन्ति दृष्टार्थत्वात्। अतस्तानि पृथङ्नोक्तान्यर्थप्राप्तत्वात्। आददते ग्राव्णः द्रोणकलशं वायव्यानीध्मं काश्मर्यमयान्परिधीनाश्वत्थालं प्रस्तरमैक्षव्यौ विधृती तद्बर्हिरुपसन्नद्धं भवती (श०ब्रा०३।६।३।१०) त्यादि श्रुतत्वात्। अत वायव्यानि=सोमपात्राणि। यद्यप्यग्नीषोमीये मन्थनस्य विकल्पः, तथापि मन्थनचतुष्टयं नोयत एव सवनीयार्थम्। ग्रावादीनामप्युत्तरेष्वेवोपयोक्ष्यमाणानां नयनविधानात्।

(४) अग्नये प्रह्रियमाणायानुब्रू३हि। सोमाय प्रणीयमानायानुब्रू३हीति वाऽध्वर्युवशात् (का०श्रौ०८।७।३) प्रेषितो वक्ष्यमाणा ऋचः पठेत्। (५) शां०श्रौ० ५।१४।८।

आध्वर्यवपद्धतिः ।

व, आज्यानि स्रुवादीनि च ।

ब्रह्मा हुते च सोममादायाग्निमन्वेति ।

यजमानो वा सोमꣳ० हरेत् ।

अध्वर्युर्गच्छन् अग्ने नयेति वाचयति यजमानम् ।

"ॐअग्ने नय सुपथा राये ऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम ऽउक्तिं विधेमे"ति ब्रूहि ।

यजमानः—

"ॐ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽ उक्तिं विधेम" (५।३६) ।

पूर्वद्वारेण निष्क्रम्योत्तरेण सदो(१)हृत्वाऽऽग्नीध्रेऽग्निं निदधाति ।

ब्रह्मा च सोममन्यस्मै प्रदायानिहितेऽग्नौ आग्नीध्रमुत्तरेण गत्वा पूर्व-

हौत्रपद्धतिः ।

अथास्मभ्यं सवितः सर्वतातादिवे दिव आसुवा भूरि पश्वो३म् ।
सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै ।
अथास्मभ्यं सवितः सर्वतातादिवे दिव आसुवा भूरि पश्वो३म् ।
सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै" ।

इत्यासीनोऽनूच्य, विरमेत् ।

ततोऽनुगच्छन्नपरा अष्टौ ऋचोन्वाह ।

"अथास्मभ्यं सवितः सर्वतातादिवे दिव आसुवा भूरि पश्वो३म् ।

उतिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे । उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा३म्(२) ।

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पंक्तिराधसं देवा यज्ञं नयन्तु नो३म्(३) ।

होता देवो अमर्त्यः पुरस्ता देति मायया । विदथानि प्रचोदयो३म्(४)।

वाजी वाजेषु धीयतेऽध्वरेषु प्रणीयते । विप्रो यज्ञस्य साधनो३म्(५) ।

धिया चक्रे वरेण्यो भूतानां गर्भमादधे(६) । दक्षस्य पितरं तनो३म्(७) ।

---

(१) "हृत्वाग्नीनि" इति ख पाठः ।

(२) ऋ० १।४०।१। (३) ऋ० १।४०।३। (४) ऋ० ३।२७।७।

(५) ऋ० ३।२७।८।

(६)।"होता देवो अमर्त्यः" इत्यस्य तृचस्य तृतीयायामृचि "भूतानां गर्ममादध" इति यः पादस्तं ब्रुवन् गर्भकामायै गर्भमियं लभतामिति ध्यायादुत्तरेण सदोऽनुसंयम्। उदरं सद इति सामान्यात्। (७) ऋ० ३।२७।९।

आध्वर्यवपद्धतिः ।

द्वारेण प्रविश्य ध्रिष्णयस्य दक्षिणत उपविशति तूष्णीम् ।

यजमानश्च तत्पश्चिमतः निहितेऽग्नौ आवट्टोगकलशसोमपात्राणि च तत्र निदधाति । सोमासन्दीं च आग्नेयकोणे । अग्नीषोमीयं पशुमप्यानीय तत्र बध्नाति शाखान्तरात् ।

सर्वसंस्कृतेनैवाज्यशेषेण प्रचरण्यां सकृद्गृहीतेन समिद्वर्ज्जमयन्न इति जुहोत्यस्मिन् ।

"ॐ अयन्नोऽअग्निर्वरिवस्कृणोत्वयमृधः पुर एतु प्रभिन्दन् ।

अयं वाजाञ्जयतु वाजसातावयर्ठ० शत्रूञ्जयतु जर्हृषाणः स्वाहा" (५।३।७) ।

हौत्रपद्धतिः ।

उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयं । नमो भरन्त एमसोऽ३म् ।

राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्द्धमानं स्वे दमोऽ३म् ।

स नः पितेव सूनवेऽग्ने सूपायनो भव"

विरमेत् ।

ततोऽध्वर्युः आग्नीध्रीयेऽग्निं निदधाति(१) आहुतौ हूयमानायाम् ।

"सचस्वा नः स्वस्तयेऽ३म् (२) ।

अग्ने जुषस्व प्रति हर्यं तद्वचो मन्द्र स्वधाव ऋतजात सुक्रतोम् ।"

आरमेत् ।

तत उत्तरेणाग्नीध्रीयमग्निं अनुसंयन् ।

"येा विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः सन् दृष्टौ पितुमाँ इव क्षयोऽ३म्(३) ।

सोमो जिगाति गातुविद्देवानामेति निष्कृतम् । ऋतस्य योनिमासदोऽ३म् ।

सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे । अनमीवा इषस्करोऽ३म् ।

अस्माकमायुर्वर्धयन्नभिमातीः सहमानः" ।

आरमेत् ।

तत आहवनीये हूयमानायाम्—

"सोमः सधस्थमासदोऽ३म्( ) ।

उप प्रियं पनिप्नतं युवानमाहुतीवृधम्" ।

---

(१) अग्निनिधानात्पूर्वं ब्रह्मयजमानावुपविशतो दक्षिणतः । ब्रह्मा चाग्नीध्रमुत्तरेण गत्वा पूर्वद्वारेण प्रविश्य ध्रिष्ण्यस्य दक्षिणतस्तूष्णीमास्ते ।

(२) ऋ० १।१।७-९ (३) ऋ० १।१४४।७। (४) ऋ०३।६२।१३-१९ ।

आध्वर्यवपद्धतिः ।

इदमग्नये ।

तमुत्तरेण परिक्रम्य पूर्वया द्वारोपनिष्क्रम्याहवनीयस्योत्तरतो निदधात्यन्यदाज्यसोमवर्जम् ।

ब्रह्मा यथेतमेत्यास्ते दक्षिणतो हुते च सोममादायावहनीयं चातीत्य ।

यजमानः स्वसञ्चरेणेत्य दक्षिणतो बर्हिर्वेद्युपविशति ।

आज्यानि सोमं च धारयन्त्येव ।

औद्गात्रपद्धतिः ।

ओ३ वा २।३। सन्ते पया । सो ३ समु । यन्तु वाजाः । संवृष्णिया ।
नी ३ अभि । माति षाहाः । आप्यायमा । नो ३ अमृ । तायसोमा

हौत्रपद्धतिः ।

अत्रारमेत् ।

ततः प्रपाद्यमाने—

"अगन्म विभ्रतो नमो(१) ३म् ।

तमस्य राजा वरुणस्तमश्विना क्रतुं सचन्त मारुतस्य वेधसः ।

दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते(२)३म्।

अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य" ।

इत्यनुप्रपद्य, अत्रारमेत् ।

ततो दक्षिणे हविर्द्धाने राजनि सन्न उत्तरतो दक्षिणा तिष्ठन् ।

"इन्द्रविन्द्रस्य सख्यं जुषाणः श्रौष्टीवधुरमनु राय ऋधो३म्(३) ।

श्येनो न योनिं सदनं धिया कृतं हिरण्ययमासदं देव एषति ।

परिणंति बर्हिषि प्रियं गिराश्वो न देवाँ अप्येति यज्ञियो३म्(४) ।

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपश्रवस्तमम् ।

ज्येष्ठराजं ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनो३म्(५) ।

अस्तभ्नाद्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः ।

आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानो३म्(६) ।

एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपां स नः शर्म त्रिवरूथं वि यंसत्पातं नो द्यावापृथिवी उपस्थो३म् ।

एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपां स नः शर्म त्रिवरूथं वि यंसत्पातं नो द्यावापृथिवी उपस्थो३म् ।

---

(१) ऋ०९।६७।२९ । (२) ऋ०१।१५६।४ । (३) ऋ०८।४८।२ ।
(४) ऋ०९।७२।६ । (५) ऋ०२।२३।१ । (६) ऋ०८।४२।१ ।

आध्वर्यवपद्धतिः ।

धिष्ण्याध्वर्यवायोऽध्वर्योरेवापरिसमाप्तेः ।
उत्तरवेदाविध्मप्रोक्षणादि करोति ।
ब्रह्मन्निध्मं० (१) अनुज्ञात इध्मं प्रोक्षति
"ॐकृष्णोऽस्याखरेष्ठोऽग्नये त्वाजुष्टम्प्रोक्षामि" (२।१) ।
खरोत्तरार्द्धे वेदिप्रोक्षणं(२)वेदिरसीति ।

औद्गात्रपद्धतिः ।

दिविश्रवा ।[२ १] सी ३[२] उत ।[१] मानिधिष्वा ।[३ ४] ओवा २।[५] २ ।[१८] ओ २[१] वा ४[३] औ हो वा ।[५ ६ १] न्य । ३ (३) ॥ ३० ॥

हौत्रपद्धतिः ।

एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपां स नः शर्म त्रिवरूथं वि यंसत्पातं नो द्यावापृथिवी उपस्थो३(४)म् ।

इति परिधाय ततो मदन्तीरुपस्पृश्य अग्नीषोमप्रणयनकाले येन पटेनाच्छादितो भवति तं गोत्रपटं वृद्धसम्प्रदायाद्गृहीत्वा सव्यावृद्धविधानयोः (५)पूर्वस्यां द्वार्युपविशति । सव्यावृदुत्तरेण हविर्द्धानेन गत्वा तत्रैवोपविशति ।

इत्यग्नीषोमप्रणयनम् ।

---

(१) "ब्रह्मन्निध्मं प्रोक्षिष्यामि" इति ब्रह्माणमामन्त्रयेत् ।

ततो ब्रह्मा—"ओं प्रोक्ष यज्ञं देवता वर्धय त्वं नाकस्य पृष्ठे यजमानो अस्तु सप्त ऋषीणाꣳसुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि" (का०श्रौ०२।२।८) इति मन्त्रमुपांशु पठित्वा "ॐ ३ प्रोक्ष" इत्युच्चरन्नध्वर्युमनुजानीयात् ।

ततोऽध्वर्युः ॐ कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामी"ति मन्त्रेणेध्मं प्रोक्ष्य "ॐ वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामी"ति खरोत्तरार्द्धे वेदिप्रोक्षणं कुर्यात् ।

(२) प्रकृतौ शाखान्तरे श्रूयते "वेदिरसि बर्हिषा त्वेति त्रिर्वेदिं प्रोक्षतो"ति । तत्रायं संशयः—किं प्रत्याम्नायं मन्त्रावृत्तिरुत सकृदेवादौ मन्त्र इति । प्रोक्षणार्थत्वान्मन्त्रस्य प्रोक्षणस्य च संख्याया भिन्नत्वात्प्रतिप्रधानं च गुणानामावृत्तेः प्रत्याम्नायमावृत्तिः । किं चानेन मन्त्रेण त्रिः प्रोक्षतीति वचनाद्विशिष्टमन्त्रावृत्तिर्गम्यते इति पूर्वपक्षे—संस्कार्यवेद्या एकत्वेन समन्त्रकप्रथमप्रोक्षणेन तत्संस्कारसिद्धौ पुनर्न मन्त्रः, वैयर्थ्यात् । प्रोक्षणावृत्तिस्तु वाचनिकी, इति वैषम्यम् । अतः सकृदेव मन्त्रावृत्तिरितिपूर्वमीमांसा सिद्धान्तः । तथा च सूत्रे—"वेदिप्रोक्षणे मन्त्राभ्यासः कर्मणः पुनः प्रयोगात् । एकस्य वा गुणविधिर्द्रव्यैकत्वात्तस्मात्सकृत् प्रयोगः स्या' (मी०द०११।४।४७-४८) दिति ।

(३) आ० भा० १, ३, २, = आ० गा० ४, १. ९ ।

(४) ऋ० ८।४२।२

(५) केचिदध्वर्यवोऽपरया द्वारा हविर्द्धाने सोमं प्रवेशयन्ति, तस्मिन् क्रियमाणे

आध्वर्यवपद्धतिः ।

"ॐवेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि" (२।१)।

पश्चाद्धोत्तरवेदेर्देशे ब्रह्मन् बर्हिः० ।

अनुज्ञातो बर्हिः प्रोक्षति स्रुग्भ्यस्त्वेति ।

"ॐ बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि" (२।१)।

सशेषो मूलावसेकः(१) । बर्हिर्विस्रंस्य पुरस्तादातिथ्याप्रस्तर-ग्रहणं विष्णोरिति ।

"ॐ विष्णोस्तुपोऽसि" (२।२)।

ब्रह्मणे समर्पणं सन्नहनं विस्रंस्य स्तीर्यमाणदेशस्य नैर्ऋत्यां निधायान्यैरवच्छादयति । स्रुवोत्तराद्ध प्रोक्षिते एकवृत् स्तरणं पश्चाद्धोत्तरवेदेः ।

"ॐ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थान्देवेभ्यः" (२।२)।

दक्षिणतस्तूष्णीं बर्हिषि प्लक्षशाखां स्तृणाति ।

नापन्नतृणनिरसनम् ।

इध्मात्समिधमादाय ब्रह्मणः प्रस्तरं चादायाहवनीयं कल्पयत्युपर्युपरि प्रस्तरं धारयत्युल्मुके उदूहत्यनुयाजाश्चेत् ।

आतिथ्यपरिधीन् परिदधाति गन्धर्व इति प्रतिमन्त्रम् ।

मध्यमम् ।

"ॐ गन्धर्वस्त्वा विश्वावसुः परिदधातु ब्विश्वस्यारिष्टयै यजमानस्य परिधिरस्यग्निरिडऽ ईडितः" (२।३)।

दक्षिणम् ।

"ॐ इन्द्रस्य बाहुरसि दक्षिणो ब्विश्वस्यारिष्टयै यजमानस्य परिधिरस्यग्निरिडऽ ईडितः" (२।३)।

उत्तरम् ।

"ॐ मित्रावरुणौ त्वोत्तरतः परिधत्तान्ध्रुवेण धर्मणा ब्विश्वस्यारिष्टयै यजमानस्य परिधिरस्यग्निरिड ईडितः" (२।३)।

प्रथमं परिधिर्ठ० समिधापस्पृश्य वीतिहोत्रमित्यादधाति ।

"ॐ वीतिहोत्रं त्वा कवे द्युमन्तर्ठ० समिधीमहि ।

येनैव मार्गेण ते गच्छन्ति तेनैव पृष्ठतो होताऽनुगच्छेत् 'तमस्य राजेति प्रपाद्यमान" (शां० श्रौ० ५।१४।१७) इत्याद्यनुवचनमत्रापि पूर्वेण तुल्यम् । इयांस्तु विशेषः—अनुवचनसमाप्तौ गोत्रपटं गृहीत्वा दक्षिणावृद्वत्वाऽपरया द्वारा निष्क्रम्य ततः सव्यावृद्ध-विधानागारमुत्तरेण गत्वा तत्रैव पूर्वस्यामेव द्वार्युपविशेत् "अनुसमेति होता" (शां० श्रौ० ५।१४।२२) इति कल्पसूत्रात् । अस्मिन्नपि पक्षे ब्रह्मयजमानयोः प्राग्द्वारैव प्रवेशः।

(१) "ॐ अदित्यै व्युन्दनमसी" ति (२।२) मन्त्रेण ।

आध्वर्यवपद्धतिः ।

अग्ने बृहन्तमध्वरे" (२ । ४) ।

अनुपस्पृश्य द्वितीयाꣳ समिदसीति ।

"ॐ समिदसि" (२ । ५) ।

प्रागाहवनीयेक्षणात्कृत्वोरुविष्ण इति जुहोति सकृद्गृहीतं प्रचरणया स्रुवेण वोत्तरवेदौ ।

"ॐ उरु विष्णो विक्रमस्वोरुक्षयाय नस्कृधि ।

घृतं घृतयोने पिब प्र प्र यज्ञपतिस्तिर स्वाहा" (५ । ३८) ।

इदं विष्णवे० ।

सूर्य्यस्त्वेति जपत्याहवनीयमीक्षमाणः ।

"ॐसूर्य्यस्त्वापुरस्तात्पातु कस्याश्चिद्भिशस्त्यै" (२।५) ।

सस्वरं मन्त्रपाठः ।

आवृत्य वेदिं बर्हिषस्तृणे तिरश्ची निदधाति सवितुरिति ।

"ॐ सवितुर्बाहू स्थः" (२ । ५) ।

अन्ये वाऽयुक्तत्वात ।

"ॐ सवितुर्बाहू स्थः" (२ । ५) ।

तयोः प्रस्तरꣳ स्तृणात्यूर्णम्रदसमिति ।

"ॐ ऊर्णम्रदस्त्वा स्तृणामि स्वासस्थं देवेभ्यः" (२ । ५) ।

पाणी अभिनिदधात्या त्वा वसव इति ।

"ॐ आ त्वा वसवो रुद्रा आदित्याः सदन्तु" (२ । ५) ।

स्रुवा(चा)सि निधानं तूष्णीम् ।

शय्याशून्ये जुहुं प्रतिगृह्य निदधाति घृताचीति ।

"ॐ घृताच्यसि जुहूर्नाम्ना सेदग्निप्रेयेण धाम्ना प्रियर्ठ० सद ऽआसीद" (२ । ६) ।

बर्हिष्युपभृतम् ।

"ॐ घृताच्यस्युपभृन्नाम्ना सेदग्निप्रेयेण धाम्ना प्रियर्ठ० सद ऽआसीद" (२ । ६) ।

तूष्णीं तदुत्तरतो वसाहोमहवनीयम् ।

उपभृन्मन्त्रेण पृषदाज्यम् । प्रियेण धाम्नेति वाऽविशेषोपदेशात् (का० श्रौ० ५।४।२७) ।

"ॐ प्रियेण धाम्ना प्रियर्ठ० सद ऽआसीद" (२ । ६) ।

तूष्णीं वानस्पत्यम् । आज्यस्थाली प्रियेणेति ।

"ॐ प्रियेण धाम्ना प्रियर्ठ. सद आसीद" (२ । ६) ।

आध्वर्यवपद्धतिः ।

ध्रुवा ऽअसदन्निति स्थालीपूर्वकमालम्भः । (अहिमामित्यात्मालम्भः ।) उदकोपस्पर्शः ।

दक्षिणानसो दक्षिणतः समन्त्रं ब्रह्मास्ते ।

(१)आसाद्याज्यानि पाणी प्रक्षाल्य यजमानस्य ब्रह्मणो वा सकाशात्सोममादाय हविर्द्धानमण्डपं पूर्वया द्वारा सयजमानः प्रविशति ।

दक्षिणेऽनसि कृष्णाजिनमास्तीर्य यजमानान्वारब्धस्तस्मिन् सोमं निदधति(२) देवसवितरिति ।

"ॐदेव सवितरेष ते सोमस्तर्ठ० रक्षस्व मा त्वा दभन्" (५।३३) ।

एतत्त्वमिति विसृज्यो(३)पतिष्ठते यजमानः ।

"ॐ एतत्त्वन्देव सोम देवो देवां उपागा ऽइदमहम्मनुष्यान्त्सह रा-

---

(१) अत्र यद्यपि सूत्रकारेणासाद्याज्यानी (८।७।१६) त्याज्यासादनानन्तरमेव कृष्णजिनास्तरणाद्युक्तं तथापि "प्राकृतं च विकृता (का०श्रौ०१।५।४) वि"त्यनेन न्यायेनाज्यालम्भात्मालम्भोदकोपस्पर्शनानि ततः पूर्वं भवत्येव । तथा च शाखान्तरे—"आसाद्य हवींषि सम्मृश्याप उपस्पृश्य राजानमादाय प्रपद्यत" इति ।

(२) न्यग्रोधश्चेत्तस्यापि सोमेन सहैव प्रणयनमासादनं च, ऊहश्च मन्त्रे । "देव सवितरेतौ ते सोमन्यग्रोधौ तौ रक्षस्व मा त्वा दभता" (५।३९) मित्युभयोः स्थापनम् ।

(३) अत्र विसर्गोपदेशात्कृष्णाजिने निधानकाले यजमानः सोममन्वारभत इति प्रतीयते । "अथानुसृज्योपतिष्ठत एतत्त्वं देव सोमेति" (श०ब्रा ३।६।३।१८) श्रुतत्वात् । अनुसृज्य सोमं मुक्त्वा यजमानः सोममुपतिष्ठते कुत एतत् "अग्नीषोमौ वा ऽएतमन्तर्जम्भ आदधाते यो दीक्षत" (श०ब्रा०३।६।३।१८) इति वचनात् । सर्वमेव चातऊर्ध्वं निष्क्रमणादि याजमानं कर्म, मन्त्रलिङ्गवाक्यशेषेभ्यः आ ब्राह्मणसमाप्तेः । तत्र चाध्वर्युणानुसृष्टे यजमान उत्तिष्ठत इत्यसमानकर्तृकयोः पूर्वकालेऽनुसृज्येति ल्यप् प्राप्नोति नैष दोषः । आध्वर्यवोऽपि ह्यनुसर्गो यजमानेन क्रियत एव हेतुकर्तृकत्वात् । यथा "वाचं विसृज्य समिधादानमिति (का०श्रौ०१६।६।२) समिधमाधाय भस्मापोऽभ्यवहरती"ति । ननु च यथा "प्रतिप्रस्थाता पशुना प्रत्युपतिष्ठते" एवमीदृशो वाक्यशेषो भवति । तत्प्रत्यक्षं वरुणपाशाद्ग्नेश्च निर्मुच्यत इति । तथा च मन्त्रलिङ्गान्यपि "यां वै कां च ऋत्विज आशिषमाशासते यजमानस्यै व से"त्येवं न विधास्यन्ते । नैतदेवम्—तत्र हि प्रतिप्रस्थातृश्रवणाद्युक्तं यद्यजमानो न प्रत्युपतिष्ठते । इह तु समाख्यानप्रमाणकोऽध्वर्युर्न शक्नोति लिङ्गवाक्यशेषगम्यं यजमानं बाधितुं तस्माद्याजमाना एवोपस्थानादयः । अन्ये त्ववान्तरदीक्षाविसर्गार्थं समिदाधानं याजमानं मन्यन्ते तेनोपस्थाननिष्क्रमणे इति हरिस्वामिनः ।

न्यग्रोधे चास्य मन्त्रस्योहः "एतद्यवां सोम न्यग्रोधौ देवौ देवां उपागा" इति ।

अनेकयजमानके च सर्वे गृहपतिमन्वारभन्ते विसृज्योपस्थानं कुर्वाणं तन्मन्त्रे "उपागा इदं वयं मनुष्यानि"ति बहुषु । "इदमावां मनुष्यानि"ति द्वियजमानके विशेषः ।

आध्वर्यवपद्धतिः ।

यस्पोषेण" (५।५९) ।

यजमानः स्वाहा निरिति निष्क्रम्य(१) ।

"ॐ स्वाहा निर्व्वरुणस्य पाशान्मुच्ये' (५।३९) ।

अग्ने व्रतपा इत्याहवनीये समिधमाधाय ।

"ॐअग्ने व्रतपा या तव तनूर्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियर्ठ० सा मयि ।

यथायथन्नौ व्रतपते व्रतान्यनु मे दीक्षान्दीक्षापतिरमँस्तानु तपस्तपस्पतिः" (५।४०) ।

मदन्तीरुपस्पृश्य, अङ्गुलीर्विसृजते ।

पत्नी च (२)गार्हपत्ये तूष्णीं समिधमाधाय मदन्तीरुपस्पृस्याङ्गुलीर्विसृजते ।

अध्वर्युश्चात्वाले मदन्तीः कृत्वा नामग्रहणभोजने(३) अस्यातः कुर्वन्ति । व्रत्यनिवृत्तिः । हविःशेषभक्षः(४) सवनीये ।

अग्नीषोमीयेऽतः(५) पशुस्तद्देवत्यः पशुपुरोडाशः ।

अभ्र्यादि(६)करोति । देवस्य त्वेत्यभ्रिमादाय ।

"ॐदेवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यान्पूष्णो हस्ताभ्याम् । आददे नार्यसि" (६।१) ।

---

(१) अनेकयजमानके निष्क्रमणाद्यङ्गुलिविसर्गान्तं सर्वेषां भवति ।

(२) नानागार्हपत्यपक्षे तु स्वस्वगार्हपत्ये सर्वासां समिधादानाद्यङ्गुलिविसर्गान्तम् । एकगार्हपत्यपक्षे तस्मिन्नेव सर्वाः पत्न्यः समिध आदध्युः ।

(३) पुरुषमात्रधर्मोऽयं "तस्मादस्यान्नाश्नन्ति मानुषो हि भवति" इत्यादि श्रुतेः।

(४) हविःशेषभक्षः प्रातरेव नाद्य "तस्मादुपवसथे नाऽश्नीया"दिति निषेधात् । "प्रातः शेषांश्च भक्षांश्च भक्षयती"ति श्रुतेः । स चायं शेषो सवनीयशेषो न हविर्मात्रस्य ।

सत्रेऽपि यजमानानां भक्षणाय सवनीयपुरोडाशानामेव वृध्युपदेशात् "अथ यन्नानाः पुरोडाशाः भूयो हविरुच्छिष्टयत्समाप्त्या" इति । अत्र मानवे विशेषः "हविष्यं पत्नी प्राश्नीयाद्धविरुच्छिष्टं यजमानोऽग्रेण हविर्धाने परेण स्रुग्दण्डान् दक्षिणातिक्रम्यापरो ब्रह्मण उपविशत्येष सत्रर" इति ।

(५) पशोदवताभिधानार्थमेतत्सूत्रमव्यवधानज्ञापनार्थं च । अतःपरं सौमिकैः पदार्थैरव्यवहितं पाशुकमेव कर्तव्यमिति । "उपांशु चरति प्रागग्नीषोमीयादि" (का० श्रौ० ७।२।२९) त्यस्यायमवधिरिति ज्ञापनार्थं, साद्यष्क्रे च "पुरोडाशो वाऽग्नीषोमीय स्थान"(का०श्रौ०२२।३।२९) इत्युक्तं सोप्यस्मिन्नवसरे यथा स्यादित्येवमर्थमग्नीषोमीयेऽतः पशुरितिसूत्रं कृतम् ।

(६) आज्यासादनान्तस्य पूर्वं कृतत्वादभ्र्यादानादेरेवायमवसर इति ।

आध्वर्यवप्रकृतिः ।

यूपावटं परिलिखत्याहवनीयस्य पुरस्तादन्तर्वेद्यर्धम्(१) ।
"ॐइदमहꣳ रक्षसाङ्ग्रीवा अपिकृन्तामि" (१।१) ।
उदकोपस्पर्शः । उपरसम्मितं खनति । प्राचः पाꣳशूनुद्यपति ।
तदग्रेण यूपं (२)प्राञ्चं निदधाति । कुशमुष्टिमुपरि तस्मिन्

---

(१) अत्र मीमांसा—
अन्तर्वेदि मिनोत्यर्धं यूपाङ्गमुत लक्ष्येत् । देशं यूपाङ्गभावेन वेदिभागोऽत्र चोद्यते ॥॥
बहिर्वेद्यर्धमित्येतद्वाक्यं भिद्येत तद्विधौ । मीयमानस्य यूपस्य तावान्देशोऽत्र लक्ष्यते
(जै० न्या० मा० ३।७।११-१२) ।

(२) यूपलक्षणं कात्यायनपरिशिष्टे—
चातुर्वर्ण्यं प्रवक्ष्यामि वृक्षाणां पशुभिः सह । वृक्षा च्छेदेन विज्ञेया वर्णेन पशवस्तथा ॥
श्वेतस्तु ब्राह्मणो ज्ञेयः पिङ्गरः क्षत्रियः स्मृतः।वैश्यस्तु धूम्रवर्णः स्यात् कृष्णं शूद्रं विनिर्दिशेत्।
ब्राह्मणे ब्राह्मणो यूपः क्षत्रिये क्षत्रियो भवेत् । वैश्ये तु वैश्ययूपः स्यात् कृष्णं शूद्रं तु वर्जयेत् ॥
यथवात्मा तथा यूपो यूपे ह्यात्मा प्रतिष्ठितः । अत्मा वै यजमानस्य यूपत्वमनुगच्छति ॥
निन्दां प्रशस्तिं वक्ष्यामः कात्यायनमतं यथा । यूपस्य सचषालस्य अध्वर्युः कारयेत्सदा ॥
आत्मनं यजमानस्य यूपमाहुर्मनीषिणः । यूपं श्रेष्ठतमं कुर्यादध्वर्युः सर्वकर्मसु ॥
समभूमिषु ये जाता विविक्त काननान्तरे । स्निग्धा बहुलपर्णाश्च ते यूपा यज्ञकर्मणि ॥
वर्जयेत्कन्दरे जातं तटजातं तथैव च । गिरिमूर्द्धनि ये जाता नदीकूलाश्रिताश्च ये ॥
वल्लीभिर्वेष्टिताश्चैव वज्रविनिहतास्तथा । सुषिरा जर्जराश्चव कोटरैराश्रिताश्च ये ॥
शीर्णाश्च कटसम्बन्धान्यूपांश्च परिवर्जयेत् । छेदनेन प्रमाणस्तु तन्तुको यदि दृश्यते ॥
तन्तुकेन तु विज्ञेयः कण्टो वा यदि वा कृमिः । माक्षिष्टवर्णसंकाशे शल्ये भवति दद्रुरः ॥
पीतके मण्डले गोधा नीले विद्याद् भुजङ्गमम् ।श्यामं वा यदि वा कृष्णं मण्डलं यदि दृश्यते॥
दीर्घसर्पविकारः स्याद्दृश्यते नात्र संशयः । कपिले मूषिकं विद्यात्कृकलासं तथाऽरुणे ॥
शुक्लवर्णे तु पाषाणं कपोते गृहगोधिकाम् । क्षते च रुधिरस्रावं गोविद्धे रोगिता तथा ॥
शूलकं वर्जयेन्नित्यं सर्वयज्ञेषु निश्चितम् ।उच्छ्रितो यजमानस्य यूपवक्त्रं तु नाहरेत् ॥
शीर्णाकृतिर्विपर्यस्तस्तथैव धनुराकृतिः । उच्छ्रितो यजमानस्य पशुपुत्रविनाशकृत ॥
अव्रणो न च शुष्काग्रो मध्ये चोपनतो भवेत्।अग्रे चोपनतः किञ्चित्स यूपो यज्ञियः स्मृतः॥
उच्छ्रीयमाणो यूपस्तु दक्षिणा पतितो यदि । तस्मिन्सम्वत्सरं मृत्युर्यजमाजस्य निर्दिशेत्॥
प्रत्यगुत्तरतो वापि यस्य यूपोन्नतो भवेत् । प्रागेव तु विनाशः स्याद् ध्रुवमप्सु भयं भवेत् ॥
अथ तस्यैव यूपस्य यदष्टाश्रीणि कुर्वते ॥ चौराद्राजकुलाद्वापि उभयत्र भयं भवेत् ।
प्रथमाश्रिविनाशे च उभयत्र भयं भवेत । द्वितीयस्यामिष्टनाशस्तृतीया तु प्रजां हरेत् ॥
चतुर्थ्यां मरणं विद्यात्पञ्चम्यां तु धनक्षयः । षष्ठी पत्नीविनाशाय सप्तम्यामनिलाद्भयम् ॥
चौराद्राजकुलाद्वापि अष्टम्यां भयमिष्यते । प्रथमा अग्निदैवत्या द्वितीया सोमदेवता ॥
तृतीया वारुणी प्रोक्ता चतुर्थी यमदेवता । पंचमी नागदेवत्या षष्ठी अनिलदेवता ॥
सप्तमी पितृदेवत्या अष्टमी सूर्यदेवता । अश्रीणां देवता ज्ञेता यूपो वैष्णव उच्यते ॥
वज्रस्य देवता ज्ञेता एतत्ते यूपलक्षणम् ॥

आध्वर्यवपद्धतिः ।

(१)प्रथमशकलञ्च, अग्रमुत्तरेण चषालम् ।

यवोऽसीत्यप्सु यवानोप्य ।

"ॐयवोऽसि यवयास्मद्वेषो यवयारातीः" (६।१) ।

प्रोक्षत्यग्रमध्यमूलानि दिवे त्वेति प्रतिमन्त्रम् ।

"ॐदिवे त्वा प्रोक्षामि ।

ॐअन्तरिक्षाय त्वा प्रोक्षामि ।

ॐपृथिव्यै त्वा प्रोक्षामि" (६।१) ।

"अवटे शेषमासिञ्चति शुन्धन्तामिति ।

"ॐशुन्धन्तांल्लोकाः पितृषदनाः" (६।१) ।

उदकोपस्पर्शः ।

बर्हींषि(२) प्राञ्चयुदञ्चि च प्रास्यति पितृषदनमसीति ।

"ॐपितृषदनमसि" (६।१) ।

उदकोपस्पर्शः ।

अत्र मीमांसा—

अग्नीषोमीयमुख्येषु यूपो भिन्नोऽथ तन्त्रता । उपदेशातिदेशाभ्यां भिन्नो नो कालभेदतः ॥
संस्कारास्तक्षणाद्याः किं भिन्नास्तन्त्रेण वा ऽग्निमः।पशुकालत्वतो मैवं यूपत्वापादका यतः
(जै० न्या० मा० ११।३।३-४) ।

(१) अयमेव (छिद्यमानस्य यूपस्य प्रथमं पतितः) शकलः स्वरुशब्दवाच्यः । स च यूपवत् (जै० सू० ११।३।३-४) सर्वपशुसाधारणः ।

तथा हि मीमांसा—

स्वरुर्भिन्नोऽथवैकः स्यादस्वकालत्वतो भिदा । प्राथम्यमेकशकले तन्त्रं स्यादविशेषतः ।
(जै० न्या० मा० ११।३।५)

अन्यच्च—

स्वरुं कुरुत इत्यत्र स्वरुर्यूपात् पृथक् छिदाम् ।
प्रयोजयेन्न वाऽऽद्योऽस्तु विशिष्टस्य विधानतः ।
आद्यस्य यूपखण्डस्य स्वरुत्वाख्यविशेषणे ।
विहिते लाघवं तस्मादनुनिष्पन्न एव सः ।
(जै० न्या० मा० ४।२।१-२) ॥

(२) अत्र चासंस्कृता एव कुशा ग्राह्या । तथा हि कात्यायनः "कौशं बर्हिः" (१।३।१२) इति ।

मीमांसा च—

बर्हिराज्यपुरोडाशशब्दा संस्कारवाचिनः ।
जात्यर्था वा शास्त्ररूढेस्ते स्युः संस्कारवाचिनः ॥
जातिं त्यक्त्वा न संस्कारे प्रयुक्ता लोकवेदयोः ।
विनापि संस्कृतिं लोके दृष्टत्वाज्जातिवाचिनः॥
(जै० न्या०मा०१।४।२२-२३)

आध्वर्यवपद्धतिः ।

प्रथमशकलं चाग्रेणीरसीति ।

"ॐअग्रेणीरसि स्वावेश उन्नेतृणामेतस्य ग्वित्ताँदधित्वा स्थास्यति" (६।२) ।

अवटार्थमाज्यर्ठ० शालाद्वार्ये सꣳस्कृत्य स्रुवेणावटे जुहोति तूष्णीम् ।

इदं प्रजापतये० ।

यूपमुत्तरेण पुरस्तात्परिक्रम्याध्वर्युर्यजमानो वा यूप(१)मनक्त्युदङ्डुपविश्य ।

यूपायाज्यमानायानुवाचति ।

यूपायाज्यमानायानुब्रू३हि ।

देवस्त्वेत्यनक्ति ।

"ॐदेवस्त्वा सविता मध्वानक्तु" (६।२) ।

हौत्रपद्धतिः ।

अग्नीषोमीयेणोपवसथे पशुना यजते ।

(यूपाञ्जनम्)

यूपाञ्जनम् ।

(२)यूपायाज्यमानायानुब्रू३होत्युक्ते ।

ततो होता हविर्द्धानपूर्वद्वार्प्युपविष्ट एवान्वाह ।

"ॐ अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।

---

(१) यूपाञ्जने घृतमन्यदेव लौकिकं ग्राह्यं न स्थाल्यमाज्यम् । तथा च सूत्रम्-'यूपाञ्जने च सर्पिः' (का० श्रौ० २।८।८) इति ।

सांग्रस्क (तां० ब्रा० १६।१३।८ का० श्रौ० २२।३।४७) खलेवाली यूपो भवति तत्रापि पर्यूहण—परिषेचन—अञ्जन—प्रोक्षणादिसंस्काराणामनुष्ठानं भवत्येव ।

तथा हि मीमांसा—

पर्यूहणाद्यञ्जनादि न स्यात्स्याद्वाऽत्र पूर्ववत् ।

न स्यादृष्टादृष्टभावादविरोधाच्च तन्नयेत् । (जै०न्या० मा० १०।२।४१) ।

यूपैकादशिन्यामञ्जनादेः परिव्यथणान्तानुसमयः कर्तव्यः ।

तथाहि मीमांसा—

यूपाञ्जनादिरेवकः संघोवाऽनुसमीयते ।

एकैकः पूर्ववन्नैवं वचनात्काण्डसंगतेः ॥ (जै०न्या० मा० ९।२।८) ॥

(२) यूपाञ्जनं शाङ्खायनानां यजमानकर्तृकम् । अत्र यद्यपि कात्यायनेन "पुरस्ता त्परिक्रम्याध्वर्युर्यजमानो वा यूपमनक्त्युदङ्डुपविश्ये (६।२।२१) त्यध्वर्युयजमानयोर्विकल्पेन कर्तृत्वमभिहितं तथापि शाङ्खायनानां "स्वभ्यक्तं स्वयमेव यजमानः कुर्वीते' (शां० ब्रा० १०।१) ति विशिष्टश्रुतिबलाद्यजमानेनैव यूपस्य दक्षिणत उदङ्मुखतयोपविष्टेन लौकिकेनाज्येन यूपाञ्जनं विधेयमिति ।

आध्वर्यवपद्धतिः।

चषालमुभयतोऽन्तर्वहिश्च । देशभेदान्मन्त्रावृत्तिः ।
"ॐ देवस्त्वा सविता मध्वानक्तु" (६।२) ।
अक्तं प्रतिमुञ्चति सुपिप्पलाभ्य इति ।
"ॐ सुपिप्पलाभ्यस्त्वौषधीभ्यः प्रतिमुञ्चामि" (६।२) ।
सोपरमग्निष्ठादेशमक्त्वा,
ॐ देवस्त्वा सविता मध्वानक्तु" (६।२) ।
परिव्ययणदेशठ०समन्ता(१)त्परिमृश्याध्वर्युर्नावसृजेदापरिव्ययणात्।
उच्छ्रीयमाणायानुवाचयति ।
यूपायोच्छ्रीयमाणायानुब्रू३हि ।
द्यामग्रेणेत्युच्छ्रयति(२) ।

औद्गात्रपद्धतिः ।

यूपोच्छ्रयणकाले उद्गातृप्रस्तोतृप्रतिहर्तरि उच्छ्रीयमाणं यूपं पश्येयुः·

हौत्रपद्धतिः।

यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थो३म् (३)।
अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।
यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थो३म्।
अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन" ।
अत्रारमेत् ।
तत उच्छ्रीयमाणायानुब्रू३हीत्युक्ते—

---

(१) अत्र यूपस्पर्शने प्रायश्चित्तं श्रूयते "यद्येकं यूपमुपस्पृशेदेष ते वायो इति ब्रूयाद्यदि द्वौ एतौ वा इति यदि बहून् एते ते वायव" इत्यादि । तदिदं प्रायश्चित्तं किं वैदिके यूपोच्छ्रयणादिविषये स्पर्शे उत लौकिके उतो भयत्रेति संशये—विशेषाश्रवणादनियमः. प्रकरणात्फलकल्पनापरिहाराच्च वैदिक एवेति पूर्वपक्षे—"यूपो वै यज्ञस्य दुरिष्टमामुञ्चते तस्माद्यूपो नोपस्पृश्यत" इति प्रतिषिध्य पश्चादिदमुच्यते "यद्येकमुपस्पृशे" दित्यादि । प्रतिषेधश्च रागप्राप्ते लौकिके, वैदिकस्य विहितत्वेन प्रतिषेधानर्हत्वात् प्रतिषिद्धानुष्ठाने प्रत्यवायोत्पत्तेः प्रतीकारापेक्षायां प्रायश्चित्तविधिरपेक्षितार्थो भवति तस्माल्लौकिके प्रायश्चित्तमिति सिद्धान्तः । तथा हि जैमिनिः—लौकिके दोषसंयोगादपवृक्ते हि चोद्यते निमित्तेन प्रकृतौ स्यादभागित्वात् (९।३।९) । सूत्रार्थस्तुलोकिके उपस्पर्शने अर्थविधिः स्याद्दोषसंयोगात्, कृथं दोषसंयोगः, हि यस्मादपवृक्ते प्रतिषिद्धेस्पर्शने तेन निमित्तेन विधीयते मन्त्रः प्रकृतौ प्रतिषेधस्याभागित्वाद्दोषनिर्घातार्थत्वाल्लौकिकएव स्यादिति ।

(२) अत्र मीमांसा—खलेवाल्यां जोषणं च छेदनं तक्षणेच्छ्रयौ ।
स्युर्वा नो. चोदकात्स्युर्नो वैयर्थ्याच्च विरोधतः ॥ (जै० न्या० मा० १०।२।४०)

(३) ऋ० ३।८।१॥